शास्त्रसंदेश-४५

# स्तोत्रसंदेशमाला

## स्तुतयः १

११



मुनि विनयरक्षितविजयजी म.सा.

शास्त्रसंदेश-४५

# स्तोत्र संदेशमाला-११

स्तुतयः-१

: સંપાદક - સંકલન :

પ.પૂ.આચાર્ય ભ.શ્રીમદ્

વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી

પૂ.આ.શ્રી બોધિરત્નસૂરીશ્વરજી મ.સા.ના

શિષ્યરત્ન

પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.


પ્રકાશક-પ્રાપ્તિ સ્થાન

शास्त्रसंदेश

C/o અસલ, ૩, મણિભદ્ર એપાર્ટમેન્ટ,

આરાધના ભવન માર્ગ, સુભાષચોક, ગોપીપુરા-સુરત-૧

# સ્તોત્ર સંદેશમાલા-૧૯

स्तुतयः-१

આવૃત્તિ : પ્રથમ, વિ.સં. ૨૦૭૮, મૌન એકાદશી,
તા. ૧૪-૧૨-૨૦૨૧

પેજ : ૧૦ + ૩૦૨ + ૮

સ્તુતી : ૪૫૯ શ્લોક : ૧૫૯૨



: પ્રમાર્જના :

પૂ.પં.શ્રી શ્રુતતિલકવિજયજીગણી

પૂ.મુ.શ્રી હિતરક્ષિતવિજયજી મ.સા.

: છંદ-સંયોજના :

પૂ.સા.શ્રી ભવ્યરત્નાશ્રીજી મ.સા.ના શિષ્યા

પૂ.સા. શ્રી પુણ્યરત્નાશ્રીજી મ.સા.



ટાઈપ સેટીંગ : શ્રી સાંઈ કોમ્પ્યુટર્સ-નિતિનભાઈ, અમદાવાદ.

મુદ્રક : બાલારામ ઓફસેટ-અમદાવાદ.


વિશેષ નોંધ : સ્તોત્ર સંદેશમાલાના ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યના વ્યયથી કરવામાં આવેલ છે. ગૃહસ્થવર્ગે મૂલ્ય આપી ઉપયોગ કરવો.

આભાર...!　　અનુમોદનીય...!　અનુકરણીય...!

# સ્તોત્ર સંદેશમાલાના
# ભાગ ૧૯-૨૦ ના
# દ્રવ્ય લાભાર્થી

પ.પૂ. સુવિશાલ ગચ્છાધિપતિશ્રી
આ. દેવ શ્રીમદ્ વિજય રામચન્દ્રસૂરીશ્વરજી
મહારાજાના સમુદાયવર્તી પ.પૂ.આ. શ્રીમદ્ વિજય
કનકશેખરસૂરીશ્વરજી મ.સા.ની નિશ્રામાં
પ.પૂ.મુ.શ્રી પુણ્યશ્રમણ વિ. મ.સા.ના શિષ્ય
પ.પૂ.મુ.શ્રી યોગપુણ્ય વિ.મ.સા.ની
સંવત ૨૦૭૧ના વૈશાખ સુદ-૭ ના રોજ
શ્રી ભારતનગર જૈન સંઘ ગ્રાન્ટ રોડના
આંગણે થયેલ ભાગવતી પ્રવજ્યાની જ્ઞાનખાતાની
ઉપજમાંથી લાભ લેવામાં આવેલ છે.
આપશ્રીએ કરેલ શ્રુતભક્તિની શાસ્રસંદેશ ભૂરિ
ભૂરિ અનુમોદના કરે છે.

શાસ્ત્રસંદેશ, સુરત

**સ્તોત્ર સંદેશમાલાના ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોનો સંપૂર્ણ સમાવેશ કરવામાં આવેલ છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) જૈન સ્તોત્ર સંચય-૧, ૨, ૩ - આ. માણિક્યસાગરસૂરિ
(૨) જૈન સ્તોત્ર સંચય-૪, ૫ - મુનિ લાભસાગરગણિ
(૩) જૈન સ્તોત્રાવલી - મુનિ લાભસાગરગણિ
(૪) જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - મુનિ ચતુરવિજયજી
(૫) સ્તોત્ર સમુચ્ચય-મુનિ ચતુરવિજયજી
(૬) શ્રી જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - યશોવિજય જૈન ગ્રંથમાળા, બનારસ
(૭) શ્રી સ્તોત્ર રત્નાકર ભાગ ૧,૨ - યશોવિજય જૈન સંસ્કૃત પાઠશાળા, મહેસાણા
(૮) સ્વાધ્યાય દોહન - આ. કનકચન્દ્રસૂરિ
(૯) શ્રી નેમિનાથ સ્તોત્ર સંગ્રહ-મુનિ તીર્થભદ્ર વિ.ગણિ
(૧૦) સ્તોત્ર સંગ્રહ - મુનિ વૈરાગ્યરતિ વિ.ગણિ.
(૧૧) બૃહદ્-નિર્ગ્રન્થ-સ્તુતિ મણિમંજુષા-મધુસૂદન ઢાંકી - જિતેન્દ્ર શાહ
(૧૨) સંસ્કૃત પ્રાચીન સ્તવન સંદોહ-મુનિ વિશાલવિજયજી
(૧૩) વિવિધ તીર્થકલ્પ - મુનિ જિનવિજયજી
(૧૪) શ્રી જૈનસ્તોત્રકોશ - મુનિ ચંદ્રોદયવિજયજી સૂર્યોદયવિજયજી
(૧૪) શાસન પ્રભાવક આ. જિનપ્રભસૂરિ ઔર ઉનકા સાહિત્ય
(૧૫) અનુસંધાન ભાગ ૧ થી ૮૫ - આ. શીલચન્દ્રસૂરિ

*(દરેક ભાગમાં આવતા પ્રાચીન અપ્રકાશિત સ્તોત્રો)*

**સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોમાંથી અમુક સ્તોત્રો લીધેલા છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) કાવ્ય સંગ્રહ ભાગ ૧,૨

(૨) શ્રી વલ્લભીય લઘુકૃતિ સમુચ્ચય

(૩) સમયસુન્દર કૃતિ કુસુમાંજલી

(૪) ચતુર્વિંશતિ જિનેન્દ્ર સ્તવનાવલિ

(૫) શ્રી જિનવલ્લભસૂરિ ગ્રંથાવલિ

(૬) યુગાદિવંદના

(૭) શ્રી અજીતનાથ વંદનાવલી

(૮) શ્રી સંભવનાથ વંદનાવલી

(૯) શ્રી પ્રકરણ રત્નાકર ભાગ-૨

(૧૦) મહાકવિ શ્રી જયશેખરસૂરિ ભાગ-૨

(૧૨) તુલસીપ્રજ્ઞા (પાર્શ્વ સ્તુતિ સંગ્રહ)

(૧૩) ધર્મવર્દ્ધન ગ્રન્થાવલી

(૧૪) શ્રી ઋષભ-વીરેશાદિ ચતુર્વિંશતિ જિન સ્તવનાવલી

(૧૫) શ્રી જિનેન્દ્ર નમસ્કારાદિ સંગ્રહ

(૧૬) ગિરનાર ગ્રંથોની ગોદમાં

(૧૭) સમ્બોધિ (ઈ.સ. ૨૦૧૪ સુધીના)

(૧૮) નિશ્રેયસમ્ ભાગ ૧ થી ૧૧

(૧૯) શ્રુતસાગર - કોબા

(૨૦) સ્તુતિનંદિની - મુ.હિતવર્ધનવિજયજી

---

*આ સિવાયના પણ અનેક પુસ્તકોમાંથી સ્તોત્રો એકત્રિત કરવામાં આવેલ છે તે સર્વેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.*

---

*સ્તોત્ર સંદેશમાલા ભાગ ૧૯/૨૦માં કે જે સ્તુતિના છે તેમાં નીચે જણાવેલ પુસ્તકોનો સંપૂર્ણ સમાવેશ કરવામાં આવેલ છે તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.*

(૧) સ્તુતિ તરંગિણી ભાગ-૧, મુ.નેમવિજયજી

(૨) સ્તુતિ તરંગિણી ભાગ-૨, મુ.નેમવિજયજી

(૩) સ્તુતિ તરંગિણી ભાગ-૩, મુ.નેમવિજયજી

# પ્રકાશકીય...!

પૂર્વના પુણ્યવંતા મહાપુરુષોએ પ્રરૂપેલા પ્રકરણોની એક ગ્રંથમાળા એટલે શાસ્ત્રસંદેશમાલા, આજથી ૧૬ વર્ષ પૂર્વે ૪૦૬ પ્રકરણો ગ્રંથો ૨૦ ભાગમાં પ્રકાશિત કરેલ તે પછી ૧૧ વર્ષે પૂર્વે ૧૩૭ પ્રકરણ ગ્રંથો ચાર ભાગમાં તથા ૬૨૬ ગ્રંથોના ૧,૭૭,૦૦૦ શ્લોકો સમાવતા અકારાદિના ચાર ભાગ અને સંવેગરંગશાળા નામનો મહાનગ્રંથ પ્રકાશિત કરેલ અને આજે ૮૦ પ્રકરણ ગ્રંથો બે ભાગમાં પ્રકાશિત થઈ રહ્યા છે. એટલે આજ સુધીમાં ૬૨૩ પ્રકરણ ગ્રંથોના ટોટલ ૨૬ ભાગ અને અકારાદિ ચાર ભાગમાં સમાવિષ્ટ કરી પ્રકાશન કરવાનો લાભ અમોને મળેલ છે.

પ્રકરણોની સાથે સાથે પૂજ્યશ્રી સ્તોત્રો-સ્તુતિઓ પણ સંગ્રહિત કરી રહ્યા હતા તે પણ આજે ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓના ૨૦ ભાગ અમો પ્રકાશિત કરી રહ્યા છીએ.

જૈનશાસનમાં આજ સુધીમાં પ્રકાશિત થઈ બહાર પડેલ પ્રકરણ ગ્રંથો અને સ્તોત્રો-સ્તુતિઓ જે અલગ અલગ હતા તે બધા જ આજે હવે એક સાથે મળી રહેશે. આ

દ્વારા શ્રી ચતુર્વિધ સંઘની સેવાનો લાભ અમોને મળેલ છે તે માટે અમો ધન્યતા અનુભવીએ છીએ.

સંખ્યાની દષ્ટિએ અધધ... થઈ જાય તેવા ૬૨૩ પ્રકરણ ગ્રંથો ૬૨૬ + ૮૦ ગ્રંથોની અકારાદિ, ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓ પૂજ્યશ્રીએ સંકલન-સંપાદન કરી આપ્યા તે માટે અમો તેઓશ્રીના આભારી છીએ.

પૂર્વની જેમ આ ૨૦ + ૨ પુસ્તકો માટે પણ અલગ-અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યમાંથી લાભ લીધેલ છે તે માટે પણ અમો તે તે સંઘ + ટ્રસ્ટીઓ + કાર્યકરોના પણ આભારી છીએ.

ટાઈપ સેટીંગ શ્રી સાંઈ કોમ્પ્યુટર્સવાળા નિતિનભાઈ તથા પ્રીન્ટીંગ બાઈન્ડીંગનું કાર્ય બાલારામ ઓફસેટવાળા રીતેશભાઈએ વિશેષ ખંત-કાળજીપૂર્વક કરી આપેલ છે.

**-શાસ્ત્રસંદેશ**

# अनुक्रमणिका


| क्र.नं. | स्तुत्यनाम | स्तुति संख्या | पेज नं. |
|---|---|---|---|
| १ | श्रीआदिनाथजिनस्तुतयः | ३९ | १थी२७ |
| २ | श्रीअजितजिनस्तुतयः | ७ | २८थी३२ |
| ३ | श्रीशम्भवजिनस्तुतयः | ८ | ३३थी३७ |
| ४ | श्रीअभिनन्दनजिनस्तुतिः | १ | ३८ |
| ५ | श्रीसुमतिजिनस्तुतिः | १ | ३९ |
| ६ | श्रीपद्मप्रभजिनस्तुती | २ | ४०-४१ |
| ७ | श्रीसुपार्श्वजिनस्तुती | २ | ४२-४३ |
| ८ | श्रीचन्द्रप्रभजिनस्तुतयः | ८ | ४४थी४८ |
| ९ | श्रीसुविधिनाथस्तुतिः | १ | ४९ |
| १० | श्रीशीतलनाथस्तुतिः | १ | ५० |
| ११ | श्रीश्रेयांसजिनस्तुती | २ | ५१-५२ |
| १२ | श्रीवासुपूज्यजिनस्तुतयः | ५ | ५३-५४ |
| १३ | श्रीविमलनाथस्तुतिः | १ | ५५ |
| १४ | श्रीअनन्तनाथस्तुतिः | १ | ५६ |
| १५ | श्रीधर्मनाथस्तुतिः | १ | ५७ |
| १६ | श्रीशान्तिनाथजिनस्तुतयः | १९ | ५८थी७२ |
| १७ | श्रीकुन्थुनाथजिनस्तुतिः | १ | ७२ |
| १८ | श्रीअरनाथजिनस्तुती | २ | ७३ |
| १९ | श्रीमल्लिनाथजिनस्तुतिः | १ | ७४ |
| २० | श्री मुनिसुव्रतस्वामीस्तुती | २ | ७५थी७६ |
| २१ | श्रीनमिनाथजिनस्तुती | २ | ७७ |
| २२ | श्रीनेमिनाथजिनस्तुतयः | २२ | ७८थी८९ |
| २३ | श्रीपार्श्वनाथजिनस्तुतयः | ६५ | ९०थी१४० |
| २४ | श्रीवर्धमानजिनस्तुतयः | ९७ | १४९थी१८९ |

| क्र.नं. | स्तुत्यनाम | स्तुति संख्या | पेज नं. |
|---|---|---|---|
| २५ | श्रीचतुर्विंशतिजिनस्तुतयः | ५ | १९०थी१९५ |
| २६ | श्रीसामान्यजिनस्तुतयः | ३५ | १९६थी२१५ |
| २७ | श्रीसीमन्धरजिनस्तुतयः | ८ | २१६थी२२१ |
| २८ | श्रीवीसविहरमानजिनस्तुती | २ | २२२-२२३ |
| २९ | श्रीसप्तत्यधिकशतजिनानां स्तुतिः | १ | २२४ |
| ३० | श्रीशाश्वताऽशाश्वतजिनस्तुतयः | ३ | २२५थी२२७ |
| ३१ | श्री पञ्चजिन तथा षट्तीर्थ-स्तुतयः | ३ | २२८-२३० |
| ३२ | श्रीपञ्चकल्याणकस्तुतयः | ३ | २३१थी२३३ |
| ३३ | श्रीसिद्धचक्रस्तुतयः | २७ | २३४थी२४९ |
| ३४ | श्रीगौतमगणधरस्तुतयः | १९ | २५०थी२५८ |
| ३५ | श्री पुण्डरीकगणधरस्तुतयः | ५ | २५९थी२६१ |
| ३६ | श्रीअष्टापदतीर्थस्तुतयः | ४ | २६२-२६३ |
| ३७ | श्रीनन्दीश्वरद्वीपस्तुतयः | ४ | २६४थी२६६ |
| ३८ | श्री शत्रुञ्जयतीर्थस्तुतयः | ६ | २६७थी२७० |
| ३९ | श्रीसम्मेतशिखरगिरिस्तुती | २ | २७१ |
| ४० | श्रीअर्बुदाचलस्तुतिः | १ | २७२ |
| ४१ | श्रीपर्युषणापर्वस्तुतयः | ४ | २७३थी२७६ |
| ४२ | श्रीदीपमालिकास्तुतयः | ७ | २७७थी२८० |
| ४३ | द्वितीयादिनस्तुतयः | ३ | २८१-२८२ |
| ४४ | श्रीउद्योतपञ्चमीस्तुतयः | १० | २८३थी२८९ |
| ४५ | श्रीअष्टमीतिथिस्तुतयः | ३ | २९०थी२९२ |
| ४६ | श्रीमौनएकादशीस्तुतयः | ९ | २९३थी२९९ |
| ४७ | वीशस्थानकतपस्तुतिः | १ | ३०० |
| ४८ | श्रीसमवसरणस्तुतिः | १ | ३०१ |
| ४९ | श्रीमथुरास्तूपस्तुतिः | १ | ३०२ |

## ॥ श्रीआदिनाथजिनस्तुतयः ॥

(१) (वसन्ततिलका)

भक्तामरप्रणतमौलिमणिप्रभाणा-
मुद्दीपकं जिनपदाम्बुजयामलं ते ।
स्तोष्ये मुदाऽहमनिशं किल मारुदेव !,
दुष्टाष्टकर्मरिपुमण्डलभित्सुधीर ! ॥ १

श्रीमज्जिनेश्वरकलापमहं स्तुवेर-
मुद्योतकं दलितपापतमो वितानम् ।
भव्याम्बुजातदिननाथनिभं स्तवीमि,
भक्त्या नमस्कृतममर्त्यनराधिराजैः ॥ २

वर्यां जिनक्षितिपतेस्त्रिपदीमवाप्य,
गच्छेश्वरैः प्रकटिता किल वाम्मुदा या ।
सम्यक् प्रणम्य जिनपादयुगं युगादा-
वेवं शुभार्थनिकरैर्भुवि साऽस्तु लक्ष्म्यै ॥ ३

यक्षेश्वरस्तव जिनेश्वर ! गौमुखाह्वः,
सेवां व्यधत्त कुशलक्षितिभृत्पयोदः ।
त्वत्पादपङ्कजमधुव्रततां दधाना-,
वालम्बनं भवजले पततां जनानाम् ॥ ४

(२) (वसन्ततिलका)

गीर्वाणमौलिमणिरत्नशिखाकलाप-
चञ्चन्मरीचिनिचयाऽर्चितपादपीठम् ।

चामीकरद्युतिसमप्रभविश्वनाथं,
प्रातः प्रणौमि परमेश्वरनाभिपुत्रम् ॥ १

क्षीरोदवारिपरिपूर्णमहासुगन्ध-
मत्तभ्रमद्भ्रमरगुञ्जरवाऽभिरामैः ।
ये स्नापिताः सुरगिरौ मणिरत्नकुम्भैः,
शक्रैर्जिनाः प्रवितरन्तु हितानि नस्ते ॥ २

स्याद्वादभीमनखचक्रविराजितांऽह्रिः,
सत्साधुकारिमुखपञ्जरमध्यवासी ।
गर्जन् कुवादिकलिकुञ्जरदर्प्पभेदी,
जैनाऽऽगमो जयतु केसरिवत्प्रभाते ॥ ३

दर्पोद्धतद्विरदपृष्ठमधिष्ठितो यः
स्फारस्फुरत् रुचिररत्नकिरीटकोटिः ।
नानामणिप्रकररञ्जितपादपीठः,
प्रातस्तनोतु मम शर्म कपर्दियक्षः ॥ ४

पू.पं.श्री विनयहंसगणि विरचिता
(३) (वसन्ततिलका)

श्रीसूरिहर्षविनयप्रभुताप्रतिष्ठा-
श्रीसूरिहर्षविनयस्मरणीयरूपः ।
श्रीसूरिहर्षविनयध्वनिरत्नराशौ,
श्रीसूरिहर्षविनयः प्रथमः श्रियेऽर्हन् ॥ १

पूज्याः सहर्षविनयस्तुतपादपद्मा-
स्तीर्थस्थहर्षविनयश्रियमादधानाः ।
सर्वत्र हर्षविनयस्वनसन्निधान्ना,
यच्छन्तु हर्षविनयप्रसूतं जिनास्ते ॥ २

सूरीशहर्षविनयद्विपदर्पपायी,
सूरीशहर्षविनयस्थितकेसरश्रीः ।
सूरीशहर्षविनयप्रियकक्षशाली,
श्रीरागमो हरिरिवोत्तमधर्महंसः ॥ ३

श्रीधर्महंसललने नलिनीसधर्म-
श्रीधर्महंसनमनाः कमला श्रुतेशा ।
पद्मा श्रियेऽस्तु भविनां गुरुधर्महंस-
श्रीधर्महंससुमहाविजयाजयाऽम्बा ॥ ४

(४) (वसन्ततिलका)

श्रीकुङ्कणाख्यविषयस्थितपत्तनश्री-
सोपारकाऽवनितलामलभूषणाऽऽभ ! ।
श्रीमद्युगादिजिननायक ! मौलिनाऽहं,
भक्त्या वहे तव पदाऽब्जयुगं जिनेश ! ॥ १

राज्यं विहाय सकलं तृणवद् गृहीतः,
श्रीसंयमो नरसुराऽसुरसाक्षिकं यैः ।
ते तीर्थपा ऋषभदेवमुखाः सुखानि,
त्रैलोक्यलोकनिवहस्य सदाऽपि दद्युः ॥ २

श्रीतीर्थनाथमुखपङ्कजजन्मभूमि-
र्मोहान्धकारनिकुरुम्बविनाशभानुः ।
उद्भासिताऽखिलजगत्त्रितयस्वरूपः,
श्रीआगमो दिशतु मे शिवसौख्यलक्ष्मीम् ॥ ३

सोपारकप्रवरतीर्थपतेः पदाब्जं,
या सेवते मधुकरीव मुदा सदापि ।

चक्रेश्वरी सुरसुरीनिकरेण सेव्या,
सा सङ्घलोकनिवहस्य सुखं चिनोतु ॥ ४

(५) (शार्दुलविक्रीडित)

श्रीमत्कुङ्कुणदेशपेशलतरालङ्कारहारोपम-
श्रीसोपारकनायकाह्वयमणेः श्रीजीवितस्वामिनः ।
श्रीनाभेयजिनेश्वरस्य चरणाम्भोजद्वयीमन्वहं
माद्यन्मङ्गलकेलिमञ्जुलगृहं संस्तौमि भक्तेरहम् ॥ १

संसारप्रसरन्निदाघसमयोद्भूतप्रभूताङ्गभृत्
तापव्यापसमापने निरुपमप्रोद्दामकादम्बिनी ।
दुर्जेयान्तरवैरिवारजयिनी जैनी चतुर्विंशति-
र्विश्वोन्माद्यदनङ्गभङ्गजननी जीयाज्जनानन्दिनी ॥ २

उद्दामत्रिपदीमृणालकलितेऽनेकान्तसत्कर्णिके
नानार्थस्फुटभूरिकेसरलसत्सौरभ्यविभ्राजिते ।
अङ्गोपाङ्गपवित्रपत्रनिवहे जैनागमाम्भोरुहे
लक्ष्मीकेलिगृहे वहेमहि वयं रङ्गेण भृङ्गश्रियम् ॥ ३

विश्वप्रार्थितदानदिव्यतरवः श्रीसङ्घरक्षाविधौ
दक्षा यक्षवराः पराहतमहायात्रान्तरायव्रजाः ।
श्रीआदीश्वरपादपद्मयुगले रोलम्बलीलाजुषः
श्रेयःश्रेणिपुषः सुखश्रियममी दद्युः सतां सन्ततम् ॥ ४

(६) (वसन्ततिलका)

चेक्रिय्यतामृषभतीर्थकरेण सातं,
भव्याङ्गिनां जिनवृषानधसत्पूराणाम् ।

निर्धूतहारकवसूल्लसदङ्गकेन,
भावावनामसुरदानवमानवेन ॥ १

उत्तानतानुकृतचारुचतुर्गतीनि,
दुर्नीतिनीरनिधिसन्तरणोडुपानि ।
भक्त्या विनम्रवरवासवनागवृन्द-
चूलाविलोलकमलावलिमालितानि ॥ २

शास्त्राणि तत्त्वविशदानि सदा विभान्ति,
दीर्घप्रमाणि शमसौख्यकराणि यानि ।
सम्प्राप्तरूपजनसंस्तुतिसत्पदानि
सम्पूरिताभिनतलोकसमीहितानि ॥ ३

श्रीमारुदेव वृषभाङ्कितपादयुग्म !
भो नाथ ! मुक्तिरमणीकरपीडनस्य ।
स्वत्कानि सङ्कटघनाशुगसोदराणि,
कामं नमामि जिनराज पदानि तानि ॥ ४

(७) (वसन्ततिलका)

यस्यांऽसयोः कनकपङ्कजकान्तिभाजोः
केशाऽऽवलिसहितयोरलिनीलभासोः ।
जात्यश्मगर्भमणिपद्धतिभङ्गशोभां
धत्ते स वो दिशतु शर्म युगादिदेवः ॥ १

सद्धर्मकल्पतरुनूतनपल्लवाली
दिग्मण्डलीवदनकुदुकुमकेलीलीला ।
श्रीतीर्थराजपदपद्मनखांशुलेखा
मोहान्धसन्तमसमाशु मम च्छिनत्तु ॥ २

गर्जन्ति तावदिह दुर्मदतां दधानाः
पाखण्डमण्डलविशृङ्खलवादिनागाः ।
आकर्णयन्ति जिनसिंहनिनादमुच्चैः
स्याद्वादमध्यमहिमानमहो न यावत् ॥ ३

या पाणिपादसततस्फुटपुण्डरीक-
सौगन्ध्यलुब्ध इव सत्तमराजहंसः ।
पत्रच्छलेन वरिवस्यति चारुचित्र-
श्चारित्रतां नयतु सा श्रुतदेवता वः ॥ ४

पू.आ. श्री जिनप्रभसूरि विरचिता

श्रीमाणिक्यदेवऋषभस्तुतिः

(८) (वसन्ततिलका)

श्रीकुल्यपाकपुरलक्ष्मीशिरोऽवतंस-
प्रासादमध्यमनिमेध्यमधिष्ठितस्य ।
माणिक्यदेव इति यः प्रथितः पृथिव्याम्,
तस्यांह्रियुग्ममभिनौमि जिनर्षभस्य ॥ १

तीर्थेशिनां समुदयो मुदितेन्द्रचन्द्र-
कोटीरकोटितटघृष्टपदासनानाम् ।
मद्दुःखदारुणदुरुत्खनशाखिलेखा-
पेषाय मत्तकरिणः करिणं दधातु ॥ २

हेतूपपत्तिसुनिरूपितवस्तुतत्त्वम्,
स्याद्वादपद्धतिनिवेशितदुर्नयौघम् ।
सत्सिद्धवल्लिविपिनं भुवनैकपूजा-
पात्रं जिनेन्द्रवचनं शरणं प्रपद्ये ॥ ३

आरुह्य खे चरति खेचरचक्रिणं या,
नाभेयशासनरसालवनान्यपुष्टा ।
चक्रेश्वरी रुचिरचक्रविरोचिहस्ता,
शस्ताय साऽस्तु नवविद्रुमकायकान्तिः ॥ ४

### श्रीमाणिक्यदेवस्तुतिः

(९) (मालिनी)

निरुपममहिमानं जाड्यभानूपमानं
सुरपतिकृतमानं ज्ञानलक्ष्मीं दधानम् ।
असमशमनिधानं कुल्यपाके प्रधानं
प्रथमजिनममानं नौमि दत्तेष्टदानम् ॥ १

त्रिदशलसदुपान्ता मुक्तिसल्लक्ष्मीकान्ता
निरुपमतमकान्ता भाग्यसौभाग्यकान्ताः ।
भवगहननितान्ताऽनारतभ्रान्तितान्ता-
निह चरमजिनान्ताः पातु सर्वाः प्रशान्ताः ॥ २

अतिशयसहितानां ध्वस्तमायामदानां
जिनवरवृषभानां वर्यवाणीममानाम् ।
त्रिभुवनभविकानां मोक्षलक्ष्मीं ददानां
नमत निरुपमानां दुस्तमोऽर्कायमानाम् ॥ ३

जिनपतिजिनपक्षार्चाविधौलब्धलक्षाः
भुवनभविकरक्षाः सन्तताबद्धकक्षाः ।
निखिलमनुजलक्ष्मीभीप्सितामर्त्यवृक्षाः
सुखकृत इह दक्षाः सन्तु देव्यश्च यक्षाः ॥ ४

## सोपारकपुरमण्डनश्रीऋषभजिनस्तुतिः

### (१०) (शार्दूलविक्रीडित)

श्रीसोपारकपत्तनाऽद्भुतरमारामाशिरः शेखरं,
श्रीनाभिक्षितिपालवंशकमलाप्रोल्लासने भास्करम् ।
माद्यन्मोहमदाऽष्टकक्षयकरं मोक्षाऽध्वनिस्पन्दनं,
भक्त्याऽऽदीशजिनं स्तुवे प्रतिदिनं श्रीजीवितस्वामिनम् ॥ १

पञ्चैरावतपञ्चभारतमुखक्षेत्रेषु ये संस्थिता,
भूताऽनागतवर्तमानजिनपा विश्वत्रयीवन्दिताः ।
लोकाऽलोकविलोकिकेवलमहाज्ञानश्रिया संश्रिता-
स्तेषां श्रीपदपङ्कजं भवभिदे भूयाज्जिनानां सदा ॥ २

श्रीसिद्धान्ततरुः पदत्रयमहामूलोऽखिलाङ्गस्फुर-
च्छाखाभिः समलङ्कृतो वरतरोपाङ्गप्रशाखाऽन्वितः ।
अर्थश्रेणिसुगन्धिपुष्पनिकरैः संवासिताऽऽशामुखो,
देयान्मोक्षफलं जरामृतिहरं भव्यावलीनां सदा ॥ ३

श्रीमन्नादिजिनेन्द्रपादकमलप्रोद्यन्नखालीविभा-
श्रेणीनव्यपरागपूरमधुपः श्रीगोमुखो यक्षराट् ।
विघ्नौघप्रबलाऽन्धकारनिकरप्रध्वंसनेऽहर्मणि-
र्भव्यानां सततं तनोतु विशदा नानाविधाः सम्पदः ॥ ४

## श्रीसोपारकाऽधीश-श्रीआदिनाथस्तुतिः

### (११) (उपजाति)

स्तुवे युगादीश ! विभूष्यमाणा समानसोपारविहारसारम् ।
तवांह्रिपद्मं शिवदूरमार्गे समानसोपारविहारसारम् ॥ १

संसारवल्लीलवने यदीया गीर्वाणकल्पाधिपराजितारा: ।
जयन्तु ते तीर्थकरा विनम्र–गीर्वाणकल्पाधिपराजितारा: ॥ २

जिनेन्द्रवक्त्राम्बुजषट्पदाय सदागमायामरमोदिताय ।
नमोऽस्तु विश्वामरपादपाय सदागमायामरमोदिताय ॥ ३

जिनांह्रिपद्मं भजते प्रदत्त–समस्तविश्वाशुभसङ्गमाया ।
चक्रेश्वरी सा तनुतां सुखानि समस्तविश्वाशुभसङ्गमाया ॥ ४

(१२) (शार्दुलविक्रीडित)

ज्ञानश्रीसहितं सुरेन्द्रमहितं ध्वस्तान्तरङ्गाहितं
रागाद्यै रहितं जगत्प्रणिहितं श्रीशङ्करेणाहितम् ।
माणिक्याद्रिहितं भवाद्रिरहितं माणिक्यदेवं हितं
श्रेय: श्रीसुहितं सदाऽप्यवहितं संस्तौमि क्लृप्तेहितम् ॥ १

यद्भाषानुगतार्थयुक् प्रविगताऽसंवादत: सङ्गता
नो लुप्ता: सुगतादिभिस्त्रिजगतामर्च्या: सदाऽप्युद्गता: ।
ते सेवोपगतामरै: परिगता विश्वत्रयान्तर्गता:
सर्वे पारगता अवन्त्यवगताऽतीताखिलानागता: ॥ २

नानार्थैर्निचितं जिनेशरचितं सद्युक्तिपङ्क्त्याचितं
साधूनामुचितं नयैरुपचितं स्याद्वादवादाञ्चितम् ।
आचारै: खचितं कुवाद्यनुचितं श्रीसूरिभि: सञ्चितं
भव्येभ्यो रुचितं श्रुतं परिचितं तौष्टोमि शिष्टार्चितम् ॥ ३

चन्द्रोद्यद्वदना विमानसदना क्लृप्ताऽऽप्तसद्वन्दना
पीयूषस्वदना प्रधानगदना पार्श्वस्थसन्नन्दना ।
अम्बोद्यद्रदनाऽस्तु विघ्नकदना ऋद्ध्याऽस्तसङ्क्रन्दना
रूपश्रीमदनामरेन्दुवदना सेव्या जनानन्दना ॥ ४

(१३) (शार्दूलविक्रीडित)

संसारार्णवतारक ! क्षतमहा–कर्मावलीवेदन, !
सद्भक्त्या प्रणताङ्घ्रिपद्मयुगल ! श्रेयस्तर्तिं साधय ।
श्रीमन्नाभिनरेन्द्रनन्दन ! जनाऽनन्दप्रदानोत्तम !
भक्तानामभयप्रद श्रुतवतां, सर्वापदां वारक ! ॥ १

सर्वे पान्तु जिनोत्तमा वररुचः, सद्धर्मविस्तारिणो,
ध्वस्ताऽज्ञानतमोभरा जनगणा, निर्मानमायालवाः ।
यत्पादाम्बुजयोर्लुठन्ति सततं, स्वर्गौकसः सादराः,
सिद्धानन्दपदप्रियाः कृतधियो मन्दारमालाञ्चिताः ॥ २

भव्या ! वस्तनुतां सुशान्तिमनिशं, पूज्यैर्व्रतीन्द्रैः कृतम्,
दुर्लक्ष्यं दुर्वादिभिर्दलितदु,–र्मोहारिवर्गोद्यमम् ।
अक्षोभ्यं कुमतैर्जनैः प्रवचनं, तत्त्वार्थराशिश्रितम्,
निक्षेपाऽऽगमसिद्धतत्त्वविमलार्णोराशिमुद्द्योतकम् ॥ ३

पायाद्वः श्रुतदेवताश्रितवती, शुक्लाम्बुजं निर्मलम्,
सम्यक्तत्त्वविलासरक्तहृदया, विस्तारिता नन्दका ।
यत्प्रेक्ष्याऽलसमानसा स्थितवती, सद् भ्रामरी सन्ततिः,
सन्त्यज्याऽऽश्रमिताऽमरद्रुमसुमं, सौरभ्यसंराजितम् ॥ ४

पू. पण्डितश्रीसुन्दरगणिविरचिता

(१४) (शार्दुलविक्रीडित)

नित्यानन्दमयं स्तुवे तमनघं, श्रीनाभिसूनुं जिनम्,
विश्वेशं कलयामलं परमहं, मोदात्तमस्तापदम् ।
नित्यं सुन्दरभावभावितधियो, ध्यायन्ति यं योगिनो,
विश्वेऽशङ्कलयामलं परमहं, मोदात्तमस्तापदम् ॥ १

ते यच्छन्तु जिनेश्वराः शिवसुखं, त्रैलोक्यवन्द्यक्रमाः,
ये भव्यक्रमहारिणोऽसमयशोभावर्द्धनाः कामदाः ।
तन्वानानवमङ्गलान्यनवमाः, श्रीसङ्घलोके सदा,
ये भव्यक्रमहारिणोऽसमयशोभा वर्द्धनाः कामदाः ॥ २

श्रीसार्व्वप्रभवा भवस्य विभवद्धावारिभेदे भृशम्,
गीर्बा(र्वा?)णप्रखराऽसतां प्रतनुता मत्यन्त कामा सुहृत् ।
पापव्यापहरा धुताऽधिनिकरा, सन्द्धीकराऽमोदिताद्-
गीर्वाण प्रखरा सतां प्रतनुता,-मत्यन्तकाऽमासुहृत् ॥ ३

देयाच्छं श्रुतदेवता भगवती, सा हंसयानासना,
नालीकालयशालिनी तिकलितापाऽयाऽपहारक्षमा ।
धत्ते पुस्तकमुत्तमन्निजकरे, या गौरदेहासदा,
नाऽली कालयशालि नीति,-कलिताऽपायापहारक्षमा ॥ ४

(१५) (कामक्रीडा)

उद्यत्सारं शोभागारं पुण्याधारं श्रीसारं,
श्रेयस्कारं नित्योदारं कान्ताकारं निर्मारम् ।
प्रेक्षावन्तं वन्देऽहं तं प्रोद्यद्दन्तं श्रीमन्तं,
रम्भागेयो मोहाजेयो बुद्धयाध्येयो नाभेयः ॥ १

सेव्यं व्यक्ते नित्यासक्ते श्रद्धायुक्ते सद्भक्तैः,
ज्योतिस्तारं चर्चाचारं सद्योदारं दातारम् ।
सार्वव्रातं व्यस्तासातं बुद्ध्याध्यातं विख्यातं,
विद्यावृन्दं वन्देऽमन्दं सम्पत्कन्दं सानन्दम् ॥ २

स्तोष्येऽहं सन्तापध्वंसं स्फूर्जच्छंसं सिद्धं तं,
नित्याह्लादं शान्तोन्मादं सद्विद्यादं सद्वादम् ।

श्रीसिद्धान्तं स्पष्टीमन्तं कामं कान्तं कामान्तं,
भव्यैर्ध्येयं जालामेयं ज्ञानादेयं माहेयम् ॥ ३

चक्रेश्वर्या चञ्चच्चर्या रोचिर्वर्या सत्कार्या,
जैनाद्विष्टा नष्टारिष्टा सर्वोत्कृष्टा स्वर्ज्येष्ठा ।
शोभासारा सालङ्कारा रम्याहारा गीस्तारा,
सङ्घस्फारा-जेयादारा दृप्यत्तारा भूत्यै स्तात् ॥ ४

(१६) (कामक्रीडा) सर्वगुरूअक्षरा

संसाराम्भोधौ कामक्रीडा-कल्लोल-व्यग्राणां
जन्तूनां पोतप्रायं गाङ्गेयौपम्याङ्गच्छायम् ।
रागादिव्यालौघानां सौपर्णेयं योगिध्येयं
श्रद्धाशाल्याऽऽराध्येयं तीर्थेशं श्रीमन्नाभेयम् ॥ १

उर्ध्वाधस्तिर्यल्लोकेष्वर्हद्गेहाः सङ्ख्यार्हा ये,
नित्या अष्टौ कोटयो लक्षाणां सप्ताद्याः पञ्चाशत् ।
त्रिः षट्कोनं षट्शत्यर्धं चैत्यत्रासङ्ख्याता ये
ये चेहानित्यास्तेषु स्तौम्यश्रान्तं बिम्बस्तोमम् ॥ २

शीर्षे संयोज्य स्वौ पाणी श्रुत्वा सम्यग् यां क्षोणी-
ख्यातश्लोकस्त्यक्त्वा वाणीभर्तृत्वेपीहाम्प्राणी ।
सौख्यान्यक्षामाणीच्छेदर्हद्वक्त्रोत्था सा वाणी
निर्वाणौको निःश्रेणिर्मे(द्राग्)नन्द्याच्छ्रेयः श्रेणीः ॥ ३

आविर्भूतश्रेयोदोहं मुक्त्वा विश्वव्यामोहं
या अङ्गीचक्रुः सेहं जैनं वाक्यं निः सन्देहम् ।
ताः श्लाघेऽहं रोहिण्याद्या विद्यादेवीः श्रीगेहं,
बिभ्राणा देहं कुर्वाणाः सङ्घे प्रत्यूहाऽपोहम् ॥ ४

(१७) (कामक्रीडा)

श्रीनाभेयं योगिध्येयं देहज्योतिःसारङ्गं,
सर्वश्रेयः श्रेयः पद्यागत्यामाद्यत्सारङ्गम् ।
कर्मक्षोणीजन्मश्रेणीश्रेणीध्वंसे सारङ्गं,
नौम्युत्कण्ठाव्याप्तस्वान्तः सौवस्थाम्ना सारङ्गम् ॥ १

अर्हद्वृन्दं क्लृप्ताऽऽनन्दं चञ्चच्चक्षुः सारङ्गं,
विश्वाऽसत्यव्याधाऽऽदित्यच्छायाभेदे सारङ्गम् ।
क्षामाऽक्षेमं दक्षक्षोणीकौमुद्यामुत्सारङ्गं,
श्रेयोस्त्याः कण्ठाश्लेषे स्तोष्ये नन्दत्सारङ्गम् ॥ २

स्तौम्यध्वान्तं ध्वस्तध्वान्तं श्रीसिद्धान्तं सारङ्गं,
भव्याम्भोजेष्वाविर्भूताऽऽनन्दाऽम्भोरुट् सारङ्गम् ।
अज्ञानाऽऽलीपाथोदालीशत्या दृप्यत्सारङ्गं,
वन्दारूणां भीदारूणां वक्षोवृक्षे सारङ्गम् ॥ ३

जैनाऽध्यक्षं दक्षं यक्षं सुष्ठुच्छायासारङ्गं,
सौव्या वाण्या गाम्भीर्येण ध्वस्तोद्गर्जत्सारङ्गम् ।
अर्हत्सर्पद्वाक्योद्गर्जत्पर्जन्याऽम्भः सारङ्गं,
वन्दे व्रीडाकामक्रीडाकासारश्रीसारङ्गम् ॥ ४

(१८) (मत्तमयूर)

आद्यंदेवं ज्ञानमहान्तं भगवन्तं,
शान्ताकारं योगविलासं जननाथम् ।
नाभेः पुत्रं श्रीविनीतेशं सुरवन्द्यं,
वन्दे देवं श्रीजगदीशं भगवन्तम् ॥ १

तीर्थाधीशं ज्ञानविकाशं जिनदेवं,
दीनोद्धारं काञ्चनवर्णं वृषभाख्यम् ।

सम्यक्मूर्तिं कर्मविमुक्तं मुनिनाथं,
वन्दे देवं श्रीजगदीशं भगवन्तम् ॥ २

वाण्या प्रोक्तं श्रीगणनाथैः श्रुतयानं,
कर्णाधारं स्वागमसारं सुखकारम् ।
आत्मज्ञानं शुद्धसरूपं विनिरुक्तं,
वन्दे देवं श्रीजगदीशं भगवन्तम् ॥ ३

चक्रेश्वर्या निर्वृतिदात्री कमलाक्षी,
सम्यग्दृष्टे विघ्नविहन्त्री, सुरसेव्या ।
सिंहारूढा सा भुवि सिद्धा पाणिपाशा
वन्दे देवं श्रीजगदीशं भगवन्तम् ॥ ४

पू.मु.श्री लक्ष्मीविजयविरचिता

(१९) (द्रुतविलम्बित)

विदितकेवललोकहिताहितं नरसुरासुरवृन्दनिषेवितम् ।
भविकजीवसमूहशुभावहं प्रथममादिजिनं प्रणमाम्यहम् ॥ १

जिनवरा भवभीतिहरा वरा, निखिलनिर्मलसाधुगुणाकरा ।
कठिनकर्मविपाकविनाशनाः,
भुवि शिवाय भवन्तु जिताशनाः ॥ २

जिनमुखोद्गतमन्वयकन्दलं सुजनसेवितमाहितमङ्गलम् ।
हतकुतर्कमदं विधुताधमं गतमलं ननु नौमि जिनागमम् ॥ ३

नतनरप्रकरक्रमपङ्कजः समितसङ्घसमस्तविपद्व्रजः ।
दिशतु सर्वसुखं मम गोमुखः स हि रमाविजयस्य सम्मुखः ॥४

(२०) (द्रुतविलम्बित)

जय युगादियुगादिविधायक शुभमतस्य मतस्य चराचरैः ।
मुखदनाभिज नाभिजने रत सुपुरुषाऽपरुषामरवन्दित ॥ १

जिनवरा नवरागविकालकाः प्रशमकाः शमकार्मुकधारकाः ।
हिमकरा मकरा इव दर्शकाः शिवरमावदनं वदनं विदा ॥ २

वितरतां तरतां भवसागरं सुमनसां मनसां मलमुत्सृजाम् ।
जिनवचः सुवचःसुनिवेदितं भवहितं विहितं शुभकर्मभिः ॥३

दिशतु गोमुख गोमुखमण्डन क्षिपतु यक्षपते मम पातकम् ।
जिनमतं नमतं कुमतिजनै-
र्विकलिभिः कलिभीतिभिरङ्कितैः ॥ ४

(२१) (स्रग्धरा)

दन्तश्रेणीप्रभाऽधःकृतकुमुदहसत्क्षीरवच्चन्द्र चन्द्रः,
स श्रीमानादिनाथः प्रभवतु भविनां भावुकाय प्रकामम् ।
यस्य व्याख्यानकाले किरति सुरगणः पुष्पवृष्टिं विचित्रा-
मामूलालोलधूलिबहुलपरिमलालीढलोलालिमाला ॥ १

प्रोद्यद्गम्भीरकायप्रतिजितसलिलाम्भोधरे हारहीर-
तारस्काराब्जरोचिस्सुयशसि भवति प्रोल्लसच्चक्षुषी मे ।
दृष्टे नायाति शोको वृषभजिनपते गन्धमालोलभृङ्ग-
झङ्कारारावसारा - मलदलकमलागारभूमी - निवासे ॥ २

संसारापारपाथोनिधिपुलिनमहो प्राप्तुकामा यदि स्युः
श्रीमत्तीर्थाधिकर्तुः क्रमणकजयुगं तस्य संसेवमानाः ।

गात्रे यस्य प्रवेशं वरगुणततयश्चक्रिरे विश्वपूज्ये
च्छायासम्भारसारे वरकमलकरे तारहाराभिरामे ॥ ३

श्रीमत्तीर्थाधिनाथाननवरकमलावासिनि प्राज्ञचेतो-
ऽभीष्टे डिण्डीरपिण्डोज्ज्वलतनुलतिके देवदेवीस्तुताङ्घ्रे ।
नम्रीभूतेन्द्रमाले ! विहितसुखशते ! पूर्णचन्द्रैकवक्त्रे !
वाणीसन्दोहदेहे भवविरहवरं देहि मे देवि सारम् ॥ ४

पू.मु.श्री धर्मकीर्तिविजयविरचिता

(२२) (उपजातिः)

सज्ज्ञानलक्ष्म्याः सुनिवेशनार्थं,
सन्मण्डपत्याशु स(सुष?)माऽऽगमोत्था (?) ।
लसद्यदंसोपरि केशवल्ली, सदा मुदे वः स युगादिदेवः ॥ १

त्रैलोक्यलक्ष्म्या वृतये स्वयं या, सन्मण्डपत्यार्हतचैत्यराजी (?) ।
साऽनित्यनित्या नमतां नृणां स्या-
दनित्यनित्याय सुखाय नित्यम् ॥ २

सत्तीर्थलक्ष्म्या वसतौ हि रङ्गात्,
श्रीमण्डपत्यास्तृतसूत्रितं यत् । (?)
तदस्तु मे जैनीवचः प्रपञ्चि, सुवाचनं प्रावचनं सुवाच्यम् ॥ ३

श्रीसङ्घलक्ष्म्या सुचिरं सदा ये, सुमण्डपन्तीह सुरासुरिभिः (?)।
सङ्ख्यावृतव्यावृतभावभावाः, सुदृष्टयः सन्तु सुदृष्टये ते ॥४

## पू.मु.श्री हंसविजयविरचिता

### (२३) (उपजातिः)

श्रीनाभिसूनो वस सिद्धिपूर्यां, निःशेषशर्मावलिपूरितायाम् ।
दुष्टाष्टकर्माऽवनिभृद्विनाश-सुधाऽशनाधीश्वरसिद्धिदाता ॥ १

समस्ततीर्थप्रभवः प्रकृष्टं प्रभावयुक्ता ददतां सतां शम् ।
सुखप्रभावाधितशीतपादाः, समर्त्यशक्रालिनिषेव्यमाणाः ॥ २

राद्धान्त एष प्रकरोतु सिद्धिं, क्षीणाऽष्टकर्माऽऽननपद्मजातः ।
निर्देशतस्तीर्थकृतां गणेशाः सूत्रं यदीयं रचयाम्बभूवुः ॥ ३

चक्रेश्वरी सा मम मङ्गलाऽऽली-महर्निशं मङ्क्षु सुरी तनोतु ।
सूरीश्वराऽऽनन्दगुरोर्गणे या, समीहितं राति सुहंसवाणी ॥ ४

### (२४) (इन्द्रवज्रा) संसारदावा-पादपूर्त्तिः

श्रीआदिनाथं नतनाकिनाथं लक्ष्मीसनाथं कृतपापमाथम् ।
संवेगतान्यत्कृत हेमहीरं संसारदावानलदाहनीरम् ॥ १

निर्वाणयोषिद्वनबद्धरागं, स श्रीकलालंगह शाखिनागम् ।
संस्तौमि सन्नाशितकर्मवीरं, संमोहधूलीहरणे समीरम् ॥ २

विसारदोन्दीत गुणत्यतान-मीडे वृषाङ्कं विगताऽभिमानम् ।
सद्ब्रह्मशस्त्रायहता शरीरं, मायारसादारणसारसीरम् ॥ ३

कल्याणकं दोध्यकदं कल्पं, सद्वाञ्छितौर्थकविधानकल्पम् ।
आदिप्रभुं पुण्यशमाम्रकीरं, नमामि वीरं गिरिसारधीरम् ॥ ४

### (२५) (आर्या)

प्रणतसुरासुरमौलिप्रदेशपरिगलितं कुसुमकृतपूजम् ।
मायामत्सररहितं प्रणमत तीर्थेश्वरं प्रथमम् ॥ १

सुरगिरि शिखरे स्नापिताः क्षीरोदजलेन सुरेन्द्रेण ।
ऋषभादिवीरचरमा, जयन्ति ते जिनवराः सर्वे ॥ २

मिथ्यात्वतिमिरदलनं, भुवनोदरविवरदर्शितपदार्थम् ।
बोधितभव्यजलरुहं, जिनेन्द्रमतदिनकरं नमत ॥ ३

निजकरतलकृतचक्रा, दर्पोद्धतवैरिदर्पनिर्दलना ।
अपहरतु दुरितजालं, नित्यं चक्रेश्वरी देवी ॥ ४

(२६)

समग्रशीतद्युतिसन्निभाननं
सदंय (?ग) तारंकमनःप्रसाधनम् ।
स्तवीमि तं श्रीजिननाभिनन्दनं
सदङ्गतारङ्ककमनःप्रसाधनम् ॥ १

जयन्तु ते तीर्थकरा नतामराः
विलासमाना करणावलायताः ।
तमोपहाये दिनपा इवावना
विलासमाना करणावलायताः ॥ २

सज्ञानभाजां भविनां शिवश्रियां
कल्याणतालङ्करणं महामितम् ।
जैनागमं साधुगणैरुपासितं
कल्याणतालङ्करणं महामितम् ॥ ३

तमाश्रये गोमुखज(य) क्षनामकं
समस्तवैरञ्जितपुण्यनामकम् ।

श्रीशासनस्थाङ्गि सुखप्रदायकं
समस्तवैरञ्जितपुण्यनायकम् ॥ ४

(२७)

त्रिभुवनजिनतातं स्फीतकीर्त्या(ऽ)वदातं
विद्यु(धु)तकुगतिपातं दत्तनिर्वाणज्ञातम् ।
मलजलधरवातं तं युगादौ विभातं
हिमसितगुणजातं संस्तुवे नाभिजातम् ॥ १

कृतविषमविषादा दुन्दुभिध्वाननादा-
प्रदितमदनसादा न्यक्कृतैकान्तवादा
हरिहयनतघादा धौतविश्वप्रमादा ।
प्रतिहतिपरिवादाः स्फू(स्यु)र्जिनाः सप्रसादाः ॥ २

अरतिखनिखनित्रं कर्मतृण्यालवित्रम् ।
प्रकटितसुचरित्रं प्राणभाजां पवित्रम् ।
भवजलधिवहित्रं जीवराजीवमित्रं
श्रयत परममित्रं शासनं विश्वचित्रम् ॥ ३

उपकृतिकृतकक्षः श्ल(श्लि)ष्टवैधुर्यकक्षः
परिमलितविपक्षः शासनार्थेषु दक्षः
निचितसुकृतलक्षः प्रीतिसंफुल्लदक्षः
श्रियमधिकृतरक्षः यातु सिद्धान्तपक्षः ॥ ४

(२८) (अनुष्टुप्)

युगादिपुरुषेन्द्राय, युगादिस्थितिहेतवे ! ।
युगादिशुद्धधर्माय, युगादिमुनये नमः ॥ १

ऋषभाद् वर्द्धमानान्ता, जिनेन्द्रा दश पञ्च च ।
त्रिकवर्गसमायुक्ता दिशन्तु परमां गतिम् ॥ २

जयति जिनोक्तो धर्मः, षड्जीवनिकायवत्सलो नित्यम् ।
चूडामणिरिव लोके, विभाति यः सर्वधर्माणाम् ॥(आर्या) ३

सा नो भवतु सुप्रीता, निर्द्धूतकनकप्रभा ।
मृगेन्द्रवाहना नित्यं, कूष्माण्डी कमलेक्षणा ॥ ४

पू. पण्डितश्रीहेमविजयगणिविरचिता

(२९) (अनुष्टुप्)

विभूतेरतिगम्भीर नाभेयममतावकम् ।
हेतुर्भूयात्पदद्वन्द्वं नाभेय मम तावकम् ॥ १

नाभेयादिजिनेन्द्राणां राजीव रजनिप्रभा ।
श्रियं पुष्णातु संसार-राजीव रजनिप्रभा ॥ २

प्राणिनः पाति यो जैनः समयो दितविभ्रमः ।
स्तुतये भक्तिभुग्नेन समयोदितविभ्रमः ॥ ३

वीर्थीं भिनत्तु विघ्नानां करालाञ्छितविग्रहा ।
सतां चक्रेश्वरी चक्र-धराऽलाञ्छितविग्रहा ॥ ४

पू.आ.श्री गुणसागरसूरिविरचिता

(३०)

तीर्थपं प्रथमं सार्वं, सर्वापायनिवारकम् ।
नाभेयं नतदेवेन्द्रं, नमामि मारवारकम् ॥ १

भवाब्धितारणे यानकल्पांस्तीर्णभवाम्बुधीन् ।
वीतरागान् हतक्रोधमानादीन्प्रणमाम्यहम् ॥ २

मोहान्धकारसूर्या या वाणी श्रीप्रथमप्रभोः ।
मदीयहृदये वासं करोतु पापनाशिनी ॥ ३

सार्वशासनभक्तानां विघ्नकोटिनिवारके ।
गुणप्राप्तौ सहायं त्वं चक्रेश्वरि ! प्रदेहि मे ॥ ४

(३१)

श्रीनाभेयःप्रदीपःसुचि रुचिर रुचिःसर्वदा सद्दशाढ्यः
सस्नेहो ध्वान्तहर्ता जनजनितसुखः कामितार्थप्रदाता ।
पूज्यःक्ष्मापालमुख्यैरिह सकलजनैर्मङ्गलानां निवासः
सत्पात्राधारभूतस्त्रिभुवनभुवने दीप्यमानः श्रियेस्तात् ॥ १

(स्रग्धरा)

अश्रांतं विधृतानि पञ्च नियतं त्यक्तानि पञ्चौजसा
धैर्यात्पच जितानि पञ्चभुवने यैर्भूषया मासिरे ।
अष्टानां रिपवोष्टभिर्विरहिता भान्तोष्टभिश्चाष्टभि
र्युक्तास्तेप्यजितादिका जिनवराः कुर्वन्तु सौख्यं सताम् ॥ २

(शार्दूलविक्रीडित)

सर्वाशावदनं मरीचिनिचयै-रुद्योतयन् संततं
सद्वृत्तः सुतरां तमोपहरणे दक्षःसतां सम्मतः ।
दोषोच्छेदकरः समस्तजनता नेत्राब्जसंजीवनं
श्रीवीरो दिवसेश्वरो विजयतां चित्रं न चण्डःक्वचित् ॥ ३

(शार्दूलविक्रीडित)

पाथोदः पङ्कहेतुर्निधिरपि पयसां सर्वतः क्षारखानि
स्तिग्मांशुश्चण्डरोची रजनिपरिवृढो जाड्यपात्रं नितान्तम् ।
देवाद्रिः कूटगेहं सुरतरुनिकरः स्थावरत्वेन दुष्टः
स्वामी श्रीगौतमस्तन्निखिल गुणनिधिः कीर्त्यते केन तुल्यः ॥४

(स्रग्धरा)

पू.मु.श्री कमलविजयकृता

(३२)

जिनशासनभासनभासुरभानु समान ! ॥ १
सुरसुन्दरसेवित ! वृषभ ! जिनौघप्रधान ! ॥ २
परमागमसम्मतनयधनरत्ननिधान ! ॥ ३
श्रेयःश्रियमर्पय कमलविजयप्रियदान ! ॥ ४

(३३) (अत्युक्ताजातौ स्त्रीछन्दः)

नौम्यादीशं कर्मोन्मुक्तम् ॥ १
सर्वज्ञा वो मुक्तिं रान्तु ॥ २
जैनं सूक्तं तक्ष्यात् कर्म ॥ ३
गोवक्त्रो वः श्रीभ्यो भूयात् ॥ ४

(३४) (द्रुतविलम्बित)

वृषभ ! बुद्धिनिधे ! जय सद्यशाः,
विजयलक्ष्मी-करोत्तम ! देहिनाम् ।
जिनवर-प्रकर ! प्रथितागम !,
त्रिदशनायकसंश्रित-वत्सल ! ॥ १

(चतुर्शः उच्यते)

नमत कनकरुचिमविरलगुणशुचिप्सहितमुपशमभरभरितं,
मनुजदनुजसुरपरिकरपरिवृतममलवरणं विदितचरितम् ।
वृषभ-मृषभ-जिनपति-मति-निज-
मति-जितसुर-गुरु मशरणशरणं,
दुरितनिकरहरममृतजसुखकरमवनतजनभवभयहरणम् ॥ १

वितत-नियत-घर-सकल-भविक-गण-
पृथु-भवजल-निधि-वहनसमाः,
प्रसृमरदृढतर-कुमत-तिमिर-भर-
मथन-विजित-दिनकरसुषमाः ।
बहु-मुनिजन-हृदय नयन-कुमुद-
मद-करण-रजनिपति सदृश-जिनाः,
प्रददतु सुविपुलमभिमत-मभिनवमतुल-
कुशलमपगत-वृजिनाः ॥ २

जिन-वर-वर-मुखभणितमचल-सुखकरणमसम-गणधर-
निचितं निकट-कपट-कुट-विकट-लकुट-
समम-शुभ-हरण मुरुगम-निचितम् ।
विषय-विषम-विषधर-विषहर-वर-मणि-तुलमघतरुततिदहनं,
दिशतु परम-पद-मपहृतजनन-गद-
जरण-मृतिम-पचित-भवगहनम् ॥ ३

हिमगिरि-हरि-करि-रजत-रजनिकर-किरण-हसित-सम-
विमलथनाऽभिलषित-कृति-पटुजिन-पति-
पदयुगनति-करण-वितरित-सुकृतधना ।

जनचय-कृत-मद-विशद-जिनपमतपरसुरभर-विरचित-
दमना-
वितरतु मम सुखरूपपद-पदगति-
लघु-कृत-गजसुर-गजगमना ॥ ४

पू.पं.श्री उदयधर्मगणिकृता

(३६) (उद्दामदण्डक)

प्रमुखसुखनिदर्शनं दर्शनंदर्शनन्दादिनाग्रेसरद्वासरप्रोदिता
तोदितामोदिताशेषपुंकौमुदीकान्त कान्तस्य ते,
वृषभजिन ! निरर्गलालोकलोकालिकालच्छवीमत्कुवेलाविला-
ज्ञानभानप्रमीलाकुवेलावहेलामहेलालसं नालसम् ।
लसदसमरसेनसेनारसेनासुराभासुरावासुराबालबाला
अबालाश्च बालाः स्ववालादिभूषादिकृत्यत्यजिप्रत्यला,
विदधति रतिकारणं प्रक्षरत्कारणं सम्पदाकारणं तामसावारणं
व्यापदां वारणं सर्वसाधारणं सातनिर्द्धारणम् ॥ १

जनितमनितसङ्गमाजङ्गमारङ्गमाला इवोद्धङ्गमारास्तथा तुङ्गमा-
रातिजातिस्मयं दुर्जयं नाशयन्तो भवद्विस्मयं,
स्फुरदतिशयसञ्चयं तीर्थकृत्त्वोदयं लाभलक्ष्म्यालयं
भूतभूताभयं सर्वदेवव्रजर्द्ध्युच्चयं तर्जयन्तः श्रयन्तः स्वयम् ।
नवतरुतरुणारुणादारुणा भारुणाश्माञ्जनादय गाङ्गेयखर्जूर-
कर्पूरपूरोपमानाऽसमानाद्भुतस्फूर्त्तिमूर्त्तिप्रभा,
भवभयभरभेदकाः सन्तु ते मेदका म्लानविद्वेदकाः क्षीण-
तद्वेदकाः सर्वथा भेदनिर्वेदकाः सर्वसंवेदकाः सत्सभाः ॥ २

अतिमतियतिपुङ्गवैस्तुङ्गवैरङ्गिकैरङ्गिकैवल्यकल्याण-
कल्पत्वदैः शल्यचापल्यवैकल्यदैर्यो विधेः सङ्गते धीयते,
सहृदयहृदयोल्लसद्धर्म्यहर्म्येचयः शास्त्रतात्पर्यवर्यार्थसार्थैः
कृतार्थीकृतेररोचिरप्रत्नरत्नोज्ज्वलागाररत्नायते ।
विषयविषगूढपात् क्ष्वेडमूर्त्तात्मनां मूर्त्तिमद् धर्मधीचेतना
वालनाज्जाङ्गुलीविद्यया विद्यते विद्यमानोपमानश्चयः,
स च जिनसमयो मयोद्गीयते नित्यमादीयते चित्र आधी (पी)-
यते साधवे दीयते वृद्धिमानीयते हीयते नो न तत् क्षीयते ॥ ३

दलयतु दुरिताभितापप्रपन्नं विपन्नत्वदौस्थ्यं महद्दुःखदुस्थान-
दुर्मानदुर्ध्यानदुर्गतसम्बाधजाबाधसंसाधनं,
कलयतु कुशलावलीसत्प्रणालीसमालीनचेतस्कसंलीनता-
घानवाः पानदानात् समाधानजध्यानसन्धातुसालेन्धनम्
मम समदमनोज्ञमेधाविस्तुता शक्रचक्रेश्वरीभूतिभूतिस्थित-
विश्रुता शीघ्रभाविश्रुतार्थाव्ययार्था सुधार्थार्थिभिः संस्तुता,
विधुतविधुतरस्वितेजस्विताभावलावण्यधर्मानमासौ
वसन्मानसाद्दत्तमत्ताखिलस्वान्तकामा च चक्रेश्वरीदेवता ॥ ४

पू.मु.श्री गुणविजयगणि विरचिता

(३७) (उपजाति)

भावानयानेगनरिंदविंदं, सव्विंदसंपुज्जपयारविंदं ।
वन्दे जसो निज्जियचारुचंदं, कल्लाणकंदं पढमं जिणिंदं ॥ १

चित्तेगहारं रिउदप्पदारं, दुक्खग्गिवारं समसुक्खकारं ।
तित्थेसरा दिंतु सया निवारं, अपारसंसारसमुद्दपारं ॥ २

अन्नाणसत्तुक्खलणे सुवप्पं, सन्नायसंहीलियकोहदप्पं ।
संसेमि सिद्धंतमहो अणप्पं, निव्वाणमग्गे वरजाणकप्पं ॥ ३

*हंसाधिरूढा वरदानधन्ना, वाएसरी नाणगुणोववण्णा ।*
निच्चं पि अम्हे हवउ प्पसन्ना, कुंदिंदुगोक्खीरतुसारवन्ना ॥ ४

(३८) (तोटक)

वरमुत्तियहारसुतारगणं, परचित्तकलत्त-सपत्तधणं ।
पयपंकज-छप्पय-देवगणं, श्रीअब्बुय वंदुं आदिजिणं ॥ १

तियलोय-नमंसियपायजुआ, घणमोहमहीरुहमुत्तिगया ।
परिपालिअ-निच्चल जीवदया,
मम हुंतु जिणागम-सुक्खसया ॥ २

पणयंगि-महातम-रोरहरं, कल्लाणपयोरुहवुड्ढिकरं ।
सुहमग्गकुमग्गपयासकरं, पणमामि जिणागममन्हिकरं ॥ ३

सिरिइंदसमुज्जलगायलया, सुहज्झाण-विणम्मिय-एगलया ।
असुरिंदसुरेंदसुरप्पयया, मम वाणि सुहाणि कुणेसु रुया ॥ ४

(३९) (मालिनी)

पढम पय निविट्ढं ताण तित्थं गरिट्ठं
अइसय गुण जिट्ठं सिद्ध चक्के सुजिट्ठं ।
गुणमणिगणगेहं जच्चसोवन्न-देहं
दहध्वनवमेहं आदितित्थं नमेहं ॥ १

भविअजण विबोहा निज्जियामाण मोहा
कयसिव परिसोहा अंतरंगारि जोहा ।

मयण सिरिय विद्धा तित्थनाथा विसुद्धा
सयसविपडिबुद्धा दिंतु सुक्खं समिद्धा ॥ २

घणतिमिरविणासं चत्तसंसारपासं
विहिअनरयतासं रागदोसस्स नासं ।
भवजलनिहिजाणं जंतु-संताण-घोरं
पणमहसु असारं मुक्ख-सुक्खाण दारं ॥ ३

रिसह चरणरत्तता बाहुजुत्ता सुजुत्ता
पवयण-अणुरत्ता संघ-कज्जे निरत्ता ।
विमल मय किरीया भूरिविग्घं हरीया
जयतु जगगिरीया देवी चक्केसरीया ॥ ४

२

# ॥ श्रीअजितजिनस्तुतयः ॥

पू.मु.श्री हंसविजयविरचिता

(१) (उपजातिः)

नमाम्यहं श्रीविजयाङ्गजातं, समीहितोत्सर्जनपारिजातम् ।
उन्निद्रहेमाम्बुजचारुकान्तिं, सौवाननश्रीजितशुभ्रकान्तिम् ॥ १

तमाप्तसङ्घातमहं वहामि, श्रीखण्डकाश्मीरजपुष्पमुख्यैः ।
प्रचण्डमार्तण्डविमानकान्ति यद्धर्मचक्रं गगने चचाल ॥ २

श्रीद्वादशाङ्गीत्रिदशापगा या, सर्वज्ञगौरीजनके प्रशस्ता ।
मुखाब्जशोणात्प्रससार विश्वे, निःसृत्य सा कर्ममलं जहातु ॥३

श्रीरोहिणी सा विदधातु भद्रं, शरीररोचिर्जितरोहिणीशा ।
सद्रोहिणीनन्दनगौरकीर्तिः, संरोहिणी सर्वतमोभरेषु ॥ ४

(२) (वसन्ततिलका)

कल्याण-मन्दिर-मुदारमवद्य-भेदि-
पादद्वयं तव नमामि जिनेश्वराहम् ।
*सर्वार्थसाधक ! मुदा विजयाङ्गजात !,*
त्रातस् त्रिविष्टप-भवाधिमयादितापात् ॥ १

आप्तौघ ! तावकमिदं भविनः प्रसूनैः,
भीताभयप्रदमनिन्दितमङ्घ्रिपद्मम् ।
अभ्यर्च्य निर्वृतिपदं नियतं गुणज्ञाः
सौख्येन पावनमलं विमलाः श्रयन्ति ॥ २

यस्मिन् प्रभाकरसमानविशालतेजाः
विश्वप्रभो ! जयतु ते कथिता प्रसिद्धा ।
संसारसागरनिमज्जदशेषजन्तु-
त्राण ! त्वया स्वसमये प्रवराङ्गिरक्षा ॥ ३

जीयात्सदाऽजितबला सुरसेविता सा,
सौख्यश्रियं वितनुते भविनः पदे (दं ?)या ।
संसारवारिधिपतज्जनसंततीनां,
पोतायमानमभिनम्य जिनेश्वरस्य ॥ ४

पू.उपा.श्रीवल्लभगणिविरचिता

(३)

तीर्थसन्नायकं सिद्धितादायकं,
सिद्धितादायकं तीर्थसन्नायकम् ।
संस्तुतानाम यं सत्त्वमाराजितं,
सत्त्वमाराजि तं संस्तुतानाम यम् ॥ १

विश्वतीर्थाधिपा भव्यदायक्रमा
विश्वतीर्थाधिपा भव्यदायक्रमाः ।
मानिताहारिणः सत्त्वमाबिभ्रतां
मानिताहारिणः सत्त्वमा बिभ्रताम् ॥ २

सत्क्रिया दं चितं साधुवर्णक्रमं,
साधुवर्णक्रमं सत्क्रियादञ्चितम् ।
निर्जरानन्दनं सर्वदाशासनं
सर्वदाऽशासनं निर्जरानन्दनम् ॥ ३

कामदाऽनक्षमाऽकामदाऽऽनक्षमा,
नव्यपद्मासना नव्यपद्मासना ।

देवताऽवोदितादेव तावोदिता
साऽमला भारती सामला भारती ॥ ४

(४)

## पू.पं. श्री सुन्दरमुनिविरचिता

[उपेन्द्रवज्रा]

जितारिजातं नमतां हरन्तं, स्मराऽजितं मानवमोहरागम् ।
जयत्यलं यो यशसो-ज्वलेन, स्मराऽजितं माऽनवमो हरागम्॥१

जिना जयं ते त्रिजगन्नमस्या, दिशन्तु मे शंसितपुण्यभेदाः ।
यद्वाग् विधत्तेऽत्त नर जितोरू, दिशं तु मेशं सितपुण्य भे-दाः॥२

जिनागमानन्दितसत्त्व स त्वं दिशाऽनि शं कल्पितं कन्दलालम्।
कृपालता येन कृता त्वयाऽपृदिशाऽनिशं कल्पितकन्दलालऽम्॥३

पविं दधानाच्छविभाविताशं, सा मानसी मा मवता-त्तताशा ।
या स्तूयतेऽलं सुदृशा विशासत् सा मानसीमाऽमवतात्तताशा॥४

(५)

जिनवरमजितं स्तुवे मुदाऽहं, त्रिभुवनपालकमद्वितीयकीर्तिम् ।
विदित-निखिल-भाव-निर्जिताऽक्षं,
क्षपितदुरन्तदुराधिकर्मजालम् ॥ १

स्तुत जिननिकरं तमाप्तमीशं, सुरगणवन्दितपादपद्मयुग्मम् ।
विजितरति यति प्रकाम वेगं, विधुरित मोहमदाऽभिमान सेनम्॥२

स्मरत जिनवरोदितं प्रकामं, प्रवचनमुत्तमतत्त्ववारिराशिम् ।
सकलजनहिताय शस्तुमेतत् प्रथिता भुवनेषु शुद्धभावाः ! ॥३

हरतु विविधमानसीं प्रपीडां, कनकविभासम देहमानसीयम् ।
वरदपविकरा प्रभावयित्री, शुचिवसना च मरालवाहनरथा ॥४

पू.मु.श्री गुणविजयविरचिता

(६)

तारंगे तिलकं गिरौ क्षतरिपुं हेतुं मुदा सन्नृणाम्
संसेव्यं त्रिदशैः प्रलूनकलुषं संसेव्यसेव्यं सदा ।
मिथ्यात्वाचलघातवज्रसदृशं मन्दारतुल्यं खलु
भक्त्या नौमि सदा त्रिधाऽजितजिनं संसारयातुद्विषम् ॥ १

मिथ्यात्वक्षणदापतंगसदृशास्तीर्थेश्वरा हर्षदा
छिन्नज्ञानतमाः प्रमादविकला मुक्त्यङ्गना स्वामिनः ।
ये मेरौ स्नपिता मुदा हरिहयैर्भक्त्या भृतैः शैशवे
ते वः पान्तु सदा मनोज्ञवचसः सच्छान्तमुद्राङ्किताः ॥ २

जैनेन्द्रागमसागरं सुखकरं नृणामबोधापहम्
विश्वद्रव्यचयप्रकाशनिपुणं संसेवितं योगिभिः ।
सर्वार्हद्वदनात्सुरेन्द्रविबुधैराकर्णितं सन्ततं
भक्त्या तं सततं स्तुवे सुविपुलं सद्बोधसंप्रापणम् ॥ ३

चक्राङ्गार्जुनविग्रहा सुरुचिरा गोवाहना शर्मदा
श्रीदेवी निवहग्रिमा विपुलदोःसेव्याजिताख्येष्टदा ।
सेव्यार्हज्जिनभक्तिशिक्षितमना देवी सुरूपाग्रणीः
सा पायाद् भविकान् सदा भवदवात् सेव्यांघ्रिपद्मा नरैः ॥ ४

## पू.आ.श्री गुणसागरसूरिविरचिता

(७)

जितमोहमहारातिरजितोऽन्यकुवादिभिः ।
प्रददात्वजितस्वामी मह्यं मोक्षमनन्तशम् ॥ १

दत्त्वा सांवत्सरं दानं हत्वा कर्मचतुष्टम् ।
ये प्राप्नुवन्ति कैवल्यं ते जिनाः शरणं मम ॥ २

मिथ्यात्वतिमिरघ्ना या श्रुतज्ञानप्रकाशदा ।
अजितस्वामिनो वाणी हृदि सा वसतात् सदा ॥ ३

अजितप्रभुसेवायां रक्ताऽजितबलामरी ।
गुणवृद्ध्या सहायं मे तनोतु जितशत्रुका ॥ ४

३

## ॥ श्रीशम्भवजिनस्तुतयः ॥

पू.मु.श्री हंसविजयविरचिता

(१) (उपजातिः)

अभिष्टुमः शम्भवतीर्थराजं, नमन्नराऽमर्त्यसुराधिराजम् ।
जितारिसन्ताननभोनभोगं, सम्प्राप्तकैवल्यवशोपभोगम् ॥ १

जिनोत्तमास्ते सततं समग्रा, रक्षन्तु संसारभयान्मनुष्यान् ।
यद्दर्शनात् कल्कगणाः प्रणाशं, प्रयान्ति मेघादिव वेणुवाराः ॥२

श्रीवीतरागाऽऽगमवीचिमालि-पुत्रीहृदीशाऽग्रज एष नित्यम् ।
अज्ञानभूमीधरमाशु सप्त-नयस्फुरद्वज्रधरो निहन्तु ॥ ३

हर्षप्रकर्षं मम मानसीयं, दद्याद् सुरी राजमरालयाना ।
वज्रं करे वारिजनेत्रयुग्मा, विद्युल्लतागात्ररुचिर्दधाना ॥ ४

(२) (द्रुतविलम्बित)

चरणपद्मयुगं प्रणमाम्यहं, तव भवोच्छ्रिततापमलाऽपहम् ।
अमरकोटिभिरर्चितमादरा-दमदशंभवनाथ ! गुणाऽम्बुधे ! ॥१

भवभयात्किल पान्तु जिनोत्तमा, मदनपर्वतभेदभिदूपमाः ।
गतरुजः क्षतनाशजरोद्भवा, असुमतां शिवशर्मकृतश्च माम् ॥२

कुमतमत्तमतङ्गजमारणे, नयचितः समयो नखरायुधः ।
तव भवाऽम्बुनिधौ खलु मज्जतां,
प्रवहणं भविनां भवनाशनम् ॥ ३

त्रिभुवने त्रिमुखस्त्रिकयोगिनां,कुरु तृतीयजिनेश्वरशासने ।
तनुमतां दुरितं दुरितारिका, हरतु यच्छतु कीर्तिशुभश्रियम् ॥४

(३)

जितारि नृप सेनाया नन्दनं शांतिदायकम् ।
अश्वलञ्छनमर्हन्तं प्रभुं श्रीसंभवं स्तुवे ॥ १

कल्याणवर्णसदेहं सहस्राम्रवने वरे ।
सहस्रपरिवारेण प्रासदीक्षं महोदयम् ॥ २

कार्तिके कृष्णपञ्चम्या केवलज्ञानशालिनम् ।
जगदुद्धारकर्त्तारं तृतीयं तीर्थपं स्तुवे ॥ ३

गुणस्थानकसोपानं संपात्योत्तमसंपदम् ।
पूर्वाणि षष्ठि लक्षाणि यस्यायुर्नौमि तं विभुम् ॥ ४

(४)

(शालिनी)

वन्दे देवं संभवं भावतस्तं,
सेनाजातं योजिताशं सदालम् ।
बाह्याबाह्यं विद्विषां चाजयद्धे,
सेनाजातं यो जिताशं सदालं ॥ १

सह्लोकं तेऽवन्तु तत्त्वेऽतिसत्त्वाः,
सर्वज्ञा-लीनं-दिताशाविचित्राः ।
स्तौत्यानन्दाद्यानमानप्रमाणान्,
सर्वज्ञालीनन्दिताशाविचित्राः ॥ २

सद्यो-वद्यं हन्तु ह्यार्थसार्थः
सिद्धान्तोयं सञ्ज्ञनानामपारः ।

बुद्धिं यच्छन् कुड्मलध्वंसने सत्,
सिद्धान्तोयं सज्जनानामपारः ॥ ३

दद्यान्मोदं शृङ्खला वज्रपूर्व्वा,
देवी तारा हार सारा-धिकारा ।
पद्मे वासं संदधाना सदानं,
दे-वीतारा हारसारा धिका रा ॥ ४

(५)

(वसन्ततिलका)

निर्भिन्नशत्रुभवभीतिविशेषसान्त,
संसारसागरमहाप्लवसंभवेश ? ।
मह्यं प्रदेहि शशिसोदर शमसद्यो-
लोकातिगं प्रथितसर्वजनप्रभाव ! ॥ १

अर्हत्कदम्बक तव प्रणतं वरेण्य-
लक्ष्मीः सदाश्रयतुमानवमानमद्भिः ।
देवाधिपैःस्तुतपदाम्बुजकामहीन,
निर्मानमोहमदमृत्युजराप्रभाव ॥ २

अर्हद्गणेन रचितं शुभशासनं वः,
शर्मावलीं दिशतु सर्वनयानुसारम् ।
बिभ्रत्परैरकलनीयमयानकेन,
त्रैलोक्यविश्रुतगुणेन विमानकेन ॥ ३

या शृङ्खलाभरणभूषितकान्तमूर्त्तिः,
सौवर्णवर्णविभवानमतामनिन्द्याम् ।
श्रीवज्रशृङ्खलयुतां श्रुतदेवतां द्राक्
पद्माश्रितामभदमानवपूजनीयाम् ॥ ४

पू.मु.श्री गुणविजयविरचिता

(६)

भव्यौघमेघसरणिद्युमणिं मुनीशः
भूमीशनिर्जरशचीपतिपूज्यपादः ।
नित्यं स संभवजिनो मृतनाकदाता
पायात् प्रशस्तचरितो भवपातकौघात् ॥ १

ये सन्नतामरबलाहितमौलिरत्नः
भाः सुन्दराङ्ग सुषमामहिताङ्घ्रिपद्माः ।
भक्त्या सुराधिपगणैरतिशुद्धचित्तैः
संसारपावकजलानि भवन्तु ते द्राक् ॥ २

श्रीसंभवेशवचनं सुफलप्रदं हि
पर्याप्तवस्तुगणनिर्वपणप्रवीणम् ।
संतप्तजन्तुशमथाधिगमैकहेतु-
मव्यात्सदा त्रिभुवनाङ्गिगणा भवाब्धेः ॥ ३

आमेचकाभ्रतनुभाः प्रमदप्रदो यः
गोकर्णमुग्रुचिरयानसुकान्तकायः ।
नेत्रत्रयत्रिवदनातिमनोज्ञगोधिरर्ह-
त्पदाब्जमधुपस्त्रिमुखः स वोऽव्यात् ॥ ४

पू.आ.श्री गुणसागरसूरिविरचिता

(७)

सम्भवन्ति गुणा यस्मिन् सदाकालमनन्तकाः ।
सम्भवो वीतरागो मां गुणवन्तं करोत्वलम् ॥ १

ये निर्जितेन्द्रियग्रामा विषयेष्ववशा जिनाः ।
ध्येया जितेन्द्रियग्रामैः मां कुर्वन्तु जितेन्द्रियम् ॥ २

दोषदावाग्निमेघाभा गुणारामघनाघना ।
वाणी सम्भवदेवस्य हृदि वासं करोतु मे ॥ ३

सङ्घस्य दुरितारिघ्ना दुरितारिसुरी सदा ।
गुणावाप्त्यै प्रयत्नेन दुरितं हन्तु मे मुदा ॥ ४

(८) (तोटक)

जिनसंभव ! शम्भव शं भविनां विशदैर्विशदैर्जिनपैर्जिनपैः ।
विदिता गदिता ! विनुता जिनगीः
कमलैः कमलैरमलैरमलैः ॥ १

(चतुर्शः उच्यते)

४

## ॥ श्रीअभिनन्दनजिनस्तुतिः ॥

पू.मु.श्री हंसविजयविरचिता

(१) (वसन्ततिलका)

वन्देऽभिनन्दनजिनं जनरञ्जनं तं,
श्रीसंवराऽन्वयसुराऽऽलयवज्रपाणिम् ।
सावद्ययोगविरतं रततोयवाह-
प्रोज्जासनोद्धतसमीरणमाप्तसातम् ॥ १

भव्या जिनेश्वरगणं श्रयत प्रकामं,
यूयं क्षमारसपयःसरिदीशचन्द्रम् ।
श्रेयस्करं सुकृतिनां नतकन्धराणां,
यं देवताऽधिपतयः प्रणमन्ति शश्वत् ॥ २

सम्यग्दृशां जिनवराऽऽगमसत्कुमारो,
हर्षं चिनोतु सुतरां प्रियवाक्यसारः ।
रम्यस्वरः सुगतिदर्शनदायिदेहः,
स्फूर्जद्गुणावलियुतो जगति प्रतिष्ठः ॥ ३

वज्राङ्कुशी सकलशर्मविधायिनी सा,
पुंसां सुखं प्रवितनोतुतरां मृगाक्षी ।
याऽनेकपं श्रितवती दधती कराभ्यां,
दम्भोलिमङ्कुशमलं च मरालभासम् ॥ ४

५

# ॥ श्रीसुमतिजिनस्तुतिः ॥

पू.मु.श्री हंसविजयविरचिता

(१) (तोटकम्)

सुमते ! सुमते ! ऽसुमतां सुतरां, सुगतिप्रद ! मेघमहीशसुत ! ।
तव दर्शनमत्र मनोज्ञमपा-कुरुताद्दुरितं चिरकालभवम् ॥ १

विततान यदीयजनुः सुमहं, शिखरे तपनीयगिरेः प्रमदात् ।
शतयज्ञततिस्तपनीयघटैस्त-महं प्रणमामि जिनेशगणम् ॥ २

भगवन्नवतात् भवतो वचनं, भवतो भवतो भवभीतिहरम् ।
कुमतोत्कटहस्तिमृगेन्द्रसमं, दुरितव्रततिक्षयसामभवम् ॥ ३

समवाऽम्बुददेहरुचिर्भयतो, मनुजान् बत कालि सदा सदया ।
अवनीधरभृद्गदया सहिता, सहिता महिताऽमलदन्ततति: ॥४

६

## ॥ श्रीपद्मप्रभजिनस्तुती ॥

पू.मु.श्री हंसविजयविरचिता

(१) (वसन्ततिलका)

पद्मप्रभः प्रतिदिनं प्रददातु पद्मां,
प्रौढप्रमादपवनाशनपन्नगारिः ।
श्रीमद्धरक्षितिपतेः कुलमेरुकल्पो,
रक्ताङ्कभूव(घ?)नरुची रुचिरप्रभावः ॥ १

संसारनीरनिधिपीतसरिद्धदीशा-
स्तीर्थङ्कराः शुभभरं मम ते दिशन्तु ।
सन्त्यज्य ये नृपरमां गजवाजियुक्तां,
मुक्तिश्रिये तृणमिवाऽऽददिरे तपस्याम् ॥ २

मूर्ध्ना वहे जिनवराऽऽगमपुण्डरीकं,
सद्भङ्गजालदलसञ्चयपूरिताङ्गम् ।
सप्तप्रधाननयनालविराजमानं,
विद्वत्षडङ्घ्रिसुखदं पदवारिसंस्थम् ॥ ३

गौरी सुरी मम सदा विदधातु भद्रं,
कुन्देन्दुशङ्खरजताचलचारुकान्तिः ।
प्रध्वस्तदोषनिचया निचिता गुणौघैः,
सारङ्गशावनयना जयदायिनीयम् ॥ ४

## पू.मु.श्री चारित्रसिंहविरचिता

### (२) (मणिगुण निकरा-शशीकला)

धरनृपतनयम नकम - रवहरणं,
नततमजनक - षदरभर - हरणम् ।
अमलकमल - दल - सम - कर - चरणं,
नमत णमनम - जम - रम - म - शरणम् ॥ १

अभयदम-चलमगदवममदनं
शमदमरसभर-विनतमकदनम् ।
नवरमभव-मयगमभ-ववदनं,
गतरम-तर-क-दम-समनसदनम् ॥ २

हकरकरणम-जनन-मशदलनं
कपट-कटकभटभभ-खलम-लनम् ।
समय ! ख-पद-नगम-ठ ! ककलनं,
कद-मकम-पहर-दद-भवदलनम् ॥ ३

हतर-सबक-मन-करम-ख-शसनं,
खलबलदलन-पर-वकर-दसनम् ।
पदनतनरगणवध-छ-महसनं,
भवदव-नवतर-कमल-दम-सनम् ॥ ४

७

# ॥ श्रीसुपार्श्वजिनस्तुती ॥

(पिशाचभाषाबद्ध) (१) (उपजाति)

मनोभवाहंकइसंकराहं, सिआ कयंदन्ति करोरुबाहम् ।
दुहे सुधारानिअरेसणाहं, नुवे सुपासं नरनाहनाहम् ॥ १

संखप्पवालकणयंजणकंदिकन्दं,
सिदंसुदिधीदिगणुज्जलदन्दपन्दिम् ।
देवाकदादिसयबिन्दजुदं पसंदं,
सेवे जिणोहमुदिदं सुददं भदन्दम् ॥ (व.ति.) २

नाणाबाले विशतपतवले सादुआवालसाले,
धम्माधाले सुनयगमधले चालुचूलाविशाले ।
आच्छोदाले सवणसुहकले साहुकंढोलुहाले,
गाहागाहे जयइ सुसमए मुक्खमग्गेगदाले ॥ (चित्रलेखा) ३

सव्वालङ्कालसाला भविअदुहहला संखदत्तोवयाला,
सालङ्कालाविकालकमलमितुकलाकन्तमातङ्कदाला ।
श्रुत्थाचालाविहालासहिमथुलसलाता लताला सुताला,
खातोतन्तासुतन्तादतनुततमतिं शांतशांतासुलीणम् ॥(शा.वि.)४

पू.मु.श्री हंसविजयविरचिता

(२) (प्रमाणिका)

सुपार्श्व ! तीर्थनायक !, कुरुष्व मे मनोगृहे ।
निरन्तरं मुदाऽऽस्पदं, शिलीमुखो यथाऽम्बुजे ॥ १

स्वयम्भुवां व्रजं सदा, नमामि नम्रनाकिपम् ।
समस्तसौख्यदायकं, निरस्तपञ्चसायकम् ॥ २

जिनेन्द्र ! राजते तवा-ऽऽगमो गमावलीयुतः ।
स्फुरन्नयाऽब्जभास्करः, कुवादिदन्तिकेसरी ॥ ३

ममाश्वकल्पनायकः, करोतु मङ्गलावलिम् ।
त्रिकालवित्सुपार्श्वपत्, सरोजहंससन्निभः ॥ ४

८

## ॥ श्रीचन्द्रप्रभजिनस्तुतयः ॥

पू.मु.श्री हंसविजयविरचिता

(१) (ललिता)

महसेनमहीपुरन्दरकुल–कोटीरलसन्मणिप्रभम् ।
प्रणुमो वयमत्रिनेत्रजाऽनु–कृतिश्लोकमघाऽपहं जिनम् ॥ १

जिनराजततिस्तनोतु वः, सततं निवृत्तिं निर्वृतिप्रदम् ।
प्रतिबोध्य जनानदर्शयद्, वृषमार्गं खलु या कृपाऽऽस्पदम् ॥२

शरणीक्रियतां जिनाऽऽगमो, हृदये भव्यजन ! त्वयाऽनिशम् ।
कुनयोद्धतशैलवज्रभृद्, भगवद्वक्त्रसरोजसम्भवः ॥ ३

विनताऽङ्गजमाऽऽश्रिता सदा, प्रतिचक्राऽस्तु सतां विभूतये ।
विफलीकृतशत्रुमण्डलं, दधती चक्रमयोमयं शये ॥ ४

श्रीवागडुद्रमण्डनश्रीचन्द्रप्रभयुगादिजिनस्तुतिः

(२) (शार्दूलविक्रीडित)

धर्मं कर्तुमहो महोत्सवमिव द्वेधापि सार्वोदितं,
बाह्याऽभ्यन्तरवैरिवारमतिदुर्वारं विजेतुं द्रुतम् ।
श्रीचन्द्रप्रभतीर्थनायकमथ श्रीमद्युगादीश्वरं,
सेवे सातिशयं पुराणमनिलं सद्वागडुद्रप्रभुम् ॥ १

दुर्जेयोऽपि जगज्जनैर्जिनवरैर्यैर्मोहराजो जवा–
ज्जिग्ये प्राप्यतिशायिनी च पदवी विश्वार्हणीया सताम् ।

त्रैलोक्यैकविलोकनाः शिवपुरीसार्थैकसम्मीलनाः,
भूमीमण्डलमण्डनाः कलिमलप्रक्षालनास्ते श्रिये ॥ २

या जैनेन्द्रवचः प्रदीपरुचयः सम्यग्दृशामेव सद्-
बोधोद्योतकराः समं त्रिभुवनेऽप्याशाः प्रकाशाः पुनः ।
नो दोषोदयतामसाश्रयसमस्नेहोदयाः कुत्रचित्,
ता मोदेन सदाशये शिवपथज्ञानाय कुर्वीमहि ॥ ३

श्रीचन्द्रप्रभदेवसेवकतया येऽत्र श्रुतदेवताः
क्षेत्राधीशविनायका अपि भृशं सम्यग्दृशां वत्सलाः ।
ये चान्येऽपि सुरा जिनप्रवचनप्रोल्लासनालालसाः,
सन्त्वस्मत्सुकृतान्तरायहतये सम्पत्तये श्रेयसाम् ॥ ४

(३) (अनुष्टुप्)

देवैर्यस्तुष्टुवे तुष्टैः, सोम-लाञ्छित-विग्रहः ।
दद्याच्चन्द्रप्रभः प्रीतिं, सोम-लाञ्छित-विग्रहः ॥ १

येषां पूजाविधिः कर्मा-ऽञ्जनहृत्कमलालयः ।
ते जिनाः पान्तु वो भव्य-जन-हृत्कमलालयः ॥ २

कुतीर्थिभ्यस्सदादूरा-सदम्भोज्ञा निरञ्जनम् ।
श्रुतं सेवेत मोहाग्नि-सदम्भोज्ञा निरञ्जनम् ॥ ३

पातु गीर्वः कृताविद्यो - परमा कमलासना ।
यत्प्रभावो जनैर्लेभे, परमाकमलासना ॥ ४

(४) (कामक्रीडा)

लक्ष्मीवत्यां शोभावत्यां चन्द्रावत्यां सञ्जातं
मुक्तोत्सूत्रं धर्मछत्रं श्रेयःसत्रं चन्द्राङ्कम् ।

योगैर्युक्तं रोगैर्मुक्तं ध्यानाऽऽसक्तं चन्द्राभं
शुभ्रच्छायं भास्वत्कायं ध्वस्ताऽपायं वन्देहम् ॥ १
धन्यंमन्याः स्रस्ताजन्याः श्रीपर्जन्याः सम्मोदात्,
प्रास्तोन्मादान् सम्पत् पादान् येषां पादान् सेवन्ते ।
दाने दक्षाः लोकाऽध्यक्षाः स्फूर्जत्पक्षास्ते सर्वे
सार्वाः शुद्धिं शुद्धां बुद्धिं कुर्युः सिद्धिं सम्प्राप्ताः ॥ २

या गम्भीरा प्रोद्यद् धीरा तापे नीरा पापानां
माद्यन्मोहध्वान्ताऽऽरोहव्यूहापोहवज्राभा ।
भूयो भव्या श्रोत्रे श्रव्या नित्या नव्या जैनीयं
कुर्याद्वाणी वः शर्माणि त्रातप्राणिव्राता सा ॥ ३

अर्हल्लीना हंसासीना पुण्यैः पीना पद्माक्षी
शान्तौ दक्षा भूयो यक्षा सङ्घे रक्षां कुर्वाणा ।
ज्योति र्ज्वाला ज्वालामाला हस्ते व्यालान् बिभ्राणा
दुःखो चूर्णं सौख्यं पूर्णं दद्यात् तूर्णं सा देवी ॥ ४

(५)

(मालिनी)

सुगतिजलधिचन्द्रं सर्वसन्तापमुद्रं,
विहितविमलभद्रं ध्वस्तसंसारछिद्रम् ।
सुगुणगणसमुद्रं कान्तकान्त्येकचन्द्रं,
विनमत जनभद्रं स्वामिनं नौमि चन्द्रम् ॥ १

कुमतजलधिपारा विश्वसन्तापहारा,
मदनगतविकारा मानवल्लीकुठाराः ।
भवभयततिभीराः साधुचक्रैकहीरा,
विनमत जिनवीरा दम्भभूसारसीराः ॥ २

दुरितदहननीरं मोहधूलीसमीरं,
कुगतिविहिततीरं दर्पकन्दर्पकीरम् ।
व्रतिकजदिनहीरं भाग्यभूमेः शरीरं,
प्रणमत वरवीरं स्वागमं श्रीगभीरम् ॥ ३

जिनमतकृतकक्षः सर्वदा सङ्घरक्षः,
दलितकुमतपक्षः लोकलक्षैकलक्षः ।
विपुलविमलवक्षः वर्यकार्येषु दक्षः,
स जयति वरमुख्यः श्रीजयः शुद्धयक्षः ॥ ४

पू.आ.श्री गुणसागरसूरिविरचिता

(६)

गुणाब्धिवर्द्धने चन्द्रः चन्द्रश्वेतयशोभरः ।
कान्तिनिर्जितचन्द्र ! त्वं, चन्द्रेश ! भव मुक्तये ॥ १

चतुर्दशमहास्वप्नान्, दृष्ट्वा जाग्रति मातरः ।
येषां गर्भगतानां तेऽमेयपुण्यजिनाश्रिये ॥ २

चन्द्रेशमुखचन्द्रोत्था, वाणी भव्यहितप्रदा ।
चारित्रारामपाथोदा, मे हृदि जयतात् सदा ॥ ३

दुष्टेषु भृकुटीभीमा, शिष्टेषु सौम्यदर्शना ।
गुणाप्त्यै भृकुटीदेवी, भूयाच्चन्द्रेशसेविका ॥ ४

(७)

भुवनभरिकुबन्धं तीर्ण्णसंसारसिंधुं
विगलितमदगन्धं छिन्नदुःकर्मबन्धम् ।
गुणमणभरनुन्तं चन्द्रमालक्ष्मिवन्तं
प्रणतजनमनन्तं नौमि चन्द्रप्रभं तम् ॥ १

त्रिभुवनकृतरक्षा ज्ञानविज्ञानलक्षाः
कुगतिदलनदक्षा जन्मिनां कल्पवृक्षाः ।
नतसुरवरलक्षास्तीर्थनाथाय अलक्षा
शिवपदममद्रिक्षास्तेदशंता सुपक्षाः ॥ २

सदतिशयसमृद्धं हेतुदृष्टान्तु(न्त) सिद्धं ।
ललितपदसमृद्धं चूलकाभिः प्रवृद्धम् ।
परममुनिनिबद्धं प्राग् परार्थानिरुद्धं
नमतु विवद्ब(?) बद्धं जैनवाक्यं विशुद्धम् ॥ ३

भविकजनविकाशा शुद्धबोद्ध (?ध) प्रकाशा
गतदुरितसकाशा जाड्यजम्बालनाशाः ।
यशसिव जिनकाशा कल्प(व)ल्लीनिकाशाः
सफलयतु ममाशा भारती द्योतिताः ॥ ४

९

पू.आ.श्री गुणसागरसूरिविरचिता

## ॥ श्रीसुविधिनाथस्तुती ॥

(१)

सुविधिं दर्शयित्वा यः, सर्वज्ञोऽनेकसिद्धिदः ।
बभूवः सुविधीशः स, श्रेयसे मे सुरार्चितः ॥ १

संसेव्य विंशतिं स्थानांस्तीर्थकृत्कर्म निर्मभे ।
तपोधनैस्तृतीये प्राग् भवे यैस्तान् श्रयाम्यहम् ॥ २

सुविधेर्दर्शयित्री या, वाणी श्रीसुविधिप्रभोः ।
कुतीर्थिकुविधर्हन्त्री, हृदि सद्‌गतिदा वसेत् ॥ ३

सुतारका सुताराक्षी, सङ्घसाहाय्यदाऽमरी ।
गुणप्राप्त्यै सहाय्यं मे, ददातु भक्तवत्सला ॥ ४

१०

## ॥ श्रीशीतलनाथस्तुतिः ॥

पू.आ.श्री गुणसागरसूरिविरचिता

(१)

संसारदुःखतप्तानां, शीतलत्वप्रदप्रभो ! ।
शीतलेशाऽघतप्ताय शीतलत्वं प्रदेहि मे ॥ १

जराजन्ममृतिव्याधि मुक्ता ये भवमोचकाः ।
प्राप्ताऽक्षयसुखाः सोख्यप्रदा यच्छन्तु शं जिनाः ॥ २

भवदावाग्निवाय्वाभा शीतला शीतल प्रभोः ।
वाणी कर्मरजोवायु निभा तिष्ठतु मे हृदि ॥ ३

अमन्दशोकपूर्णानामशोकाऽशौकदा सुरी ।
भक्तानां शीतलस्वामी भक्ता भूयाद् गुणाप्तये ॥ ४

## ॥ श्रीश्रेयांसजिनस्तुती ॥

पू.आ.श्री गुणसागरसूरिविरचिता

(१)

श्रेयोनिधे कृपावार्द्धे, श्रेयो दानक्षमप्रभो ।
श्रेयांस वितर श्रेयो, हराऽश्रेयोऽघनाशन ॥ १

सकलाऽहितमातङ्ग-मृगेन्द्रा हितदा जिनाः ।
दृष्टाऽखिलजगद्भावाः, श्रिये स्युर्ज्ञानसागराः ॥ २

श्रुता श्रेयांसि संसूते, श्रेयांसविभुगीर्वरा ।
कृत्याकृत्यविवेकस्य, दात्री भूयाद् हृदि स्थिरा ॥ ३

भक्तवांच्छितसत्कार्य - विधानेऽनलसाऽमरी ।
श्रेयांसशासने गोप्त्री, मानव्यस्तु गुणाप्तये ॥ ४

(२)

अस्सेयदेविं दलियं व मुत्ती, सेज्जंसमेयं सुयधम्मकित्तिं ।
करिं सुमेयं जमिहं अविज्जाणं-
दोलगिण्हंपि तमज्ज ! कुज्जा ॥ (उपजातिः) १

जे धम्मकित्तिसिवसंति विमुत्तिविज्जा-
णंदप्पयाणप्पविहाणविहायसज्जा-
देविंदविंदपरिविंदपयारविंदा,
ते मुत्तिजुत्तिमिह दिंतु जिणिंदचंदा ॥ (वसन्ततिलका) २

तेसिं सुस्सुसधम्मकित्तियमिणं देविंदचक्कित्तण,
संपुण्णे सरियाइसाहसगुणं लोगुत्तमुक्कित्तणं ।
विज्जाणंदपहाणमुत्तिपयवीसंपायणं सव्वया,
झायंतीह जिणिंदचंदवयणं जे सव्वया सव्वया ॥(शा.वि.) ३

निच्चं देविंदसूरी जियमइविहवा जे सुयंगीइनाम,
झायंता हुंति सत्ता तमतिमिरभिया धम्मकित्तिलयंता ।
जं पारीणत्तणंभोधिवियइ अहरा सव्वसत्थुत्तमाणं,
विज्जाणंदेव एसा जिणवर वयणे भत्तिराणं नराणं ॥ ४

(स्रग्धरा)

# ॥ श्रीवासुपूज्यजिनस्तुतयः ॥

पू.आ.श्री गुणसागरसूरिविरचिता

(१)

वासुपूज्य जगत्पूज्य, पुरुषोत्तम तीर्थकृत् ।
पूज्यपूज्यजिनाधीश, देवदेव, नमोऽस्तु ते ॥ १

सुबोधाम्बुधिरात्रीशाः, कुबोधतमभास्कराः ।
ये शोषिताऽघजम्बालाः शरण्यांस्ताञ्जिनान् श्रये ॥ २

दुःखेन्धनदवज्वाला, सौख्यपादपवारिदा ।
वासुपूज्येशवाणी सा, नन्दताद् हृदि मे सदा ॥ ३

चण्डादेवी प्रचण्डाज्ञा, देवदेवीसुसेविता ।
वासुपूज्येशभक्ता मे या सा भूयाद् गुणाप्तये ॥ ४

(२) (मालिनी)

विमलगुणअगारं, वासुपूज्यसफारं,
निहतविषविकारं, प्राप्तकैवल्यसारम् ।
वचनरसउदारं, मुक्तितत्त्वे विचारं,
वीर विघननिवारं, स्तौमि चण्डीकुमारम् ॥ १

(चतुर्शः उच्यते)

(३) (स्रग्धरा)

सच्छास्त्राम्भोधितत्त्वामृतरसलहरी शाश्वता-स्वादविज्ञै-
र्देवेन्द्रैः संस्तुतं तं त्रिभुवनतलके पुष्कलैः स्तोत्रवृन्दैः ।

नाकि-स्त्रीवृन्दसेव्यं सुरनरजयिनं विद्रुमाभं गुणाढ्यं,
स्तोष्येऽहं वासुपूज्यं तमधिकरुचिरं कान्तिमन्तं जिनेशम् ॥ १

(४) (चित्रमाला)

चम्पापुर्यां वरेण्यं द्विदशमपतिं रक्तपद्माभकायं,
संसारे यानपात्रं सुजनसुखदं जातजन्मादिकार्यम् ।
योगीन्द्रं योगीगम्यं स्वभिनतपदं सेवितं देववृन्दै -
र्वन्देऽहं सारसारं महिषपतिना वन्दितं वाञ्छितास्यै ॥ १

(५) (अनुष्टुप्)

वासुपूज्यो जिनेन्द्रो हि, यात्रिकानां मनोरथान् ।
सम्पूरयतु नित्यं च, कल्पवृक्षसमः प्रभुः ॥ १

१३

## ॥ श्रीविमलनाथस्तुतिः ॥

पू.आ.श्री गुणसागरसूरिविरचिता

(१)

विमलागमपाथोद, नतेन्द्रविमलप्रभो ।
वीतकर्ममलस्वामिन्, विमलात्मन्नमोऽस्तु ते ॥ १

क्रोधवह्निघना मानगिरिवज्रा जिनाः श्रिये ।
मायावल्लीकुठाराः स्युर्लोभसागरकुम्भजाः ॥ २

विमला विमलस्वामि-वाणी विमलताप्रदा ।
विमलं हृदयं कर्तुं, विशताद् मदीये हृदि ॥ ३

त्रयोदशजिनाराध्य-पादवार्जमरालिका ।
विदिता भुवने देवी, विदिताऽस्तु गुणाय मे ॥ ४

१४

## ॥ श्रीअनन्तनाथस्तुतिः ॥

पू.आ.श्री गुणसागरसूरिविरचिता

(१)

अनन्तगुणसंपूर्ण !, सिद्धानन्तचतुष्टय ! ।
अनन्ताऽनन्तसौख्येश !, देह्यनन्तचतुष्टयम् ॥ १

सद्भाववार्द्धिचन्द्राभा, असद्भावाम्बुदाऽनिलाः ।
भावारिद्विपसिंहा ये, श्रेयसे सन्तु ते जिनाः ॥ २

अनन्तान् पुद्गलावर्त्तान्, भ्रान्ता जीवा विना हि याम् ।
सानन्तजिनवाणी मे, हृदि भूयात्स्थिरा सदा ॥ ३

भक्तविघ्नगजाङ्कुस-निभांऽकुशी शुभाकृतिः ।
त्रिदशी या गुणप्राप्त्यै, सहायं मे तनोतु सा ॥ ४

१५

## ॥ श्रीधर्मनाथस्तुतिः ॥

पू.आ.श्री गुणसागरसूरिविरचिता

(१)

लोकान्तिकसुरज्ञप्त्या, दानं प्रदीय वार्षिकम् ।
धर्मेश ! देहि धर्मं मे, धर्मतीर्थप्रवर्तक ! ॥ १

च्युतिजन्मगृहत्याग ज्ञान-निर्वाणपञ्चकम् ।
येषां समग्रजीवानाम्, सौख्यदं ते जिनाः श्रिये ॥ २

चातुर्गतिकसंसाराऽसह्यदुःखहरा सदा ।
धर्मतीर्थपतेर्वाणी, हृदिस्था जयतान् मम ॥ ३

कन्दर्पा दुष्टदर्पघ्ना, दर्पघ्नधर्मसेविका ।
अदर्पगुणलाभाय, मे भूयाद्देव्यपांशुका ॥ ४

१६

# ॥ श्रीशान्तिनाथजिनस्तुतयः ॥

(१) (मालिनी)

सकलकुशलवल्ली पुष्करावर्त्तमेघो,
मदनसदृशरूपः पूर्णराकेन्दुवक्त्रः ।
प्रथयतु मृगलक्ष्मा शान्तिनाथो जनानां,
प्रसृतभुवनकीर्त्तिः कामितं कम्रकान्तिः ॥ १

जिनपतिसमुदायो दायकोऽभीप्सितानां,
दुरिततिमिरभानुः कल्पवृक्षोपमानः ।
रचयतु शिवशान्तिं प्रातिहार्यश्रियं यो,
विकटविषमभूमीजातदर्त्तिं बिभर्त्ति ॥ २

प्रथयतु भविकानां ज्ञानसम्पत्समूहं,
समय इह जगत्यामाप्तवक्त्रप्रसूतः ।
भवजलनिधिपोतः सर्वसम्पत्तिहेतुः,
प्रथितघनघटायां सर्पकान्तप्रकारः ॥ ३

जयविजयमनीषामन्दिरं ब्रह्मशान्तिः,
सुरगिरिसमधीरः पूजितो न्यक्षयक्षैः ।
हरतु सकलविघ्नं यो जने चिन्त्यमानः,
स भवतु सततं वः श्रेयसे शान्तिनाथः ॥ ४

(२) (मालिनी)

सुकृतकमलनीरं, कर्म्मगोसारसीरं,
मृगरुचिरशरीरं, लब्धसंसारतीरम् ।

मदनदहनवीरं, विश्वकोटीरहीरं,
श्रयति गिरिपधीरं, शान्तिदेवं गभीरम् ॥ १

जलधिमधुरनादा, निस्सदा निर्विषादाः,
परमपदरमादा–स्त्यक्तसर्वप्रमादाः ।
दलितपरविवादा, भुक्तदत्तप्रसादा,
मदकजशशिपादाः, पान्तु जैनेन्द्रपादाः ॥ २

दुरिततिमिरसूरं, दुर्म्मतास्कन्दशूरं,
कुहठफणिमयूरं, स्वादुजिद् हारहूरम् ।
अशिवगमनतूरं, तत्त्वभाजामदूरं,
शृणुत वचनपूरं, चार्हतां कर्णपूरम् ॥ ३

जिनपनवनसारा, नश्चमत्कारकाराः,
श्रुतमितसुरवाराः, कर्मपाथोधितारा ।
शुभतरुजलधाराः, सारसादृश्यधारा,
ददतु सपरिवारा, मङ्गलं सूपकाराः ॥ ४

(३) (मालिनी)

नमदमरपदान्तं चारुचारित्रदान्तं
भुवनजनमहान्तं सर्वकालोपशान्तम् ।
घनगुणगणकान्तं सिद्धिवध्वैककान्तं
नमत कृतभवान्तं शान्तिनाथं नितान्तम् ॥ १

हतविपदवसादाः क्षिप्तदृप्तप्रमादाः
परिहृतपरिवादाः कलृप्तपद्मानुवादाः ।
हतविषमविषादा अस्त–माया–निषादाः
स्फुटमिह जिनपादाः सन्तु नः सप्रासादाः ॥ २

अतिगहनविचारं क्षिप्तमोहप्रचारं
कृतकुमतनिकारं कृतवस्त्वोपकारम् ।
दलितदुरितभारं दत्तसंसारपारं
भजत हृतविकारं शुद्धसिद्धान्तसारम् ॥ ३

स्फुटलसदवलोका ध्वंसितास्तोकशोका
प्रणमदखिललोका ध्वस्तजाड्यौघ-कोका ।
निहतकुमतशङ्का वीणया स्फूर्जदङ्का
जयतु गतकलङ्का भारती क्षिप्तपङ्का ॥ ४

(४) (हरिणी)

स जयति सतामीशः शान्तिर्यदङ्कनतामरः,
प्रकटमुकुटोट्टङ्की रत्नाङ्कुरप्रकरोरुवत् ।
ध्वजपृषदनुच्छायः शङ्के यदास्य लघुकृतः,
तरुणकिरणोपेतः कोपान् मृगाङ्कगणोऽरुणः ॥ १

शिवपथकथां तथ्यातीर्थाधिपाः प्रथयन्तु नः,
पृथुलदवथुं द्राक् कुर्वन्तु श्लथां च भवव्यथाम् ।
मणिधृणिमिषाद्येषामाङ्घ्रः पतन्ति पदोरदो
विमलमनसां चेतांसि श्रीजिनाः प्रजयन्तु ते ॥ २

जिनपतिमतक्षोणिगाथ प्रकाशयनाथता,
मयि मयि शुचिः स्वर्गोपाङ्गी सुवर्णमणीनिधिः ।
विदितचरितोऽस्तोके श्लोकः सदर्थकदर्थितः,
प्रतिभटगतः स्तुत्यस्तुत्यानुशासनदर्शनः ॥ ३

गरुडसुकृतित्राणो दृतोर्ध्वदृशात्वयारुणा,
तरदृशादृष्टः कालः प्रकम्पदरातुरः पद ।

पद बलगता शक्तो युक्तं सदण्ड-धरोधुना,
विनवितमिमधन्यमन्यं जनसुखीनं कुरु ॥ ४

(५) (वसन्ततिलका)

भक्तामरेन्द्रनतपत्कजमुद्विकारं
श्रीवीतरागमजमाप्तमुदारतारम् ।
तीर्थेश्वरं स्वबलनिर्जितकर्मसारं,
शान्तिं स्तुवे स्मरवितान-विनाशकारम् ॥ १

शास्त्रोक्त-सुन्दर-शिवस्य वशैकमन्त्रान्
कन्दर्प-वारण-वधे वरपञ्चवक्त्रान् ।
तीर्थङ्कराञ्जिनवरान्सुविशुद्धगोत्रान्
वन्दे मुदाहमधिपान् हि सदा पवित्रान् ॥ २

विद्यान्वितं वृजिनवृक्षलतालवित्रं
संसार-सागर-तरण्ड-मकाण्डमित्रम्,
दुष्टाष्टकर्मनिधनं विपुलं विचित्रं
सेवे सदा जिनवरेन्द्रमतं पवित्रम् ॥ ३

श्री-शान्तिनाथजिनशासनभक्तदक्षः
प्रत्यूहभीप्रतिहताधमदुष्टपक्षः ।
शीघ्रं सरित्पतिसुताविजयस्य यक्षः
सिद्धिं दधातु गरुडः कृतसंघरक्षः ॥ ४

(६) (वसन्ततिलका)

दद्याद्श्रियं जयति शान्तिरनन्दिदेहः
कल्याणकीर्तिसुयशोनिचयादिगेहः ।

संसारनीरनिधितारणकर्णधारः
सिद्ध्यङ्गनाहृदयचञ्चलतारहारः ॥ १

रागाद्यरातिनिचयैरखिलैरनेयः
सल्लेखलेखललनागणगीतगेयः ।
नित्यं नितान्त नय सञ्चयतामयानि
जैनश्चयः किल ददीत हितानि तानि ॥ २

प्राचीनकर्मतरुकाननदाहदक्षं
निर्दग्ध गाढतरशाठ्यदशैककक्षम् ।
संलीनसारनरनिर्जरदैत्यराजं
तच्छासनं जयति तावकजैनराजम् ॥ ३

अर्घ्याङ्घ्रिनीरजनतामृत-पायिवर्गा
नित्याहृता कृत-कृतिक्षित-जाड्य-लेशा ।
वादे सदा विजयदा कलिकालमध्ये
सा जैनगीर्जगति खण्ड्यतादशस्तम् ॥ ४

पू.आ. श्रीललितप्रभसूरिविरचिता
(७) (कामक्रीडा)

यः स्वामी कारुण्यात्सारङ्गम्भूमौ भीतं व्याघ्रा-
दाकाशेऽपि क्रूराद्राहोराऽऽस्यात् स्पष्टं चारक्षत् ।
आधारं विश्वानां सर्वेषामत्यन्तं भास्वन्तं तं
सातत्यं शान्तिं श्रीमच्छान्तिं तोष्टोम्यर्हन्तम् ॥ १

येषां चेतोऽभिप्रायो गीर्वाणस्त्रीभिर्नाक्षोभि
प्रायो वायोर्गुञ्जाभिर्मेरुः शैलो यद्वात्याभिः ।

दीनानां लोकानां चिन्तारत्नप्रायाः प्रायास्ते
ते सर्वज्ञा मे यच्छन्तु द्रागमुख्यं मौक्षं सौख्यम् ॥ २

विद्वद्गम्यैरम्यैरर्थैरव्यर्थैः पूर्णं तूर्णं
नृणां भव्यानां संसाराब्धेः पर्य्यन्तं कुर्वन्तम् ।
अत्यर्थं चित्तस्थं कुज्ञानध्वान्तं विद्ध्वंसन्तं
नित्यैकान्तं क्षिप्तैकान्तं श्रीसिद्धान्तं वन्देऽहम् ॥ ३

अस्तापायं सौम्यं गौरच्छायं कायं बिभ्राणा
श्रीशान्तेर्भक्तिं तन्वाना पद्मं पत्रं कुर्वाणा ।
विघ्नौघं भिन्दाना हस्तस्थेनाम्भोजेनाभान्ती
सा निर्वाणीदेवी दद्याद् ऋद्धिं वृद्धिं सिद्धिं मे ॥ ४

(८) (उपजाति)

श्रीविश्वसेनाऽन्वयभानुमाली
हिरण्यवर्णो हरिणाङ्कशाली ।
पायादपायादचिरासुतो द्राक्
सूरीश्वरं श्रीविजयक्षमाख्यम् ॥ १

नाभेयमुख्या निखिला जिनेन्द्राः
सत्केवलज्ञानदशा वितन्द्राः ।
भवन्तु कल्याणगणा विदोषाः
गच्छाधिपश्री–विजयक्षमाणाम् ॥ २

विचित्रभङ्गैः सततं गभीरा
प्रभूतजीमूत–निनाद–धीरा ।
जैनेश्वरीवाक्कमलार्थधात्री
सूरेः क्षमाख्यस्य मुदे समस्तु ॥ ३

रणज्झणद्रत्नविभूषणाद् या-
दिव्याम्बरा देवविमानवासा ।
श्रीशान्तिदेवी विषमेषु नित्य-
मियं क्षमाख्यं च सदावताद् वै ॥ ४

(९) (उपजातिः)

शान्ते ! तव स्वान्तमवाक्षुमन्नो, वराङ्गनादा-नव-मानवानाम् ।
वश्यात्मनो गुप्तिकुटुम्बिनीनां, वराङ्गनादा नवमानवानाम् ॥१

प्रीणन्तु ते प्राणिगणं जिनेन्द्रा, मह्याः समूहेन पुरन्दराणाम् ।
यैर्धाम कैवल्यमितैरमुष्या, मह्याः समूहेन पुरन्दराणाम् ॥ २

यस्तीर्थराजो वचनामृतानि, सदा नमस्यन्त्ययशः पदानि ।
धन्यानि वैधुर्यधुरं - धुराणि, सदा नमस्यन्त्ययशः पदानि ॥३

गीः पातु हस्तेऽम्बुजमुद्वहन्ती, घनालिकान्तं मकरं दधानम् ।
द्य(घ्न?)न्ती विदां विघ्नमनङ्गमङ्कं,
घनालिकान्तं मकरं दधानम् ॥ ४

(१०) (उपजाति)

दद्यात्पदं शान्तिजिनः स बुद्ध्या
प्रभासमानो नवधामलाभम् ।
जनाय यस्तत्त्वमुवाच हेम्नः
प्रभासमानो नवधामलाभम् ॥ १

जिनावली नन्दतु सा सदैव,
समाहिता पातितमोहधाम्नी ।

जगत्त्रयं याऽखिल-जीवलोके
समाहिता पातित-मोहधाम्नी ॥ २

श्रुतामृतं श्रीजिनभाषितं ये
भूयः प्रमादं बहुशोधयन्ति ।
तेऽनेकजन्मार्जित-पाप-पङ्कं
भूयः प्रमादं बहुशोधयन्ति ॥ ३

पद्मावती पातु भुजङ्गराजाऽ,
पि नाकिना भूतिभृता सभेशा ।
प्रेम्णा भवानीव निषेव्यमाना
पिनाकिना भूतिभृता समेशा ॥ ४

(११) (स्त्रग्विणी)

सिद्धि-गन्धर्व-विद्याधर-श्रेणिभिः
पुण्यभारा-दिवानम्रसन्मौलिभिः ।
वन्दितं यस्य पादारविन्दं मुदा
शान्तिनाथाय तस्मै नमः सर्वदा ॥ १

सर्वतः केवलज्ञान-संप्रज्ञया
पुण्यपापक्षये प्राप्तमोक्षालयाः ।
मूर्तिमन्तः शुभांशा इव श्रीजिना-
स्ते मुदं सन्तु वः कान्तवस्तूचिताः ॥ २

वस्तु-सन्दोह-सन्देह-दावानलः
क्षीरधारा-धरस्फार-वारिच्छटा ।
सार्ववक्त्रेन्दु-पीयूष-धारा इवो-
त्तापनिर्वापणं कुर्वतां वो गिरः ॥ ३

धार्मिका-नल्पसङ्कल्प-कल्पद्रुमा
देवदेवी-भिरभ्यर्च्य-मानक्रमाः ।
कीर्ति-कोलाहल-व्याप्तदिङ्मण्डला,
मङ्गलं तन्वतां क्षिप्रमाखण्डलाः ॥ ४

(१२) (स्रग्विणी)

देवदेवाधिपैः सर्वतो भूषणैः
फुल्लकल्हारमन्दारकुन्दव्रजैः ।
कल्पशाखीव यः पूजितो दिद्युते,
शान्तिनाथो जिनः सोऽस्तु नः शान्तये ॥ १

सप्त तत्त्वानि पथ्यानि यान्यूचिरे
यैः कलौ रेजिरे तानि मुक्त्यर्थिनाम् ।
मोक्षशैले पदानीव गन्तुं सतां
ते जिनाः सन्तु नः सिद्धिसंसिद्धये ॥ २

नष्टदोषागमं वीतरागागमं,
भग्नभीसङ्गमं रागिभिर्दुर्गमम् ।
ज्ञानपाथोनिधिं श्रेयसां सेवधिं,
नश्यदापद्विधिं नौमि धर्मावधिम् ॥ ३

मानिता-मानिता संयतैरप्यलं
वन्दिता-वन्दिता मागधैः प्राणिभिः ।
देवता देवताराधिताङ्घ्रिद्वया,
भारतीभारती यच्छतात्सा वरम् ॥ ४

## पू.आ.श्री गुणसागरसूरिविरचिता

(१३)

श्रीशान्तिः शान्तिदो देवोऽनन्तदुःखमतां सदा ।
जीवानां यच्छताच्छान्ति, मह्यं सदातनी प्रभुः ॥ १

अष्टसत्प्रातिहार्या हि, पंचत्रिंशद्वचो गुणाः ।
जिनाः श्रिये चतुस्त्रिंशद्, महातिशयशोभिताः ॥ २

सत्यासत्यविवेकस्य, दात्री शान्तिसरस्वती ।
करोतु हृदि मे वासं, हेयोपादेयबोधदा ॥ ३

निर्वाणी भव्यजीवानां, निर्वाणसुखकाङ्क्षिणाम् ।
विघ्नहाऽनन्तनिर्वाण-गुणाप्त्यै मेऽस्तु सर्वदा ॥ ४

(१४)

श्रीशान्तिनाथस्य तमः प्रदत्त-प्रभूतमोदावघनोदकस्य ।
क्रमौ महामोहविषापहार-प्रभू तमोदावघनोदकस्य ॥ १

भवार्णवे मृत्युजरातरङ्गे सारम्भजन्मोदकराजिनावः ।
सुखं कृ(क्रि)यासुः सुरवन्दवन्द्याः
सारम्भजन्मोदकरा जिना वः ॥ २

तदस्तु जैनं मतमन्तहेतु-र्ममानवातङ्कवितानकस्य ।
यद्भेजुषः स्यात् कुमतद्रुमाणा-ममानवातङ्कविताकस्य ॥ ३

श्रीं(श्रियं) विधत्तां श्रुतदेवि(व)ता वः प्रभासमानच्छविभालकान्ता।
विद्वन्मनःकैरवबोधसोम-प्रभासमानच्छविभालकान्ता ॥ ४

(१५) (अत्युक्ताजातौ स्त्रीछन्दः)

दद्यादर्हन् शान्तिः शान्तिम् ॥ १

सार्वस्तोमं स्तौम्यस्ताघम् ॥ २

सिद्धान्तः स्ताज्जैनो मुक्त्यै ॥ ३

निर्वाणी वो विघ्नं हन्यात् ॥ ४

(१६) (वसन्ततिलका)

शान्तिं सदागमनिधिं परमाप्त-पूज्यम्,
स्फूर्जन्महोदयफलार्पण-कल्पवृक्षम् ।
तीर्थेश्वरं विजयरत्नगुरुं सुतारं,
ध्यायामि चित्तकमले, विमले सुखाढ्यम् ॥ १

(चतुर्शः उच्यते)

(१७) (दण्डक)

नमदसुरसुराधिपालीशिरःशेखराऽजिह्मरत्नौघ-
घृष्टांहिपीठप्रचण्डप्रतापप्रभूतप्रभावप्रमोदप्रवीण ! प्रशस्यः प्रभो !
यस्य कुत्राऽऽट नोमाभरः,
सुमहिम ! समतार ! ते हासमोहापदाहीनदोषापहारो-पमानो
दयोदार! शम्भोऽगदोऽभावतो मेऽयसारो मनोहारिगोत्रः सदा
देहि निःश्रेयसः श्रीवरोऽविग्रहः ।
त्रिभुवनभवनोदरोद्भूतभूतोडुपादित्यदैत्यामिता-मर्त्यमर्त्याधि-
वस्फूर्जदूर्ज-क्षयार्घोङ्गजन्मान्तकारी स विश्वोपकारी जिन ! त्वं
प्रणूतो नृपैः शान्तिनाथ ! व्यथा-
सुमहिमसमतारतेहासमोहापदाहीनदोषापहारोऽपमानोदयोऽदार!

शं भोगदो भावतोऽमेयसारोऽमनो ! हारिगोत्र ! सदादे !
हि निश्रेयसः श्रीवरोऽविग्रहः ॥ १

पदयुगलसरोवरे श्रीवरः सन्मते सन्मतेशान ! यस्या नयस्या
पदस्याऽऽपदस्याभमापल्लताया गतायास ! दीप्रोत्तमाङ्गोत्तमाङ्गं
जिनेन्द्रव्रजेहाऽमलत्वं तदाऽ-
रत ! सदय ! न मज्जनं कामदाहासनो नाकजातैः क्षमाधार !
भावारिवारेण निर्माय धीराजितैः सत्तमोनाशनारं
महानन्ददातारमत्रासमानं सदारैर्नतम् ।
हिमरुचिहिमहारिहारप्रभापुञ्जजैत्रस्फुरत्कीर्तिशुक्लीकृताशेषविश्वं
व्यधास्तीर्थनाथं समश्रीसनाथं महाशुद्धभावेन हीनमहीनं
सुरेन्द्रैः मृजन्निन्दिराऽ-
रत ! सदय ! नमज्जनं कामदाहासनो नाऽकजातैः क्षमाधार !
भावारिवारेण निर्माय धीराजितैः सत्तमोनाशनारं
महानन्ददातारमत्रासमानं सदाऽऽरैर्नतम् ॥ २

गुरुगुणगणरत्नरत्नाकरानन्ददाऽमन्दसाम्येन काम्येन
जेताऽपनेता सुदान्तेन कान्तेन जैनोऽनिशं त्वं निशान्ते
प्रशान्तेन नूतस्तमो येन निघ्नन्नविघ्नं हता-
शम ! सुगम ! भया जनारं भवारं सुधीरो गतापाय !
मायासनोदीनतारं महार्थागमोमाऽऽलयो भव्यपूर्वाङ्गरूपः
समाधिं रसासार ! विश्वेन रुच्या कृती राजतः ।
कलसकलकलाकलापेन कामं कलाकेलिदर्पप्रणाशी नतः
प्राज्यसाम्राज्यमग्र्यं स भुक्त्वा निसौम्योऽखिलज्ञानरत्नं

सुयत्नं किमारत् प्रधानो दधानो ददानो नृणां
शमसुगम ! भया जनारम्भवारं सुधीरोगतापाय-
मायासनोदी नतारं महार्थागमो मालयो भव्यपूर्वाङ्ग-
रूपः समाधिं रसासार ! विश्वेन रुच्याकृती राजतः ॥ ३

स्फुरदुरुतररोषरागादिमीनोत्करोल्लालिताघोदको
ल्लोलकल्लोलमालाकरालामितासार-संसारसिन्धुं
तरीतुं सुदक्षा सुपक्षा रते विघ्नतो देवते ! रक्षिताऽऽशु
भवति समहोदया श्रीमती तारवर्णा सुमुद्रामदाना
भया भासमानाऽ सदास्या भवत्यागतारा नभोगादराकान्त-
देहाऽक्ष-माजन्म-भीनाशदाऽनाशया सायया ।
वितरति जिनराजि भक्ता विमुक्तापदा सम्पदा हृद्यया
सद्दया सार्ववाचं यमानां सुवाचंयमानां निधानं प्रधानं
हितामीश्वरैस्त्वं नृतत्या दधत्या स्मृता;
सुभवति समहोदया श्रीमती तारवर्णा सुमद्रामदाना
भया भासमानाऽसदास्या भवत्यागतारा नभोगादराऽकान्त-
देहाऽक्षमाजन्मभी नाशदानाशया सायया ॥ ४

(१८) (स्रग्धरा)

तावज्जं जेणरज्जं जणजणिय सुहं वज्जियं अज्जियंपि
जेणाखण्डं छ खण्डं भरह गरिगणं साहियं बोहियं च ।
दुज्जोहं मोहमोहं निहणीय चरणं जो पवन्नो सुपन्नो,
सोसंती हेमकंती दिसऊ सिवसुहं सोममुति सुकित्ती ॥ १

उत्तंगे मेरूसिंगे कणय मणिमये भासुरेहिं सुरेहिं
ठावित्ता जे भिसित्ता गुणगणकलिया निम्मलेहिं जलेहिं ।
संसारं जे अपारं तरिय सिवपयं संपपन्ना सुपन्ना
ते भव्वाणं जणाणं सकरूणहियया दिन्तु मुक्खं सुसुक्खं ॥ २

हेउ दिट्ठंत सिद्धि नयगम कलियं सुप्पसत्थं महत्थं
बोहित्थं जं च सुत्थं नवजलहिं जले मज्जिराणं नराणं ।
नानालंगं सुरंगं विमलगुणगणं बारसंगं सुचंगं
तं अम्हाणं पहाणं हणऊ अणुदिणं मोहकुंडं पयंडं ॥ ३

जो सिग्घं संघविग्घं हणइ अणुदिणं सम्मदिट्ठी सुतुट्ठी
वेयावच्चं सुकिच्चं कुणई अणुदिणं जो पहाणं जिणाणं ।
जोच्छत्तं सुपवित्तं धरइ करयले चारूदंडं पयंडं
सो जक्खो दुट्ठरक्खो दिसउ मम सुहं बंभसंती सुकंती ॥ ४

पू.उपा.श्री वल्लभगणिविरचिता

(१९)

वाराणं वरणं रणं रणरणं वाराणं वीरणं,
कङ्कालं कुललं कलकलं कलं कीलं कोकिलम् ।
तं तानन्तननं तनं तनतनं संतानवीतानकं,
विद्योतं विदितं दुतं दितसुतं विद्याविनोऽदं विदुः ॥ १

वेतालं विरलं रलं रलरलं विस्तारतारं तरं,
चाणूरं चरणं चरं व्रणव्रणं वीकारकारागृहम् ।
मायामोहमयं मया मयमयां वात्सल्यवंशोद्भवं,
वृन्दं चामरमारमेरुमरणं मोरारिमारोत्सवम् ॥ २

लक्ष्मीलक्षणलक्ष्यलक्षणगुणं कल्याणवाणव्रणं,
वंशोद्धारवरं वरं वर वरं सेनासमूहक्षणम् ।
उद्यानं सदनं घनं घन घनं घानां घनं घं घनं,
केलीको ! ऽल कलं कचन्दनंवनं सल्लाच्छनं वाञ्छनम् ॥ ३

प्रज्ञापूरपराऽगरागरजकं राणारणं वारणं,
सर्गोत्सर्गकुमार्गमार्गभरणं भाराभिभूतं भणम् ।
व्यासायाऽमविकाशकासरसनं नासानसेसानसं,
कायाऽऽपाऽऽयविमायमायमसनं मायासमं मोसमम् ॥ ४

१७

## ॥ श्रीकुन्थुनाथजिनस्तुतिः ॥

(१) (तोटक)

वशी कुन्थुवती तिलकौ जगति, महिमा महती नत इन्द्रतती ।
प्रथितागम ज्ञानगुणा विमला, शुभवीरमता गान्धर्वबला ॥ १

(चतुर्शः उच्यते)

१८

# ॥ श्रीअरनाथजिनस्तुती ॥

पू.आ.श्री गुणसागरसूरिविरचिता

(१)

भवेऽन्त्ये तीर्थकृच्चक्री, चाऽभवच्छान्तिकुन्थुवत् ।
योऽष्टादशोऽरनाथः स, जयताद् भक्तिशान्तिदः ॥ १

महान्तो ब्राह्मणा गोपा, महान्तः सार्थपाः शिवाः ।
महान्तो मे श्रिये सन्तु, महानिर्यामका जिनाः ॥ २

अरेश्वरमुखोत्पन्ना, हृदयानन्ददायिनी ।
अरमुक्तिप्रदा वाणी, भूयान्मे हृन्निवासिनी ॥ ३

सम्यक्त्वधारिणीदेवी, धारिणी विघ्ननाशिनी ।
सङ्घस्याऽरपदाम्भोजकिङ्कर्यस्तु गुणाय मे ॥ ४

(२) (द्रुतविलम्बित)

अरविभुरविभूतलद्योतकं, सुमनसा मनसार्चितपङ्कजम् ।
जिनगिरा न गिरा परतारिणी, प्रणत यक्षपति वीर धारिणी ॥१

(चतुर्थः उच्यते)

११

## ॥ श्रीमल्लिनाथजिनस्तुतिः ॥

(१)

भरतावनिमण्डलमण्डन मल्लिजिनेश !
शुभकुम्भमहीपतिकुलकमलौघदिनेश ! ।
जनमन ईहितहितदानसुपर्वनगेश !
जय शिवशर्मप्रद कर्मपवनभुजगेश ॥ १

दिश शिवसुखममले जिनदिनमणिसमुदाय,
वरकरनिकरेण प्रतिहतनिखिलापाय ! ।
प्रतिबोधितभविकज कमनीयकाञ्चनकाय !
निजचलनमलिननतनाकिनरेशनिकाय ! ॥ २

संदर्शितदर्शनचरण-ज्ञान-नयाय
गणधररचितामृताधारसमसमयाय ।
भवदव-जलदोपमाय भविजनविहितदयाय
भक्त्यास्तु नमोऽस्मै ध्वंसित - सर्व-भयाय ॥ ३

धरणप्रिये ! देवि ! त्वं मम सौख्यमपारं
देहि नित्यं कमनीय-कमलागारम् ।
कृत-सङ्घ-हिते ! किल सफलीकृत-संसारं,
जिनसेवा निरते ! लाभविजय जयकारम् ॥ ४

# ॥ श्री मुनिसुव्रतस्वामिस्तुती: ॥

(इन्द्रवज्रा)

पू.आ.श्री गुणसागरसूरिविरचिता

(१)

सुव्रतैः सुमुनिव्रातैः सेवितौ सुतपस्विभिः ।
मुनिसुव्रतनाथस्य, शरण्यौ चरणौ श्रिये ॥ १

देवेन्द्रनतमौलिस्थमणीनां किरणैः सदा ।
सुरक्तौ चरणौ येषां, ते जिनाः सन्तु मे श्रिये ॥ २

मतिश्रुताऽवधिज्ञानं, मनःपर्यायकेवलम् ।
दद्याच्च सुव्रतेशस्य, गीर्या सा हृदि मे वसेत् ॥ ३

त्रिदशी नरदत्ता या भक्तानां वरदायिका ।
विघ्नहा सुव्रतस्वामि-शासने स्याद् गुणाय मे ॥ ४

(२)

सिरिमुणिसुव्वयसामि कामबाणेहिं अगंजिय
सिद्धिवहूनवरंगि अंगि कुंकुमरसि रंजिय ।
नीलुप्पलुदलशा(सा)मिवन्न सोभागसुसं(सुं)दरु ।
भरूयच्छि नयरि । समलीया विहारि वंदं परमेसर(रु) ॥ १

खंडियअट्ठनिकट्ठककम्म दुग्गइनिन्नासण ।
अट्ठमहावरपाडिहेर सोहइ फडसासण

सुरनरकिन्नर वहइं सेव कइभवभयपारा
तित्थसरति सयल हंतु मम दुखनिवारो ॥ २

जो जगलोयणं जगपईव जो जगह दिवायर जो
वंदिजइ सयलतित्थकारणि रयणायर जो
चिहु नाणिहि पट्टबंधि अगोसर किजइ
सो जिण आगमजंमि अम्ह सरणि भणिजइ ॥ ३

पारधीकिरभिल्लविधि समलीय भवंतरि(:) ।
हूय नवकारिहिं रायधूय सिंहलदीवंतरी
नियनामिहि निम्मविय जियए समलिया विहारो
करुस्युं दंसण दिवि संघह सा जयजयकारो ॥ ४

२१

## ॥ श्रीनमिनाथजिनस्तुती ॥

(१) (द्रुतविलम्बित)

नमिजिनाय नमः परमात्मने, भवतु योगवशीकृतयोगिने ।
कुशलशालिवनस्तनयित्नवे, भुवनभावनभासनभानवे ॥ १

अमलकेवललोचनलोकनाऽ-गलदमङ्गुलमङ्गलमञ्जुलाः ।
अवृजिना वृजिनाऽपहृतिं जिना,
ददतु वो महता-महताशयाः ॥ २

प्रवचनामृतपानमनन्तरं, कुरुत भूपरमाः परमार्हताः ।
भवति वो यत एव सुनिर्वृतिं,
विधिवताऽऽधिवतापि यदादृतम् ॥ ३

भगवती भवतु श्रुतदेवता, शिवशताय हिताय कृतादरा ।
विजयसेनगुरुक्रमसेविनां, सुमनसां मनसामभिनन्दना ॥ ४

(२) (द्रुतविलम्बित)

विजयते विजयाङ्गजतीर्थकृत्, परिकरोपरमः परमागमः ।
सुरवरः स्पृहणीयगुणोच्चयो, विजयसेनगुरोः कमलोदयः ॥१

(चतुर्शः उच्यते)

२२

## ॥ श्रीनेमिनाथजिनस्तुतयः ॥

(१) (स्रग्धरा)

राज्यं राजीमतीं च कजरज इवसूत्सृज्य यो यत्र संस्थः,
साम्यश्रीसिद्धसाध्यां विमलसकलसत्केवलालोकलोभ्याम् ।
लेभे लोकाग्रलभ्यामपि शिवयुवतिं तन्नवौन्नत्यभाजं,
श्रीनेमिं नौमि तं चाचलकुलतिलकं रैवतं तत्पवित्रम् ॥ १

पुण्यैः पुण्याऽनुबन्धैरिव भुवनमनो जन्यमानप्रसादैः,
प्रासादैर्वर्द्धमानोदयसुभगतया दूरमभ्रंलिहानैः ।
ये सन्मार्गं दिशन्ते भवगहनजुषां मोहभाजां जनानां,
ते तीर्थेशा जयन्तु त्रिभुवनमहिता उज्जयन्ताऽवतंसाः ॥ २

शैलश्रीरैवतोर्व्यां समवसृति-शिवानन्दनस्याऽऽस्य-जन्मां,
नव्यां भव्याङ्गिकोटेरिव निजलवतः काञ्चनाभां वितन्वन् ।
लोकं कल्याणपात्रं रस इव विदधे यो महाभाग्यलभ्यः,
श्रीसिद्धान्तः स भूयाद् भुवनभवभृतां दुःखदौर्गत्यभेदी ॥ ३

या विप्रा साधुदानात्कुपितपतिकृताऽवज्ञया मुक्तगेहा,
यान्ती श्रीउज्जयन्तेऽनशनविधिभृता तीर्थमाहात्म्ययोगात् ।
देवीत्वं प्राप सद्यस्तदनु कृतरतिस्तत्र तीर्थे कृतज्ञा,
श्रीमन्नेमीशभक्ता भवतु शिवकृते सङ्घलोकस्य साऽम्बा ॥४

(२) (स्रग्धरा)

सत्पद्याहस्तयुक्तो नगनिकरगडो निर्झरोद्दानवारि,
जीयाच्चैत्योच्चकुम्भो जगति चिरमसावुज्जयन्तो गजेन्द्रम् ।

यत्रोपर्यासनस्थो यदुकुलतिलकः शीलसंवर्मिताऽङ्गो,
नेमिर्विश्वैकवीरस्त्रिभुवनदमनाऽनङ्गजेता चकास्ति ॥ १

शैलश्रीरैवताऽऽख्यजिनगृहविसरो-तुङ्गशृङ्गाग्रसंस्था,
स्फूर्जच्चञ्चन्मरीचिः सुकनककलशश्रेणिरुद्योतिताऽऽशा ।
मोक्षाध्वप्रस्थितानां जगति तनुभृतां दुस्तमःस्तोमभेत्री,
भूयादुच्चस्थितिस्था प्रवरमणिमयी दीप्रदीपालिकेव ॥ २

सत्सूत्रार्थः सुवर्णोत्तमपदकवराऽलङ्कृतश्रीनिवासो,
नित्यं यो माननीयः सुरनरविसरैर्देवताऽधिष्ठितश्च ।
सिद्धान्तो ह्यप्रमेयैर्निधिरिव सुमहान्दुःखदौर्गत्यहन्ता,
भव्यानां सोऽस्तु चित्रं परपदमवनौ यक्षमाभूमिरेषः ॥ ३

पत्युर्भीतोज्जयन्तं प्रति परिचलिता नेमिनाथं स्मरन्ती,
या देवीत्वं प्रपेदे द्विजवरदयिता मृत्युमासाद्य सद्यः ।
पुत्राङ्का चाऽऽम्रलुम्बी-कलितकरतला प्रौढसिंहाधिरूढा,
कूष्माण्डी नामदेवी दुरितभरहरा साऽस्तु सङ्घस्य नित्यम् ॥४

(३) (स्रग्धरा)

राज्यं राजीमतीं च त्रिदशशशिमुखीगर्वसर्वंकषां यः,
प्रेमस्थामाऽभिरामां शिवपदरसिकः शैवक(केवल?)श्रीवुवूर्षुः।
त्यक्त्वा चोद्दामधामा सजलजलधरश्यामलस्निग्धकाय-
च्छायः पायादपायादुरुदुरितवनच्छेदनेमिः सुनेमिः ॥ १

दातारो मुक्तिलक्ष्मीं मदमदनमुखद्वेषिणः सूदितार-
स्त्रातारः पापपङ्कात्त्रिभुवनजनतां स्वश्रिया भासितारः ।
स्रष्टारः सद्विधीनां निरुपमपरमज्योतिषां वेदितारः,
शास्तारः शस्तलोकान्सुगतिपथरथं पान्तु वः तीर्थनाथाः ॥ २

पीयूषौपम्यरम्यां शुचिपदपदवीं यस्य माधुर्यधुर्यां,
पायं पायं व्यपायं भुवि विबुधजनाः श्रोत्रपात्रैः पवित्रैः ।
जायन्ते जाड्यमुक्ता विगतमृतिरुजः शाश्वतानन्दमग्नाः,
सोऽयं श्रीधाम कामं जयति जिनवचःक्षीरनीराब्धिनाथः ॥ ३

या पूर्वं विप्रपत्नी सुविहितविहितप्रौढदानप्रभाव-
प्रोन्मीलन्पुण्यपूरैरमरमहिमा शिश्रिये स्वर्निवासम् ।
सा श्रीमन्नेमिनाथप्रभुपदकमलोत्सङ्गशृङ्गारभृङ्गी,
विश्वाऽम्बा वः श्रियेऽम्बा विपदुदधिपतद्दत्तहस्ताऽवलम्बा ॥४

(४) (द्रुतविलम्बित)

कमलवल्लपनं तव राजते, जिनपते ! भुवनेश ! शिवात्मज ! ।
मुकुरवद् विमलं क्षणदावशात्, हृदयनायकवत् सुमनोहरम् ॥१

सकलपारगताः प्रभवन्तु मे, शिवसुखाय कुकर्मविदारकाः ।
रुचिरमङ्गलवल्लिवने घनाः, दशदिशङ्गमगौरयशोधराः ॥ २

मदनमानजरानिधनोज्झिता, जिनपते ! तव वागमृतोपमा ।
भवभृतां भवताच्छिवशर्मणे, भवपयोधिपतज्जनतारिका ॥ ३

जिनपपादपयोरुहहंसिका, दिशतु शासननिर्जरकामिनी ।
सकलदेहभृताममलं सुखं, मुखविभाभरनिर्जितभाधिपा ॥ ४

(५) (द्रूतविलम्बित)

भुवनमोहनरूपमनोहरं, सकलमङ्गलवल्लिपयोधरम् ।
त्रिभुवनामितकामितदायकं,
नमत नेमिजिनं जिननायकम् ॥ १

विमलकेवलकेलिविभासुराः, पदसरोजविनम्रसुरासुराः ।
स्मरपराभवभङ्गजिनेश्वराः, जगति जातु जयन्तु जिनेश्वराः ॥२

बहुलमोहमहाजलतारणं, विपुलपातकजातनिवारणम् ।
जनितमुक्तिपुरीपथदर्शनं, भजत भव्यजना ! जिनदर्शनम् ॥३

विकटसङ्कटकोटिविनाशिनी, प्रकटपर्वतरैवतवासिनी ।
जिनमतस्य मतस्य विलम्बिका,
मम ददातु सदा सुखमम्बिका ! ॥ ४

(६) (द्रुतविलम्बित)

यदु कुलाम्बर भासन भास्करो,
जनि शिवानि शिवातनयः सृजन् ।
नयतु नेमिजिनो जिन सम्पदं,
सुजन मञ्जन मञ्जु तनुत्विषिः ॥ १

सकल भव्य तमोभर भास्करा,
जन चकोर मुदेक निशाकराः ।
तनुमतां नमतां ददतां श्रियं,
जिनवरा नवराग विदारिणः ॥ २

नय वितानमणी रमणीयतां,
विदधतं गमभङ्ग समाकुलम् ।
भगवतां सकलाङ्ग भृतान्दया,
रसमयं समयं जलधि श्रये ॥ ३

जिन पदाम्बुज पराग मधुव्रता,
कवि कलाम्र विलास वनप्रिया ।

शमयतामशिवं शिवकारिणी,
श्रुत सुरित सुरीजन मुख्यता ॥ ४

## बृहच्छान्ति-मेघदूतयोः पाद-पूर्तिः

### (७) (मन्दाक्रान्ता)

भो भो भव्याः शृणुत वचनं प्रस्तुतं सर्वमेतत्-
श्रीमन्नेमिक्रमकमलयोः कामिताप्त्यै सपर्याम् ।
भक्ताशक्त्याऽतनु वितनुत स्वान्तशुद्धिं विधाय
स्निग्धच्छाया तरुषु वसती रामगिर्याश्रमेषु ॥ १

ये यात्रायां त्रिभुवनगुरोरार्हता भक्तिभाजः,
तीर्थे तीर्थे विहितमतयस्तीर्थनाथव्रजस्य ।
लब्ध्वा तीर्थाधिपतिपदवीमुच्चकैस्तैर्वृषोक्तौ
नूनं यास्यत्यमरमिथुनं प्रेषणीयामवस्थाम् ॥ २

तेषां शान्तिर्भवतु भवतामर्हदादिप्रभावात्,
पूर्वाचार्यैर्लघु-विरचितं वाङ्मयं ये पठन्ति ।
ते च स्वर्गे भृशमनुभवन्त्यद्भुतानन्दभाजः,
सोत्कण्ठानि प्रिय-सहचरी-सम्भ्रमालिङ्गितानि ॥ ३

आरोग्य-श्री-धृति-मतिकरी क्लेशविध्वंसहेतु-
र्भूयाद् देवी भुवन-विदिता श्रीमती साऽम्बिकाख्या ।
ऊरूस्थाय्यात्मज-युगयुता दिव्यरूपाभिरामा
तन्वी श्यामां शिखरदशना पक्वबिम्बाधरा श्रीः ॥ ४

## पू.आ.श्री बप्पभट्टसूरिविरचिता

### (८) (मालिनी)

सुकृतसुरविहारं मुक्तिरामोपहारं,
भवभयभयहारं त्यक्तचण्डप्रहारम् ।
प्रणमत सुकुमारं निर्जितोद्दाममारं,
जिनवरमुनिसारं नेमिनाथं कुमारम् ॥ १

प्रहतजडिममुद्रा ज्ञानसम्पत्समुद्राः,
प्रणतजनितभद्रा मोहनिद्रादरिद्राः ।
मदनकरिमृगेन्द्रा भी-मरुत्पन्नगेन्द्राः,
विनतसुरनरेन्द्राः शान्ति-भूत्यै जिनेन्द्राः ॥ २

निहतकुमतमानं विष्टपैस्स्तूयमानं,
जिनमतमसमानं भव्यपोतायमानम् ।
कुगतिबिल-पिधानं सूक्तमुक्तानिधानं,
श्रयत शिवनिधानं विश्वविश्वप्रधानम् ॥ ३

कुवलयनयनायाः पूर्णचन्द्राननायाः,
रूचिजिततपनायाः सिंहसद्वाहनायाः ।
स्मरत सुरनताया नेमिसेवाद्युतायाः,
प्रतिहतदुरिताया अम्बिकादेवितायाः ॥ ४

## पू.मु.श्री लक्ष्मीविजयविरचिता

### (९) (नगस्वरूपिणी-प्रमाणिका)

प्रचण्ड-मारवारकं, कुदर्पवार-दारकम् ।
सुरेन्द्र-सेवितं सदा, शिवासुतं भजे मुदा ॥ १

अनन्त-शर्मदायकाः प्रशस्त-धर्म-नायकाः ।
अवद्यभेदका इना, जयन्ति ते समे जिनाः ॥ २

अनेकतापनाशनं, कुवासना-विनाशनम् ।
सुपर्वराज-संश्रुतं, स्तुवे जिनोदितं श्रुतम् ॥ ३

विशाललोचनाऽम्बिका, कजानना वराङ्गना ।
नताप्तपत्कजाऽचलां, श्रियं दधातु वोऽमलाम् ॥ ४

(१०) (अनुष्टुप्)

नमामि नेमिनाथस्य, पाद-युग्मसरोवरम् ।
नखरोचिर्जलं पद्म-शङ्खचक्रोपशोभितम् ॥ १

निशानिशाकराकार-मुखाः सुखमखण्डितम् ।
दिशन्तु तीर्थनाथा वः शिवशर्मफलद्रुमाः ॥ २

विचारावर्त्तसंवर्त-मग्नैकान्तमतं मतम् ।
करोतु मम वीरस्य, वचो रत्नाकरोपमम् ॥ ३

अम्बा बालाङ्किताङ्काऽसौ सौख्यख्यातिं दधातु नः ।
माणिक्यरत्नालङ्कार-चित्रसिंहासनस्थिता ॥ ४

(११)

व्रतापगासागरनेमिनाथो, घनाघघासज्वलनः कृपालुः ।
शुभङ्करः पुण्यवतां जनानां, निहन्तु मे कर्मरिपून्व्रतस्य ॥ १

जिनेन्द्रवर्गः प्रथितोरुभर्गः कृतापवर्गः कृतबोधिसर्गः ।
सुमार्गविश्राणनदत्तचित्तः, चिदेकवित्तो जयताज्जगत्याम् ॥ २

परागमाबाधितसङ्गतार्था, विकाशिताशेषपदार्थसार्थाः ।
रुचिं श्रुतस्यार्हतवाक् सदैव, तनोतु शुद्धां शमिनां हृदीद्धाम् ॥३

मनोहरार्चिर्हरिवाहनाऽम्बा, रसालवृक्षाभिरतिं दधाना ।
जिनेशभक्तेषु हितं प्रदात्री, श्रुतान्तरायान् हरतात्समुत्थान् ॥ ४

(१२)

तवं येनाक्षतधीरिमा गुणनिधिः, प्रेम्णा वितन्वन् सदा,
नेमेऽकान्तमहामना विलसतां, राजिमतीरागतः ।
कुर्यास्तस्य शिवं शिवाङ्गज ! भवाम्भोधौ न सौभाग्यभाग्,
नेमे ! कान्तमहामऽनाविल ! सतां, राजिमतीरागतः ॥ १

जीयासूर्जिनपुङ्गवा जगति ते, राज्यर्द्धिषु प्रोल्लस-
द्धामानेकपराजितासु विभया-, सन्नाभिरामोदिताः ।
योधालीभिरुदित्वरा न गणिता, यैः स्फातयः प्रस्फुर-
द्धामानेकपराजितासु विभया सन्नाभिरामोदिताः ॥ २

या गङ्गेव जनस्य पङ्कमखिलं, पूता हरत्यञ्जसा,
भारत्याऽऽगमसङ्गता नयतता,- मायाचिता साऽधुना ।
अध्येतुं गुरुसन्निधौ मतिमता, कर्तुं सतां जन्मभी-
भारत्यागमऽसङ्गता न यतता, माऽऽयाचिता साधुना ॥ ३

व्योम स्फारविमानतूरनिनदैः, श्रीनेमिभक्तं जनं,
प्रत्यक्षामरसालपादपरतां, वाचालयन्ती हितम् ।
दद्यान्नित्यमिताऽऽम्रलुम्बिलतिका-विभ्राजिहस्ताऽहितं,
प्रत्यक्षामरसालपादपरता-, ऽम्बा चालयन्तीहितम् ॥ ४

(१३)

जित मद नम नेमे, तानि सन्नाथ नेमे,
निरुपम शम नेमे, येन तुभ्यं विनेमे ।
निकृत जलधि नेमे, सीर मोहद्र नेमे,
प्रणिदधति न नेमे, तं परा अप्यनेमे ॥ १

विगलीत व्रजिनानां नौमि राजीं जिनानाम्,
सरसज नयनानां, पूर्ण चंद्राननानाम् ।
गजवर गमनानां, वारिवाह स्वनानाम्,
हत मद मदनानां, मुक्त जीवासनानाम् ॥ २

अविकल कल तारा, प्राणनाथं सु तारा,
भवजलनिधि तारा, सर्वदा विप्र तारा ।
सुर नर विन तारा, त्वार्हति गीर्बतारा,
दनवर तमि तारा, ज्ञान लक्ष्मी सुतारा ॥ ३

नयन जीत कुरंगि, कांशु धारे चिरंगि,
मिह किल मुह रंगि, कृत्य चित्तां तरंगि ।
स्मृतिः सुचिरंगि, देवतां य स्तुरंगि,
कुरुत इम मुरंगि, त्यादि कृत बंधु रंगी ॥ ४

पू.आ.श्री गुणसागरसूरिविरचिता

(१४)

नेमीश नामिताजय्य-शत्रुव्रात विमानकः ।
मुक्तिस्त्रीरक्त नीराग व्रतीन्द्र त्वां नमाम्यहं ॥ १

निरालम्बा निराबाधा निर्ममा निर्विकारका ।
निर्व्याजाः प्राप्तनिर्वाणा ये भक्त्या स्तौमि तान् जिनान् ॥ २

सुदेवं सुगुरुं सम्यग्-धर्मं जानन्ति तारकम् ।
यस्याः सामर्थ्यतो भव्याः नेमिगीः सा वसेद्हृदि ॥ ३

कान्ति भासुरदेहा या मृगेन्द्रवाहना सुरी ।
भक्तेष्टकल्पवल्ली साम्बिका भूयाद् गुणाप्तये ॥ ४

(१५)

संसाररागसंहारी कामकुञ्जरकेसरी ।
नेमी तमालसच्छायो हन्तु मे भवसंभवम् ॥ १

भिन्नभावारिसंरम्भच्छिन्नमोहमहीरुह ! ।
वरकेवलिसोदाह कुरु मे मङ्गलावलिम् ॥ २

भूरिसंगगमं भूयो नयसंचयसंकुलम् ।
रीणरागागमं वन्दे(ऽ)हं संदेहतिमिरे रविम् ॥ ३

नीहारहारधवले ! फुल्लतामरसालये ! ।
सरोरुहकरे ! चारु सुबुद्धिं देहि देवि ! मे ॥ ४

(१६) (अत्युक्ताजातौ स्त्रीछन्दः)

नेमिं नाथं वन्दे बाढम् ॥ १

सर्वे सार्वाः सिद्धिं दद्युः ॥ २

जैनी वाणी सिद्ध्यै भूयात् ॥ ३

वाणी विद्यां दद्याद् हृद्याम् ॥ ४

(१७) (अत्युक्ताजातौ स्त्रीछन्दः)

नेमिनाथं वन्दे बाढम् ॥ १

सर्वे सार्वाः शं मे दद्युः ॥ २

सार्वं वाक्यं कुर्यात् सिद्धिम् ॥ ३

कल्याणं मे दद्यादम्बा ॥ ४

(१८)

पू.मु.श्री कमलविजयविरचिता

जय नेमिजिनेश्वर ! समुदयसमयाचार ! ॥ १

यतनाहूतपातक ! केवलकमलागार ! ॥ २

वन्दारुसुरासुरविपुलविलासविहार ! ॥ ३

तीर्थङ्करपदकजपुष्पन्धयमन्दार ! ॥ ४

पू.उपा.श्री जयसागरविरचिता

(१९) (द्रुतविलम्बित)

सकलभावमहावनगाऽरतः, सकलभाव महाऽवन गारतः ।
सकल भावमहावनगारतः शिवसुखं वितनोतु शिवाङ्गजः ॥१
(चतुर्शः उच्यते)

(२०)

नानामानमने ममानन मुनीनामानिनामोममम्,
नामाऽनिम्नमऽनूनमौनमऽनिमन्नामं नमामोऽनमम् ।
मीनानं मम(न) मानमीनमममं नाऽमीमनन्मानिनो
मोमानं ननु मानिनीनमिमनो मिन्नाननं नेमिनम् ॥(शा.वि.) १

(२१)

पू.मु.श्री आनन्दवल्लभविजयविरचिता

गञ्जेजीममण्डननेमिनाथस्तुतिः

गञ्जेजीममुखे सदा हितकरे चैत्यालये संस्थितं,
सद्दण्डैः कलशैर्गवाक्षकटकैः संशोभितं सर्वदा ।
शङ्खाङ्केन युतं शिवासुतमहं वन्दे सदा पावनं,
श्रीमन्तं जगदुत्तमं यदुपतिं श्रीनेमिनाथं जिनम् ॥ (शार्दूल.)१

(२२) (शार्दूलविक्रीडित)

मुत्ता जेणितिणं व सिद्धि रमणी संगिच्छुणा जुव्वणे,
कंदंती करूणं सिणेह-विहुरा राईमई कन्नया ।
उज्जिंते चडिउण चारुचरणं नाणं च जो पावीओ
पत्तो सिद्धिसुहं स होउ सरणं अम्हाण नेमीजिणो ॥ १

निच्चंतामर सुंदरीहि सुहओ मेरूम्मि जम्मुसवो
जेसिं सव्वसुरा किरिंसु हरिसा फुक्लंति चित्तंतणं ।
जे निक्कारणबंधुणो जयमिणं भावारि निट्ठावणे
ते अम्हिं भवपारगा भवलयं सुंभतुं तित्थंकरा ॥ २

जस्सिक्कंपि पयं पयच्छए वरं संपाविउं पाणिणो
पत्ता पारमणंतंसो भवमहासिंधुम्मि भीमे सया ।
सो अम्हं निहणेउ मोहपसरं भावारिनिट्ठावणं
दिंताऽणेयकुतित्थदंतिदलणो सिद्धंत पंचाणणो ॥ ३

जा कुन्देन्दुतुसारहार धवला संपुन्न चंदाणणा
फुल्लिंदीवर-सत्थ-पुत्थयहरा नीसेस नाणब्भवा ।
साणंदं विबुहेहि वंदियकमा हुज्जंम्ह साणुग्गहा
सा निच्चं सुयदेवया भगवई सण्णाणदाणे रया ॥ ४

# ॥ श्रीपार्श्वनाथजिनस्तुतयः ॥

(१) (द्रुतविलम्बित)

सकलमङ्गलकेलिनिकेतनं, जिनवरं नवरङ्गधरं परम् ।
नुतिपथं गमयाम्यमयामितं, भुजगकुण्डलिनिपरिसेवितम् ॥१

विपुलकेवलकेलिविभासितं, श्रवणमङ्गलकुण्डलतां वहत् ।
सुभगपारगमण्डलमुत्तमं, गुणमणिरमणीयमलं शुभेत् ॥ २

रसमयः समयः समयः सतां, सरससिद्धरसोपमसङ्गमः ।
जिनमतो वटपाटवमुत्कटं, वहति वर्णसुवर्णगुणालयः ॥ ३

कनककुण्डलिनीनलनीसमा, सदमरी भ्रमरी मधुरी कृता ।
अमलकेवलकोमलपद्मभृत्, जय जयारव केसरसाररुग् ॥ ४

## ॥ श्रीशङ्खेश्वरपार्श्वजिनस्तुतिः ॥

(२) (द्रुतविलम्बित)

मदमहीधरदारणसत्पविं, मदनमत्तमतङ्गजसत्सृणिम् ।
रुचिरशङ्खपुरी भुवि नायकं, जिनवरं प्रणमामि सुखप्रदम् ॥१

विमतिकर्दमशोषणभास्कराः, विविधविज्ञवितानसुसेविताः ।
कठीनकर्ममहीरुहसिन्धुराः, जिनवरा विभवाय भवन्तु मे ॥२

जिनवरैर्गदितं सुजिनाऽऽगमं, विपुलभङ्गसुसङ्गसमन्वितम् ।
विविधजीवदयारसबन्धुरं, सकललोकहितं प्रणमाम्यहम् ॥ ३

प्रभुपदाऽम्बुजभृङ्गसमोपमो, निखिलविघ्नविघातनसोद्यमः ।
प्रवरशङ्खपुरीस्थजिनानुगः, स मम पार्श्वसुरोऽस्तु सुखप्रदः ॥४

॥ जेसलमेरमण्डनश्रीपार्श्वजिनस्तुतिः ॥

(३) (द्रुतविलम्बित)

शमदमोत्तमवस्तुमहापणं, सकलकेवलनिर्मलसद्‌गुणम् ।
नगरजेसलमेरविभूषणं, भजत पार्श्वजिनं गतदूषणम् ॥ १

सुरनरेश्वरनम्रपदाम्बुजाः, स्मरमहीरुहभङ्गमतङ्गजाः ।
सकलतीर्थकराः सुखकारका, इह जयन्ति जगज्जनतारकाः ॥२

श्रयति यः सुकृती जिनशासनं, विपुलमङ्गलकेलिविभासनम् ।
प्रबलपुण्यरमोदयधारिका, फलति तस्य मनोरथमालिका ॥३

विकटसङ्कटकोटिविनाशिनी, जिनमताश्रितसौख्यविकाशिनी ।
नरनरेश्वरकिन्नरसेविता, जयतु सा जिनशासनदेवता ॥ ४

पू.मु.श्री शान्तिविमलविरचिता

॥ श्रीअजारापार्श्वजिनस्तुतिः ॥

(४) (द्रुतविलम्बित)

नमत पार्श्वजिनं जगदीश्वरं, सुरवरैः स्तुतपादसरोरुहम् ।
निजयशो-धवलीकृतविष्टपं, लसदजापुरचारुविभूषणम् ॥ १

ददतु मे परमां सुखसम्पदं, जिनवरा जितमोहमहाभटाः ।
कुसुमबाणगजेन्द्रगजारयः, सकलमङ्गलवल्लिवनोपमाः ॥ २

जिनवरागमवारिधरो वरो, जयतु लोकमनोमलशोधकः ।
विविधभद्रमहीरुहवर्धकः, भविकलोकमयूरसुमोदकः ॥ ३

वितनुतां धरणेन्द्रवधूः सदा, परमुदं भविकस्य नताऽमरा ।
सुरवधूव्रजसेवितसत्पदा, सकलविघ्नविनाशनतत्परा ॥ ४

(५)

निष्ठुरकमठमहासुर–विदलितमानं प्रनष्टकर्मरिपुम् ।
पार्श्वं नतोऽस्मि शिरसा, सम्प्राप्तानन्तसौख्यपदम् ॥ १

येषां नामग्रहणात्प्रलयं, यान्तीह सर्वदुरितानि ।
ते नो दिशन्तु भद्रं, जिनेन्द्रचन्द्राः सदा विपुलम् ॥ २

या श्रूयते प्रहृष्टैर्विगलितमहामोहमत्सरैः सत्त्वैः ।
सा वाग् भवभीतिहरा, नित्यं सुखदाऽस्तु मम जैनी ॥ ३

रुच्येन्द्र(?)नीलवर्णा भुजगा–ऽऽभरणैः कृताऽऽवयवशोभा ।
वैरुट्या मे भद्रं, ददातु धरणेन्द्रवरपत्नी ॥ ४

(६) (मालिनी)

कृतजलधरधारा–धोरणीरुद्धदेहो,
जयति जयति कायोत्सर्गकाले सपार्श्वः ।
किमु शमरसमग्नो नूनमाकण्ठमेतां,
जनयति जनशङ्कां कान्तिकान्ताङ्गलक्ष्मीः ॥ १

सुरविरचितहेमाम्भोजबद्धप्रचारा,
विहरणभुवि येषां सूचयन्त्यंह्रिपद्माः ।
विमलकमलजालं निर्जितं तेन चास्मान्,
महति शिरसि सोऽयं जैनवर्गः पुनातु ॥ २

समवसरणभूमौ यां निशम्यामरेन्द्राः,
दधति पुलकजालं चित्तवित्तस्वचित्ताः ।
उपशमरसधाराऽऽसारधारच्छटाभिः,
प्रकटितपुलका किं जैनगीः सा पुनातु ॥ ३

नमदमरपुरन्ध्रीभूरिभालाग्रजाग्रन्-
मृगमदपददम्भात्पादपीठे दधौ या ।
नतजनपठनाऽवच्छेदिकर्माणि बद्ध्वा,
विनयिनि मयि सा गीर्जाड्यजालं च्छिनत्तु ॥ ४

(७) (मालिनी)

अमरगिरिशिरःस्थस्फारसिंहासनस्थ-
समुदितसुमनोभिः स्नापितो यः पयोभिः ।
विलसदतुलभक्त्या विस्मयाधायिशक्त्या
स जगति जिननाथः पातु वः पार्श्वनाथः ॥ १

भुवनतिलक कल्पा ये गुणौघैरनल्पा
जनजनितसपर्याः कोमलालापवर्याः ।
जितरतिपतिरूपा ज्ञानलोकस्वरूपाः
प्रणतसुरनरेन्द्राः पान्तु वस्ते जिनेन्द्राः ॥ २

सुललितपदयुक्त्या सर्वदोषैर्विमुक्त्या
सकलगुणसमेता चारुवाक्यैरुपेता ।
जडमतिभिरगम्या कामिनीगीतरम्या
जिनमतिकजनानां पातु वाणी जिनानाम् ॥ ३

अतिमुदितमरालं गन्धकृष्णालिमालं
विमलदलकरालं प्रोल्लसद्दीर्घनालम् ।
कजयुगमपि हस्ते या दधौ सुप्रशस्ते
वितरतु ललिताङ्गी सा श्रुतं विश्रुताङ्गी ॥ ४

(८) (मालिनी)

भुवन-वलय-वर्या मेदिनी हर्षपूर्याः
सुरवर - कृतसेवः सार्व - वामेय - देवः ।
निवसति बत यत्र ध्वस्तमानैकः शत्रुः
फणपति-फण-रत्नद्योत-धूतद्युरत्नः ॥ १

विबुध - वरसपर्यान्, पापपङ्कोष्णसूर्यान्
सकल-जिनवरेन्द्रान् पुण्यपाथोधिचन्द्रान् ।
नमत भुवन-हारान् ध्वस्तमारप्रचारान्
शिवपुर-पथ-दीपान् मोहमल्लप्रतीपान् ॥ २

जिनपतिमतमेकं जाततत्त्वातिरेकं
वरशमरससारं छिन्न-मोहान्धकारम् ।
शिवपदरथतुल्यं कामभूमीशशल्यं
प्रणमत सुर-कुम्भं सत्य-भास्वद्विदम्भम् ॥ ३

नतजिन- पद-पद्मा देवता पातु पद्मा
सकल-भविक - लोकं वीतनिःशेषकोपम् ।
प्रसृमरभयविघ्ना-धर्मपापप्रतिघ्ना
कुवलयदलवर्णा कुण्डलोद्भासिकर्णा ॥ ४

(९) (मालिनी)

निहतभवनिवासं, नीलराजीवभासं,
कृतभुवनविकासं, दूरमुच्छिन्नहासम् ।
पणमह जिनपासं, देहमापू रियासं,
सवणमहुरभासं, खीणसव्वप्पयासं ॥ १

हतनतभवकारं, प्राप्तनिर्वृत्यगारं,
स्तुतजिनवरवारं, क्लृप्तमोहापहारम् ।
धुयमयणवियारं, सत्तकारुण्णसारं,
बहुमुणिपरिवारं, सिद्धरामोरुहारम् ॥ २

त्रिदशविहितनामं, पूरिताऽनेककामं,
श्रुतमपहृतकामं, संश्रयध्वं निकामम् ।
पडिहयनयवामं, दिण्णनिव्वाणरामं,
कयदुरियविरामं, सव्वलोयाभिरामम् ॥ ३

जडिमजलधिनावं, प्राज्यदीप्रप्रभावं,
भवतरुवनदावं, चन्द्ररोचिः स्वभावम् ।
पवरगुणकलावं, संवहन्ति अपावं,
कुणउ विगयतावं, भारई तुम्ह भावम् ॥ ४

(१०) (स्रग्धरा)

भां भां भेरीमृदङ्गं पटु पटु हर दृदृदूरी कंसनादं,
कंसालोत्तारभाराखमुखर वां बद्धकोलाहलं च ।
यस्याग्रे चाऽऽसमन्तात्फणपतिपतितो वादितं सप्रमोदं,
स श्रीमान्पार्श्वनाथः परमसुखमुदं भास्वतं वः प्रदेयम् ॥ १

पापारिसारिपापा पमपमगरिसा सारिपापाधिमासा,
गागापापामुरारैः समहिममुनिरे नीतिखाखाधिनीते ।
इत्येवं जन्मकाले गिरपतिशिखरे वीणया गीतमिश्रैः,
येषामग्रे प्रमोदात् प्रविदधति सुखं शाश्वतं ते जिनेन्द्राः ॥ २

वेणावेणीप्रणेद्वैः मधुरवररवं भूरि भास्वत् मृदङ्गं,
पर्यस्तु ध्वस्तकान्तं स्तनतटशुभगं कंसिकोत्तालभारम् ।

वर्तन्तीभिः सलिलं प्रबलबलवशाद् भृतधामाङ्गुलिभिः,
गीर्वन्दे वागभाभिर्यदमलमुरतातज्जिनानां गतं वः ॥ ३

द्रग्भाद्रिद्धान्द्रिद्रग्भां करमतकरताद्रद्रदोषां ददोषः
रिन्दां रिन्दां द्रिदुर्गां गुडुगुडुगुडुदां द्रःकटैद्रःकटैद्रः ।
एवं वादित्रनादैर्बधिरयति मुदा कानिलैः लावकाशाः,
ये यक्षाः स्नात्रकाले विविधपतिपते आर्हतः पात सौवम् ॥४

(११) (स्त्रग्धरा)

मायातुङ्गीनिरासे खरकिरणतुला-रोहिणं छिन्नभोगा-
सङ्गं गङ्गातरङ्गामलगुणनिलयं रागनागोरगारिम् ।
संसारोदार-नीरालय-गुरुतरणिं भावसारं निकामं,
सेवे वामेयदेवं हरगल-वलवच्छायकाया-भिरामम् ॥ १

निस्सीमं धारयन्ती बलमखिल-कलाभूरुहाराममभूमि-
र्भासा सिन्धूरधूली-भिसलहिम-महानील-हेमाभदेहा ।
गङ्गा-कल्लोलमाला-धवलगुण-गणा हन्तु वो भावरोगा-
भोगं वन्दारुदेवा-सुरनर-विसरा बुद्धसेव्यार्हदाली ॥ २

भूयो भावारिपीडा-निबिडतमतमो-वार-संहार-केली-
हेलि-हेलानिरुद्धाखिल-कुनय-परीणाममुद्दामधाम ।
अच्छिन्नं देवदेवागम-मुरुकरुणावल्लरीवारिवाहं,
वन्दे सन्देहदावानल-बहुल-जलासार-माकालसिद्धम् ॥ ३

लीलाखेलं मरालं परिमल-कमला-लोक-रोलम्बपाली-
गुञ्जद्गेयाभिरामं हिमधवलदलं सारसंचारयन्ती ।
हे हे नीहार - हारच्छविहरणचणं भासमूहं वहन्ती,
भीमं सम्मोहजालं सरसिजसुधरा हन्तु वो वाणिदेवी ॥ ४

## श्रीपुरपार्श्वनाथस्तुतयः-१

### (१२) (स्रग्धरा)

श्रीमान् श्रीश्रीपुराह्वक्षितितलललनाभालभूषाविशेष,
प्रेङ्खल्लक्ष्मीललामाप्रतिमनिरुपमज्ञानविज्ञात(न)मे(यः)यं ।
शश्वत् श्रीपार्श्वविश्वत्रितयजनमतोऽभीष्टशिष्टार्थदाने
जीयाः कल्पद्रुकल्पस्त्वमिह जिनपते ! जाग्रदुद्रप्रभावः ॥ १

लोकालोकप्रकाशप्रकटनपटिमाश्लिष्टविज्ञानलक्ष्मी-
माश्लिष्याऽशेषसौख्यां शिवपुरविभुतामाशु येऽशिश्रियन्ते ।
तेऽमी श्रीमज्जिनेन्द्राः सकलसुरवरश्रेणिवन्द्यांह्रिपद्माः,
श्रेयो विश्राणयन्तु श्रितजनवितते रम्यमश्रान्तमेव ॥ २

नानाऽर्थस्फाररत्नप्रकरपरिचितः स्फूर्जदूर्जस्विगर्जः,
स्याद्वादोद्यत्प्रमाणप्रगुणनयचयोल्लोलकल्लोलशाली ।
तापव्यापव्यपोही प्रविघटितविपत्पेटकः कष्टपेष्टा,
सिद्धान्ताब्धिः स जीयादभिमतफलदः सर्वसंसारिराशेः ॥ ३

ये श्रीवामेयदेवक्रमकमलयुगं व्यक्तभक्तिप्रमोदा-
न्नित्यं संसेव्यमाना अवहितमनसो भृङ्गभावं भजन्ते ।
पद्मावत्याख्यदेवीधरणउरगमः पार्श्वयक्षादयश्चा-
प्रत्यूहांहोव्यपोहं विदधतु भविनां भक्तिभाजां सदा ते ॥ ४

### (१३) (वसन्ततिलका)-२

नम्रामरासुरनरेन्द्रकिरीटकोटी-
कोटी निविष्टमणिघृष्टपदारविन्दः ।
श्रीश्रीपुरस्थितिकरः प्रभुपार्श्वदेवः,
श्रेयः श्रियं वितरतु प्रणताङ्गभाजाम् ॥ १

यन्नाममन्त्रजपनोद्यतमानसानां,
भव्याङ्गिनां सकलवाञ्छितसिद्धयः स्युः ।
तीताननागतगतानथ वर्त्तमानां-
स्ताँस्तीर्थनाथनिवहानहमानमामि ॥ २

संसारवार्द्धिमथनः सुमनोनिषेव्यः
सन्नन्दनः सततमञ्जुलभद्रशाली ।
सिद्धान्तमन्दरगिरिर्गरिमाभिरामः
कल्याणसिद्धिमनिशं दिशतु श्रितानाम् ॥ ३

कम्राम्रलुम्बिलतिकाङ्कितपाणिपद्मा,
भव्यावलीविरचिताऽतुलसौख्यसद्मा ।
श्रीपार्श्वनाथचरणाम्बुजयुग्मभृङ्गी,
देव्यम्बिकाऽस्तु शिवदा रुचिराङ्गमयङ्गी ॥ ४

(१४) (वसन्ततिलका)-३

श्रीश्रीपुरावनिशिरोमुकुटायमानं
स्फारस्फुरत्फणिमणिद्युतिदीप्यमानम् ।
श्रीअन्तरिक्षगुरुतीर्थकृतावतारं
पार्श्वं नुवामि विदिताखिलवस्तुसारम् ॥ १

विश्वातिशायिसकलातिशयप्रधाना
वृन्दारकेश्वरविराजितसन्निधानाः ।
सत्प्रातिहार्यकमलाकलितातिशोभाः
सन्तु श्रिये जिनवरा जितकामलोभाः ॥ २

मोहान्धकारनिकुरम्बविडम्बितानां
भास्वद्विभाकरगभस्तिनिभं जनानाम् ।
बौद्धादिसम्मतसमस्तमतप्रशस्यं
जैनं मतं विजयतां जगतां नमस्यम् ॥ ३

श्रीजैनशासनसमाश्रितजन्तुरक्षा-
दक्षाजिनार्चनविधाननिबद्धकक्षाः ।
चेतःसमीहितशतानि दिशन्तु देवा
देव्यश्च सौवपरिवारकृतांह्रिसेवा ॥ ४

(१५)

आनन्दानतनाकिनालकमनो राजीव-राजीवता-
नन्दामन्दरसूर-सुन्दर-गुणोत्तारङ्गतारञ्जितम् ।
वामेयं विनयादमेय-महिमा-सम्भार-सम्भासुरं,
सेवे केवलबोध-बन्धुर-रमात्यन्तैकशान्त्यालयम् ॥(शा.वि.)१

(स्रग्धरा)

संसारापारनीराकरमरणजराजाति-कल्लोल-माला-
घोराघाताभिभूतासुमद-समसमुत्तारणे सत्तरीव ।
सेवाहेवाकिदेवाऽसुरनर-निकरानन्दिपादारविन्दा,
देयं देयादमेयं सुखमसुख-पयो-बन्ध-पाली जिनाली ॥ २

सम्भूता वीरनाथाननलिनदा सङ्गता साधुलोक-
कामायाऽमातसाराणु-विरतिविपुला चारुमूलानुकूला ।
एकानेकादिरूपाऽवितथवरवचो-वाहिनी दूरपारा,
गङ्गेवागाधबोधाभिधविमलजलापातिनी वीरवाणी ॥ ३

देवी वामेयदेवाधिपपदकमलोपासनावासनाव-
च्चित्ता वित्तावदाता जिनमतनिरता सङ्घलोके हिताय ।
मालामुल्लासयन्ती धरणफणिमनोवल्लभा मङ्गलाना-
मासेवायातदेवी भवतु भगवती भूतये सानुभावा ॥ ४

(१६) ॥ श्रीहर्षपूरपार्श्वनाथस्तुतयः ॥-१

(वसन्ततिलका)

छत्रायमाणधरणोरगशीर्षलेशा-
प्रेङ्खन्फणीमणिगणद्युतिदीपिताशः ।
पार्श्वप्रभुः प्रवरहर्षपुरावंतसः
श्रेयः करोतु भविमानसराजहंसः ॥ १

ध्यात्वाऽपि यत्पदपयोजयुगं जनौघाः
संसारसागरममुं तरसा तरन्ति ।
लोकाग्रजाग्रदुरुमुक्तिपदप्रतिष्ठा,
इष्टानि वो जिनवरा वितरन्तु तेऽमी ॥ २

पीयूषयूषमिव यद्ध्वनिनो समूहाः
पीत्वा श्रवोऽञ्जलिपुटैरजरामराः स्युः ।
जैनं मतं तदतिदुर्गमभङ्गरङ्ग-
न्नानार्थसार्थगहनं श्रियमातनोतु ॥ ३

श्रीआश्वसेनिचरणाम्बुजभक्तिभाजां,
भव्याङ्गिनां सकलविघ्नविनाशनिघ्ना ।
पद्मावती मणिमयाभरणप्रभाभिः,
प्रोद्भासमानतनुयष्टिरभीष्टदाऽस्तु ॥ ४

(१७) (शार्दूलविक्रीडित)-२

श्रीमद्धर्षपुराऽवनीनववतीपीयूषधाराधरं,
त्रैलोक्याऽखिलकल्पितार्थकरणे गीर्वाणकारस्करम् ।
स्फूर्जत्तालतमालकज्जलघनप्रोल्लासिकायप्रभं,
श्रीमत्पार्श्वजिनं निरस्तवृजिनं नौमि प्रतीतप्रभम् ॥ १

चन्द्रोद्यद्वदना निरस्तमदनाः सन्नम्रसङ्क्रन्दना,
वाचा चन्दननन्दनाः सुरदना मोक्षाध्वनिस्यन्दनाः ।
ज्ञानानन्तधनाः परास्तनिधनाः क्षिप्ताऽघसम्बन्धना-
स्तीताऽनागतवर्त्तमानविषयाः सन्तु श्रिये वो जिनाः ॥ २

श्रेयः श्रेणिसमागमः श्रितगमः सर्वार्थसार्थोद्गमः,
क्षिप्ताऽशेषपरागमः स्मरगमश्चिन्त्यार्थदेवागमः ।
निर्वाणाऽध्वतुरङ्गमः स्वधिगमः स्फूर्जद्रमासङ्गमः
क्लृप्तैनोविगमः प्रगल्भसुगमः श्रीदोऽस्तु जैनागमः ॥ ३

नानाऽलङ्कृतिसारभासुरमणीश्रेणितमोहारिणी,
क्षुद्रोपद्रववारिणी सुरमणी-प्राप्यश्रियां कारिणी ।
दुःखाम्भोनिधितारिणी सु-रमणियाऽऽनन्दविस्तारिणी
विघ्नव्रातविदारिणी वितनुतां पद्मावती वः शिवम् ॥ ४

(१८) (शार्दुलविक्रीडित)-३

श्रीशस्याऽऽस्यकुशेशयेऽसमवचः स्फूर्जत्परागोल्लसद्-
भूयः सौरभलोभलुब्धमधुकृत्पङ्क्तिः स्फुटेवागताः ।
शीर्षे यस्य विराजते फणिफणश्रेणी मणीभ्राजिता
तं श्रीहर्षपुरेश्वरं जिनवरं श्रीपार्श्वनाथं स्तुवे ॥ १

येषां जन्मनि मज्जनोत्सवसमायातैः सुराणां गणैः
क्षिप्तेऽतीवपयःपयोनिधिपयःपूरे नभःसङ्गिनि ।
स्वर्गङ्गासरितः क्षणं समभवत्पत्या समं सङ्गम-
स्ते श्रीमज्जिननायका जनततेर्विश्राणयन्तु श्रियः ॥ २

मूलं श्रीत्रिपदी यदीयमतुलं स्याद्वादवादस्तथा
स्कन्धः सप्तनया विचारनिचयाः शाखाप्रशाखाः क्रमात् ।
नानार्थाः किल पत्रपुष्पनिवहाः कैवल्यलक्ष्मीः फलम्
श्रीसिद्धान्तसुरद्रुमः स भविनां भूयान्मनोऽभीष्टदः ॥ ३

नित्यं श्रीजिनशासनावनरताः श्रीआश्वसेनिप्रभोः
पादाम्भोरुहि भृङ्गतामुपगताः श्रीसङ्घविघ्नापहाः ।
देवाः श्रीधरणोरगाधिपमुखा देव्यश्च पद्मावती-
वैरोट्याप्रमुखाः सुखान्यनुदिनं यच्छन्त्वतुच्छानि नः ॥ ४

(१९) (शार्दूलविक्रीडित)

यस्य स्नात्रपवित्रितेन पयसा दीपः प्रदेदीप्यते
यन्नाम्ना विपदः प्रयान्ति भविनां यश्चान्तरिक्षस्थितः ।
प्रस्फूर्जत् प्रकटप्रभावभवनं विश्वत्रयी पावनं
तं श्रीश्रीपुरभूमिभूषणमहं पार्श्वं स्तवीम्यन्वहम् ॥ १

प्राणिश्रेणिमनःसमीहितहितार्थापूर्त्तिकल्पद्रुमाः
सर्वैर्दानवमानवामरगणैः संसेव्यमानक्रमाः ।
ज्ञानज्ञातसमस्तवस्तुविसराः श्रीमज्जिनाधीश्वराः
नाभेयप्रमुखा भवातिविमुखा दद्युः सदा सम्पदः ॥ २

माद्यन्मोहतमःसमूहहरणादर्थप्रकाशे पटु
दुर्वादोन्मदवादिवृन्दशलभप्राग्भारविध्वंसकः ।

सिद्ध्यध्वप्रतिभासनैकरसिकः सद्युक्तिधाम्नाऽधिकः
सिद्धान्तः समसिद्धिकृद्विजयतां दीप्रप्रदीपप्रभः ॥ ३

यात्रायातसमस्तसङ्घवितते श्चित्तेऽपि या चिन्तिता
दुर्लङ्घ्यातिघनानपि प्रतिदिनं जेघ्नेति विघ्नव्रजान् ।
सा वामेयपदाब्जपूजनरता पद्मावती देवता
देवैः सेव्यपदा मनोऽभिमतदा सिद्धिं विदध्यात् सदा ॥ ४

(२०) (शार्दुलविक्रीडित)

भव्याम्भोजनभो-मणिर्गजगतिर्ज्ञानादिरत्नाकरः,
सेव्योऽशर्म-समूह-संक्षयकरो वामाङ्गजोऽवामदः ।
सुश्लाघ्योऽभयदोऽभदो विभवदो वन्द्यो हि पार्श्वेश्वरः,
श्रीमत्पार्श्वपतिर्दधातु भविनां शं पूजितः स्वर्गिभिः ॥ १

ये भव्यैर्वरनाकनायकगणैस्तारस्वरैः संस्तुता
भक्त्या कोविदवन्दिताः सुमतिदाः सद्बोध-विद्याप्रदाः ।
सर्वज्ञाः पुरुषोत्तमाः पुरुषसिंहाः स्वामिनस्तारका-
स्ते वः सन्तु शिवाय वै जिनवरा देवाः सदा शङ्कराः ॥ २

स्याद्वादात्मकमस्त-पाप-पटलं प्राज्यं प्रशस्तामलं
श्रीमन्तं सुगुणान्वितं सुखकरं सूत्रार्थरत्नाकरम् ।
चित्रं हेतुनयाङ्कितं गमयुतं सन्देहसम्भेदकं
वन्देहं विबुधार्चितं जनहितं श्रीतीर्थपत्यागमम् ॥ ३

श्रीसङ्घप्रहतप्रचण्डविपदः सम्यक्त्वदः कामदः,
सम्यग्दृष्ट्यवने विचक्षणवरः संध्वस्त-विघ्नोत्करः ।
श्रीपार्श्वेश्वर-भक्ति-निर्मलतरो यः पार्श्वयक्षो वरो
लक्ष्म्यादेर्विजयस्य सोऽभयसुखं शीघ्रं करोतु ध्रुवम् ॥ ४

(२१) (उपजाति)

श्रेयःश्रियां मङ्गलकेलिसद्म !, श्रीयुक्तचिन्तामणीपार्श्वनाथ ! ।
दुर्वारसंसारभयाच्च रक्ष, मोक्षस्य मार्गे वरसार्थवाह ! ॥ १

जिनेश्वराणां निकर ! क्षमायां, नरेन्द्रदेवेन्द्रनतांह्रिपद्म ! ।
कुरुष्व निर्वाणसुखं क्षमाभृत् !, सत्केवलज्ञानरमां दधान ! ॥२

कैवल्यवामाहृदयैकहार !, क्षमासरस्वद्रजनीशतुल्य ! ।
सर्वज्ञ ! सर्वातिशयप्रधान !,
तनोतु ते वाग् जिनराज ! सौख्यम् ॥ ३

श्रीपार्श्वनाथक्रमणाऽम्बुजात-सारङ्गतुल्यः कलधौतकान्तिः ।
श्रीयक्षराजो गरुडाभिधानः, चिरं जय ज्ञानकलानिधान ! ॥४

(२२) (उपजाति)

पार्श्वोऽवताद्योगद-वाचमुच्चरन्,
महामहानील-तमाल-कालिकः ।
बभौ बलाका-युगिवाम्बुदो नमन्,
महामहानील-तमाल-कालिकः ॥ १

ये त्वां जिनौघं स्तुवते तमस्तुदं,
सनाकनिष्ठा वर-दैत्य-मानवाः ।
परिष्वजन्ते बत तान् रसालसाः,
सनाकनिष्ठा वर-दैत्य-मानवाः ॥ २

एकान्तवाद-प्रतिपन्न-दन्तिनो,
निशम्य जैन-श्रुतगाः प्रतिश्रुतम् ।
एकान्त-वाद-प्रतिपन्न-दन्तिनो,
भिया कुरङ्ग-प्रतिपन्थिनः सदा ॥ ३

अहीनभार्या विभया बिलेशये,
निषेदुषी स्वङ्गफले च बिभ्रती ।
अहीन-भार्या विभया बिलेशये,
पद्मावती यच्छतु वाञ्छितानि वः ॥ ४

(२३) (तोटक)

कमठाम्बुदवृद्धिसमाधिकरा-मरभूरुहपल्लवकान्तिहरा ।
जिनपार्श्व ! तवोपरि भाति फणा, नवरत्नरुचिप्रचयैररुणा ॥१

जिनसंहतिरस्तु मुदे भविनः, खलु सज्जनमज्जनसत्कृतिनः ।
प्रप्रकासि दुग्धपयोधि निभा, दिवि तारकतां प्रतिपद्य युवा ॥ २

वरिवस्यत जैनमताम्बुपतिं, पुरुषोत्तमसेवितगोनिकरम् ।
क्षतदुर्गतिरत्नवितानिकरं, [करुणालिप्रफुल्लकरा]म्बुरुहम् ॥३

कुरुहे कुरुहे बत जाम्बुरुहं, बिभ्रते निभृतालिविकासगृह,
वरपुस्तकसन्महनाधिधयो । धुवमर्विततां गिरमध्यधिये ॥ ४

(२४) (कामक्रीडा)

यस्याग्रे माहात्म्यं ब्रह्मोपेन्द्रश्री कण्ठादीनां
सर्वेषामन्येषां शिष्टानां देवानां नैव स्यात् ।
स्फाराकारं विश्वाधारं पद्मागारं सर्वज्ञं,
श्रीवामेयं प्रज्ञामेयं विद्वद्गेयं स्तोष्ये तम् ॥ १

देवस्त्रीभिर्येषां सत्त्वात्सुष्ठु स्वान्तं नाक्षोभि
गाङ्गेयाद्रिर्वातैर्गुञ्जद्भिर्भूकम्पं कुर्वद्भिः ।
भक्तानां जन्तूनां यत्पादा गीर्वाणैर्दुष्प्रापा
अर्हन्तस्ते संस्तुत्या यच्छन्तु द्राग् वः कैवल्यम् ॥ २

अर्हद्वक्त्रोद्भूतं विख्यातं शोभावन्तं कान्तं
अत्यन्तं भास्वन्तं बह्वर्थोपेतं मोक्षोपान्तम् ।
सर्वाशानामन्तं कुर्वन्तं सान्तत्वान्तं तान्तं
सद्दृष्टान्तं ध्वस्तैकान्तं श्री सिद्धान्तं वन्देऽहम् ॥ ३

कल्याणालीं कुर्वाणा पाणौ सत्पद्मं बिभ्राणा
दुःखौघं छिन्दन्तीं भव्यानां दारिद्र्यं भिन्दन्तीम् ।
पार्श्वे पार्श्वस्था पद्मावत्याऽऽभान्ती (तन्वाः) कान्त्या
सद्भिर्वन्द्या दद्याद् देवी सिद्धिं वृद्धिं बुद्धिं मे ॥ ४

(२५) (कामक्रीडा)

श्रीसर्वज्ञं ज्योतीरूपं विश्वाधीशं देवेन्द्रं,
काम्याकारं लीलागारं साध्वाचारं श्रीतारम् ।
ज्ञानोदारं विद्यासारं कीर्तिस्फारं श्रीकारं,
गीर्वाणैर्वन्द्यं सानन्दं भक्त्या वन्दे श्रीपार्श्वम् ॥ १

जाग्रद्दीपे जम्बूद्वीपे स्वर्णशैले श्रीशृङ्गे,
चञ्चच्चक्रे ज्योतिश्चक्रे तुङ्गत्वाढ्ये वैताढ्ये ।
श्रेयस्कारे वक्षस्कारे देवावासे सोल्लासे,
ये वर्तन्ते सार्वाऽधीशास्ते सौख्यं वो देयासुः ॥ २

सम्यग्ज्ञानं शुद्धध्यानं श्रुत्वा ध्यानं सन्मानं,
त्रैलोक्यश्रीरामारम्यं विद्वद्गम्यं प्रागम्यम् ।
अर्हद्वक्त्राम्भोजोद्भूतं शाश्वत्पूतं सङ्गीतं,
लक्ष्मीकान्तं वर्णोपेतं वन्दे व्यक्तं सिद्धान्तम् ॥ ३

भव्यानां भक्तानां कल्याणं कुर्वाणा बिभ्राणा,
शीर्षे शौण्डीरं कोटीरं तारं हारं वक्षोजे ।

विख्याता भोगीन्द्रोपेता सालङ्कारा प्रह्लादं,
यच्छन्ती पद्मादेवी सद्बुद्धिं वृद्धिं वैदुष्यम् ! ॥ ४

(२६) (दोधकम्)

हर्षनतासुरनिर्जरलोकं, तालतमाल-दलावलिरोकम् ।
देवविनिर्मितचञ्चदशोकं, पार्श्वजिनं च नमामि विशोकम् ॥ १

प्राप्तपदात् पुरुषावलिरेखं, लक्षण-लक्षित-पादसुरेखम् ।
दान्त-चलेन्द्रिय-सैन्धवलेखं, नौमि जिनौघमहं सहलेखम् ॥२

सूक्ष्म-पदार्थ-विचार-सुचङ्गं, नष्ट-सुदष्ट-कुदृष्टि-भुजङ्गम् ।
मोह-महीरुह-भङ्ग-मतङ्गं, जैनमतं नमत स्फुरदङ्गम् ॥ ३

रक्षितचारु-चतुर्विध-सङ्घः, संश्रयमान-महासुर-सङ्घः ।
नन्दतु देवपतिर्विजिताघः, तीर्थपमाप्य जनोऽस्तनिजाघः ॥४

॥ श्री समवसरणभावगर्भितपार्श्वजिनस्तुतिः ॥

(२७) (हरिगीत)

द्रेंद्रेंकि धपमप धुधुमि धोंधों ध्रसकि धर धप धोरवम्,
दोंदोंकि दोंदों दाग्डिदि दाग्डिदिकि द्रमाक द्रण रण द्रेणवम् ।
झझिझेंकि झें झें झ्णण रण रण निजकि निज्जन रञ्जनम्,
सुरशैल शिखरे भवति सुखदं पार्श्व जिनपति मज्जनम् ॥ १

कट रेङ्गिनि थोङ्गिनि किटति गिगडदां धुधुकि धुटनट पाटवम्,
गुण गुणण गुण गण रणकि णेंणें गुणण गुण गण गौरवम् ।
झझिझेंकि झें झें झ्णण रण रण निजकि निज जन सज्जना,
कलयन्ति कमला कलित कलमल मुकलमीस महेजिनः ॥२

ठकि ठेकि ठ्रं ठ्रे ठहि ठहिक ठहि पट्टा ताड्यते,
तल लोंकि लों लों त्रेंषि त्रेंषिनि डेंषि डेंषिनि वाद्यते ।
ओं ओंकि ओं ओं थुंगि थुंगिनि धोंगि धोंगिनि कलरवे,
जिन मत मनंतं महिम तनुता नमति सुर नर महोत्सवे ॥ ३

खुदांकि खुंदां खुखुडदिखुंदां खुखुडदि दों दों अंबरे,
चाचपट चचपट रणकिणेंणें डणण डें डें डंबरे ।
तिहां सरगमपधुनि निधपमगरस सस ससस सुर सेवता,
जिन नाटय रंगे कुशलमुनिशं दिसतु शासन देवता ॥ ४

## (२८) संसारदावाकाव्यस्य पादपूर्तिः

संसार–दावानल–दाह–नीरं,
सद्बुद्धि–चेतः–सहकारकीरम् ।
कल्लोलिनी–वल्लभवद्गभीरं,
पार्श्वं भजे प्राप्तभवाब्धितीरम् ॥ (इन्द्रवज्रा) १

भावावनाम–सुर–दानव–मानवेन–
कोटीरकोटीतटसङ्गविचित्ररत्नैः ।
आशामुखं सरसकुङ्कुम–दिव्य–शोभं,
सम्यक् सृजन्त इव तीर्थकराः समृद्ध्यै ॥(वसन्ततिलका) २

बोधागाधं सुपदपदवी–नीर–पूराभिरामं,
चातुर्विद्याधिक–सुरभिसद्भद्रशालादि–शोभम् ।
भास्वल्लक्ष्मी–सुमनसगणालङ्कृतज्ञानरत्नं,
भक्त्या भव्या भजत सततं जैन–सिद्धान्त–मेरुम् ॥(मन्दाकान्ता) ३

आमूलालोल–धूली–बहुल–परिमला–लीढ–लोलाली–माला–
भ्राजद्धम्मिल्लशोभा शशिसमवदना भूषणैर्भ्राजमाना ।

श्रीमद्वामेयसेवारसिक–जनमनोनन्दि–सम्पत्ति–बीजं,
देवी पद्मावतीयं हित–विजय–सुखश्रेयसे भूयसे स्तात् ॥ ४
(स्रग्धरा)

## (२९) स्नातस्या–पादपूर्तिः

स्नातस्याप्रतिमस्य मेरुशिखरे शच्या विभोः शैशवे,
नृत्यन्त्या विविधाङ्गहाररुचिरैः सङ्गीतगीतादिभिः ।
मूर्तिर्मूर्ध्नि धृता तथा करतले भालस्थले लीलया,
स श्रीपार्श्वजिनो जयाय भवतां संचिन्त्य–चिन्तामणिः ॥(शा.वि.)१

हंसांसाहतपद्मरेणु–कपिश–क्षीरार्णवाम्भो–भृतैः,
कुम्भैः कुम्भनिभैः सुरेन्द्रकरिणः सौवर्णरुप्यादिभिः ।
येषां मेरुगिरौ सुरेश्वरगणैर्जन्माभिषेकः कृतोऽ
तीतानागत–वर्तमान–जिनपास्तेषां तु पुण्यात्मनाम् ॥(शा.वि.)२

अर्हद्वक्त्रप्रसूतं गणधररचितं द्वादशाङ्गं विशालं,
पारावारोपमानं सुगमगममणिं सप्तभङ्गी–सुवेलम् ।
गम्भीरार्थं च नानानयविषमगिरिं बुद्धि–मत्यर्थपोतं,
भूयान्मे लब्ध्यपारं सुविहितभगवत्कर्णधार–प्रसादात् ॥ ३
(स्रग्धरा)

निष्पङ्कव्योमनील–द्युतिमलसदृशं बालचन्द्राभदंष्ट्रं,
पार्श्वार्हत्पादपद्म–प्रणति–रतिकरं देवदेवी–सुसेव्यम् ।
विघ्नौघं घातयन्तं जिनमहिम–गृहे सर्वदा जैन–सङ्घे,
कूर्मारूढं गजास्यं भुजयुगयुगलं पार्श्वयक्षं स्मरामि ॥(स्रग्धरा)४

## (३०) ॥ मङ्गलपुरीयनवपल्लव-पार्श्वनाथ-स्तुतिः ॥

श्रीनवपल्लवपार्श्वजिनेशं भव्यजनाम्बुरुहैकदिनेशम्
मङ्गलपुरवरमहिमागारं प्रणमत भविका भुवनाधारम् ॥ १
(दोधक)

जिनततिर्गतिमण्डितभूतला तनुघनाघनकज्जलकुन्तला ।
श्रितहितोक्तिरताविगतापदं दिशतु देहभृतां शिवसम्पदम् ॥ २
(द्रु.वि.)

रसरत्ननिधानमिह प्रवरं कविचित्तचकोरगतं नवरम् ।
यदि भव्य ! समिच्छसि सिद्धिपदं
शृणु जैनवचः किल सप्रमदम् ॥ (तोटक) ३

गतच्छद्मपद्मावती देवदेवी
नतांह्रिद्वया पार्श्वपादाब्जसेवी ।
पुरे मङ्गलाख्ये गुणोद्गीतकीर्तिः
तनोत्वद्भुतां शान्तिमुद्यत्सुमूर्त्तिः ॥ (भुजङ्गप्रयात) ४

## (३१) श्रीगोडीपार्श्वजिनस्तुतिः

त्रिभुवनजनपावनमानसमानसहंस !,
भारतभूमण्डलकमलविबोधनहंस ! ।
पूरय मम कामितमतिशयजगदुत्तंस !,
प्रियगौडीमण्डनपार्श्वजिनेशाऽवतंस ! ॥ १

श्रीभरतैरावतवरविदेहविजयन्तं,
नन्दीश्वरकुण्डलरुचकादिषु विलसन्तम् ।
असुरव्यन्तरसुरभवनादिषु जयवन्तं,
प्रणमामि जिनाधिपसङ्घमनघभगवन्तम् ॥ २

प्रवचनवचनाऽमृतपानमनन्तहिताय,
प्रशमप्रसराऽद्भुतरसपूरितमुचिताय ।
कुरु कुरु सुभगत्वं महिमवतामुचिताय,
भवतापभिदे तव भवति यदुल्लसिताय ॥ ३

प्रज्ञप्तीगौरीप्रमुखसुरीस्तवनीये !,
भगवति ! पद्मावति द्युतिनिर्जिततपनीये ! ।
धरणेन्द्रमनःप्रियपार्श्वक्रमशयनीये !,
प्रीणय लयलीनं कमलविजयभजनीये ! ॥ ४

(३२)

पूजाविधौ शक्रगणोऽपि यस्य यास्यत्यहो ! हर्षपुरेस्थितस्य ।
तस्य क्रमाब्जं भविकानपायात्
पायात् प्रभो ! पार्श्वजिनेश्वरस्य ॥ १

जिनेश्वराः सौख्यपदं सृजन्तु जन्तुव्रजं निर्जितवैरिवृन्दाः ।
वृन्दारकस्वीकृतपुष्पमाला मालासमभ्यर्चितपादपीठाः ॥ २

श्रीआगमः संसृतिवल्लिदाता दाता सुखानां भवतान्मुदे वः ।
देवप्रणीतः प्रसरद्रसार्थ-सार्थप्रथाचारुविचारसारः ॥ ३

सुदेवदेवीनतपादपद्मा पद्मावती भक्तिकरी जिनानाम् ।
नानाङ्गिनां रातु रमां समस्ता-मस्ताशुभासङ्गजनव्रजस्य ॥ ४

(३३)

वन्देहं जिनदेव पार्श्वं, षड्विध देव दयालं, (बे वार)
वाणारस्यां पुर्य्यां यस्य, जातं जन्म विशालं,
अश्वसेन तन नंदन वंदित, विदलित कलिमल जालं, वन्देहम् ॥१

कमठासुर मद मर्दव धीरं, कृतात कर्मातारम्,
अग्निदहद्भ्यां फणिनी फणिभ्यां,
दत्त नमस्कृत सारम्, वन्देहम् ॥ २

रागादि रिपुमार निकारं, सञ्चित दुर्जय तारम्,
रत्नत्रयाम्बर भूषण हृदयं, दशविध धर्म सुपालं, वन्देहम् ॥३

सम्मेताचल पर्वत शिखरं, मुक्तिगतं गुणमालम्,
जगत प्रसिद्धा कीर्तिर्यस्या, जाता तं जिनपालं वन्देहम् ॥ ४

(३४)

विशदसद्गुण राजि विराजितं, घनघना घननाद विभाजितम् ।
भजत भक्तिभरेण रमेश्वरं, जगति पार्श्वजिनेशमनिश्वरम् ॥ १

विविधवर्ण विभूषितविग्रहाः, विहितदुर्दमदर्प्पकनिग्रहाः ।
वसुयुगार्कमिताः सुकृताकराः, जिनवराः प्रभवन्तु शिवङ्करा ॥२

रुचिरवर्ण निबद्धमनिन्दितं, सुमनसां प्रकरैरभिवन्दितम् ।
निखिलसाधुजनाः खलु निर्मिदं, जिनमतं नमतां चित्तशर्मदम्३

सकलभव्य सरोजविकाशिका, कुमतिसंतमसोच्चयनाशिका ।
जिनवराननं पद्मगतोन्मुदा, भवतु वाग्जिनलाभ शुभार्थदा ॥४

पू.आ. श्रीजिनभक्तिसूरिकृता-

(३५)

कौमारे कमठस्य दुर्मतिमदं धिक्कृत्य तूर्णं मुने-
र्येनाऽदायि सुरेश्वरत्वमुरगस्यापाय्य वाक्यामृतम् ।
तेनैवाङ्कितमंह्रिपद्ममनुगामित्वं प्रभोरात्मनो,
मन्वानेन हि चक्रिणा स सततं वः पातु वामात्मजः ॥ १

येषां जन्मनि पञ्चकञ्चनगिरिशृङ्गे कुरङ्गीदृशां,
वृन्देनाप्सरसां सहाऽजनि महः शक्रादिदेवासुरैः ।
भव्यानां भववारिराशिसलिलोत्तारे तरण्डोपम-
स्तेषां स्वस्तिकृदस्तु पत्कजयुगं वः श्रीमतामर्हताम् ॥ २

दुर्बोधोत्कटदुर्दिनापहरणे चण्डत्विषो मण्डलं,
प्रोत्सर्पत्यरिपञ्चमारिभुजगोन्मादे सुपर्णोपमम् ।
सोत्कण्ठं श्रयत श्रुतं हरति यत्कल्कान्यहो कल्किनां,
तज्जैनं मतमन्तरारिमथने दक्षं विपक्षोज्झितम् ॥ ३

विघ्नव्यूहविभावसुप्रशमने या वारिधारोपमा,
भव्यानां सकलार्थसाधनविधौ या कल्पवल्लीसदृक् ।
पद्मा पद्मकरा सुरासुरनरैः सा सेव्यमाना भृशं,
भूयाच्छ्री जिनभक्ति रक्तमनसां भूमिस्पृशां श्रेयसे ॥ ४

(३६)

यो देवमर्त्यासुरनागवृन्दै र्नमस्कृतो न्यक्कृतभावशत्रुः
अनल्पसंकल्पितकल्पवृक्षः श्रीपार्श्वनाथं तमहं नमामि ॥ १

इक्ष्वाकुवंशविमलार्च्यशिरोवतंसः
श्रीअश्वसेननृपमानसराजहंसः श्रीपार्श्वसंज्ञमरुता वरिवस्यमानः
श्रीपार्श्व एष जयति प्रभुताप्रधानः ॥ २

सत्येष मासस्य सितौ दशम्यां
प्रासूत वामेशसुतं भवन्तम् ।
निशातमोवद्रुतमीक्ष्य नेशुस्तमांसि सर्वाणि तदान्तराणि ॥ ३

अवाप्ततीर्थाधिपजन्मरत्ना हीनानि तेनासुमतां हितेन ।
संजातहर्षा इति खेदवन्ति वृद्धिं निशा हानि महानि चापुः ॥४

(३७)

पू.मु श्रीकान्तिविजयकृता

स्वस्ति श्रीकुलगृहमभिराम-प्रकटोद्धुरगुणमणिगणधाम
स्ववशहृषीकग्रामः, योऽगमदव्ययपदमतिवाम-
प्रकृतिमदाद्रिभिदात्याधामस्तर्जितदुर्जयकामः ।
निष्ठितमोहमहासंग्रामः कृतसमुदञ्चत्प्रतिघाचामः कल्पितशोकविरामः,
भक्त्युल्लसदाशयसूत्राम-प्रमुखस्तुतसितकीर्त्युद्दामस्तं
पार्श्वं प्रणमामः ॥ १

अविनश्वरसुखभूरुत्ताला-यतदुरितागविदरजलबाला
परममहोदयशाला-
ऽविघ्नवती नवदहनज्वाला-शोषितकलुषविषयजम्बाला
रचिताऽजन्योच्चाला ।
प्रत्यादिष्टभवभ्रमिफाला ज्ञानादर्शफलत्समकाला
शमितकषायाङ्गाला,
चरणप्रणमदमरनरपाला त्रिजगज्जाग्रद्वचनरसाला
वन्द्याऽसौ जिनमाला ॥ २

नवरसपूरसुधासन्धान-प्रसरन्नवतत्त्वीविज्ञान-व्यतिकरनूत्नप्रतानः,
सुकृतविटपरचनाद्यसमानः कोविदमधुकररचितोद्गानः
कृतसुमनः सम्मानः ।
दारिद्र्योद्धरणाद्यवदान-प्रस्तुतचित्रपवित्रविधानः
स्थितिमुच्चैर्लभमानः,
चारित्रामोदं विदधानः स जयति सिद्धिफलं चिन्वानः
श्रीप्रवचनसन्तानः ॥ ३

कोमलतनुभासा विकचानि च्छलयन्ती श्यामलकमलानि प्रथितारिष्टज्यानिः,
धरणीधरदयिता सकलानि व्यथयन्ती प्रतिपक्षकुलानि क्षपितागाधम्लानिः ।
श्रीशङ्खेश्वरपार्श्वपदानि ध्यायन्ती विदलितपापानि प्रेमविजयसुखदानि,
पद्मावत्यभिधा विपुलानि प्रदिशतु सा देवी सुखखानिः कान्तिविजयकुशलानि ॥ ४

(३८)

श्रीपार्श्वनाथं प्रणमामि देवं, देवासुरैर्वन्दितपादपद्मम् ।
पद्मावती-कल्पित-निर्विकल्पं, कल्पद्रुमाभं धरणेन्द्रपूज्यम् ॥१
(इन्द्रवज्रा)

ये प्रातिहार्य-कलिता कलि-ताप-मुक्ता,
मुक्ताफलोज्ज्वल-यशः-परिपूरिताशा ।
मुक्तिं प्रति प्रतिभवं भवनाधिनाशा,
नासामितानहमहं दशमेव सिद्ध्यम् (?) ॥(वसन्ततिलका) २

त्रिपदि वदति बीजो मूलसिद्धान्तमूलो,
गणधरमि(म)तिसंस्थिस्कन्धबन्धोपमागः ।
विटपिवदनयोगः पत्रपुष्पप्रकीर्णः,
शिवसुखफलदः स्यात् श्रीश्रुतज्ञानवृक्षः ॥ (मालिनी) ३

क्षुद्रोपद्रवरोगशोगहरिणी दारिद्रविद्राविणी,
नागव्यग्रकरा फणत्रयधरा देहप्रभाभास्वरा ।
पातालाधिपतिप्रिया प्रणयनी चिन्तामणी देहिनां,
श्रीमत्पार्श्वजिनेशशासनसुरी पद्मावती पातु वः ॥(शा.वि.) ४

(३९) (अत्युक्ताजातौ स्त्रीछन्दः)

पार्श्वः प्रभुः जीयान्नित्यम् ॥ १

सार्वः सङ्घः दद्याच्छं मे ॥ २

अर्हद्वाक्यं सिद्धिं दद्यात् ॥ ३

भद्रं नित्यं देयात् पद्मा ॥ ४

(४०) (अत्युक्ताजातौ स्त्रीछन्दः)

कुर्यात् पार्श्वः पापध्वंसम् ॥ १

सर्वे सार्वाः सिद्धिं दद्युः ॥ २

अर्हद्वाचं वन्देऽजस्रम् ॥ ३

स्फूर्जत्सद्मा जीयात् पद्मा ॥ ४

(४१) (स्त्री)

श्रीमत्पार्श्वं देवं वन्दे ॥ १

श्रेयोदा मेऽर्हन्तः सन्तु ॥ २

जैनी वाणी सौख्यं दद्यात् ॥ ३

पद्मादेवी शं मे कुर्यात् ॥ ४

(४२)

श्रीदं भक्त्या स्तोष्ये पार्श्वम् ॥ १

सार्वाः सर्वे सिद्धिं दद्युः ॥ २

जैनी गीर्मे सिद्ध्यै भूयात् ॥ ३

कुर्यात्सङ्घे क्षेमं पद्मा ॥ ४

(४३)

श्रीमान् पार्श्वः श्रेयो दिश्यात् ॥ १

सार्वाः सर्वे सिद्ध्यै नित्यम् ॥ २

जैनी वाणी बुद्धेः शुद्ध्यै ॥ ३

पद्मां पद्मा दद्याद् वृद्ध्यै ॥ ४

(४४)

विश्वस्वामी जीयात् पार्श्वः ॥ (स्त्री) १

ते जिनाः सन्ततं सन्तु मे शान्तये ॥ (मृगी) २

मोहान्धानामेकं चक्षुः सिद्धान्ते मे सिद्धिं दद्यात् ॥(कन्या) ३

रक्षतु विघ्नाच्छासनदेवी, रातु विशालां मङ्गलमालाम्॥ (पङ्क्ति)४

(४५) (पङ्क्ति)

पार्श्वजिनेन्द्रं, नौमि नतेन्द्रम् व्याधिलतेभं, नीलकजाभम् ॥ १

सार्वगणन्तं, स्तौमि नितान्तम् । प्रापदनन्तं, यः शिवसाताम् ॥२

अस्तसमस्ता – पत् परमार्था तीर्थपगीःस्ता – दङ्गीकृतार्था ॥३

सेवितपार्श्व ! शं दिश पार्श्व ! मौलिवराङ्ग ! तार–तराङ्ग ! ॥४

(४६) (शार्दूलविक्रीडित)

श्रीशङ्खेश्वरमण्डनं जिनवरं पार्श्वं स्तुवे कामदं,
श्रीमन्तोऽन्यजिनेश्वरा जगति ये तान्नौम्यहं सर्वदा ।
कल्याणाऽऽस्पददायकं नतसुरं वन्दे तथा चाऽऽगमं,
श्रीपद्मावतीदेवते ! भव सदैवाऽमेधशिष्ये शुभा ॥ १

(चतुर्शः उच्यते)

(४७) (वसन्ततिलका)

ब्रह्मेन्द्रनीलमणि–मण्डलहेममुद्रा,
श्री – पार्श्वदेवपरमागमनाम–मुद्रा ।
आनन्दिनी विजयिनी भवतान्तिच्छिद्,
लीलावती भगवती कमलोदयाय ॥ १

(चतुर्शः उच्यते)

(४८) (शार्दूलविक्रीडित)

कल्याणानि समुल्लसन्ति जगतां दारिद्र्यविद्रावण–
द्राघीयः पदवीप्रवर्हघटनाकल्याणकल्पद्रुमात् ।
कल्याणप्रगुणीभवत्प्रवचनश्रीसिद्धसारस्वत–
श्रीमत्पार्श्वजिनेश्वरस्मरणतः कल्याणमाहात्म्यतः ॥ १

(चतुर्शः उच्यते)

(४९) (उपजाति)

श्रीपार्श्वनाथा ! ऽऽगम ! वीतराग–चया !
ऽभिवन्द्या ऽऽनतनाकिनाग ! ।
समस्तभद्रोदयपारिजात !, जय क्षितौ त्वं दितवैरिजात ! ॥ १

(चतुर्शः उच्यते)

(५०) (वसन्ततिलका)

विश्वातिशायि ! महिमा सुरसार्थसेव्य !,
श्रीश्लाघ्यपार्श्वजिननायक ! पूरितार्थ ! ।
सर्वज्ञवन्द्यपरमागमवीतराग !,
सर्वार्त्तिशान्तिकर ! देहि शिवश्रियं मे ॥ १

(चतुर्शः उच्यते)

(५१) (वसन्ततिलका)

श्रीपार्श्वदेव ! जिनराजिमताऽभिराम !,
कल्याणदायि ! कममानममानमानम् ।
त्वं मे तनूच्चनगराजसमाचलश्रीः,
श्रीमत्प्रभोर्विजयसेनगुरोः प्रतापम् ॥ १

(चतुर्शः उच्यते)

(५२) (वसन्ततिलका)

श्रेयः सुधारसघटप्रकटप्रभाव !,
श्री-पार्श्व ! विश्वजनवल्लभ ! पूज्यपाद ! ।
देवेन्द्रवृन्दवरवन्द्यपदं प्रदेहि,
देहि प्रतीतसमयाभिमतं मतं नः ॥ १

पू.मु.श्री कमलविजयविरचिता

(५३) ॥ कंसारीपुरमण्डनश्रीपार्श्वजिनस्तुतिः ॥

सकलजिनराजकोटीरहीराङ्कुरं,
पार्श्वपरमेश्वरं समयकमलाकरम् ।
स्मरत कंसारिपुररत्नतिलोकोत्तरम्
विजयलक्ष्मवीरं नीलरुचिसुन्दरम् ॥ १

(चतुर्शः उच्यते)

(५४) पू.मु.श्रीवाचकसहजकीर्तिकृता

॥ जेसलमेरुदुर्गस्थश्रीपार्श्वनाथमहादण्डकस्तुतिः ॥

विदितनिखिलभावसद्भूतनूतप्रभृताखिलज्ञानविज्ञान-
भास्वत्प्रभाकीर्तिसंदोहसौभाग्यभाग्योल्लसल्लोककोकस्थिति-
श्रेणिसन्तोषपोषप्रदं

प्रीतिनीतिप्रमाणप्रमाणप्रमेयक्षमालीनपीनध्वनिध्वानसम्मोहविध्वं-
सदक्षञ्जिनं पौषमासादिमाया दशम्या दिने प्रा १००
प्तजन्मानमालोकशोकापनोदाय सम्प्राप्ततारुण्यकं प्राप्तबोधं
सुरेभ्यो सुरज्येष्ठलोकान्तिकेभ्यो दिने
पौषमासादिमैकादशीसञ्ज्ञकेऽवाप्तदीक्षं
स्फुरत्स्वर्गिपातालवासिस्फुटव्यन्तराधीशसच्चन्द्र-
सूर्यारसौम्यामराचार्यवर्योशनः
शौरिनक्षत्रमालानभस्तारकाकोटि २००
कोटिक्षितिप्रीतिभूपालसच्चक्रवालाऽऽनतांह्रिद्वयं द्वेषिकृद्
द्वेषसंहारसञ्चारसंसारपाथोधिसम्मग्नचेतःप्रवृत्त्यङ्गिनिस्तार-
कोद्वेगवेगप्रपञ्चक्षयाक्षीणलेश्यं
सकोपासुरामर्षसम्भूतभीतिप्रदाशेषविद्वल्लताक्षोभशोभारटद्घोरसं-
हारकल्पक्षमाकाशभे ३००
दावकाशच्युतश्यामरुग्नीरधिध्वानगर्जज्जितानेकमर्त्यप्रचण्डप्रतापद्विपा-
ष्टापदध्वानदुष्टान्धकारप्रचारोच्छलन्नीरकल्लोलमालाम्बुदोद्रेकवृद्ध्या
समापूर्ण सर्वाङ्गमाज्ञाय सर्वप्रभाराजिविभ्राजमानप्रमाणर्द्धि
पाताललक्ष्मीसदाभोगसंयोगविख्यातनामा-४००
भिरामप्रभावोऽमितायामविष्कम्भसम्मोददायिप्रणष्टाहितध्वान्त-
संरम्भरम्भावलीचूतसच्चम्पकाशोकवृक्षादिनिः-सङ्ख्य-
वृक्षातिशायीष्टशोभाभरानेकवादित्रनादोच्चयऽऽनन्दकृत्पञ्च-
वर्णात्मकावासलक्षाधिपत्यं दधद् देवदेवीमनोवाञ्छितार्थं
ददत् स्वीयसिंहास ५०० नोत्कम्पतो ज्ञानसम्भारतश्चापि
नागाधिपः स्वीयदेवेन्द्रताप्राप्तिहेतुं प्रभुं भूरिसौख्यं क्षमाकारणं

चाकलय्य प्रमोदान्निजां पट्टदेवीं समादाय शीघ्रं
जलोपद्रवध्वंसनाय स्थितं पुण्यमूर्त्तिं जगत्क्षेमकृन्नामधेयं प्रभुं
पार्श्वनाथं समं निर्ममं चिन्मयं मेरुधीरं वरा ६००
नेकगाम्भीर्यधैर्यार्य-सन्तोषपात्रपवित्रगुणश्रेणिभी राजितं
त्यक्तसंसारसञ्चारारामारमाकारदेहस्थितिं
प्रोल्लसद्वर्षसन्दोहमोहः फणानां सहस्त्रं व्यधान्मस्तकोपर्यलं
छत्रसङ्काशशोभाधरं वीरविक्षोभसंहारसम्बन्धिकं राजमानं
चतुर्दिक्ष्वथोऽधः स्वकीयां-७००
शयोराश्वसेनेर्भवाम्भोधिनिस्तारकं कारकं सम्पदामास्पदं
श्रेयसां साध्वसध्वंसदक्षं नतं नागरैः पद्युगं स्थापयामास
भूयोऽथ पार्श्वाग्रतः सम्भ्रमाधिक्यतो नाटकं
देवसूर्याभरीत्याप्सरःश्रेणिभिर्दीयमानाप्रमाणोरुगानं
कुमारीकुमारैर्जनानन्ददैर्दन्तसङ्ख्यैर्यु ८०० तं विश्रुतं सर्वतः
सर्वपापप्रणाशप्रधानं निधानं गुणानां हितं सौख्यमोक्षप्रदं
देवलोके-शताचक्रवर्त्तित्वशीरित्व-
सभ्यादर्धचक्रित्वभूपत्वसिद्धिक्षमाकारणं दुन्दुभिध्वानरम्यं
निधानाम्बुराशिप्रमाणाद्भूतातोद्यजातेः
पृथग्सिद्धिदिग्मानसङ्ख्यायुतैर्हारितूर्यैर्युतम् ९०० पूर्ण-
पुण्योघलभ्यं चकारासुरेशश्रियं पावनां कर्तुकामस्ततः
सप्तभिर्वासरै रात्रिभिश्चासुरे वर्षणे सर्वतः क्षीणभावं
समेतेऽसुरं पापलेश्यं महावैरिणं पार्श्वनाथस्य पद्मावतीशो
जगादेति सञ्जातरोषो महापाप !
दुष्टाधमेशाऽहमस्तोकशोकास्पदं त्वां नये १००० ।

विहितजिनजलाशिवं कोऽस्ति रे ! प्राणभृद्यः समागत्य संरक्षति क्ष्मातलेऽद्यापि मूर्खोत्तमो वेत्सि किं नो जिनोऽयं चतुःषष्टिदेवेन्द्रपूज्यश्चिदानन्दकन्दस्वरूपः समाङ्गिव्रजप्रीतिदः सापराधेऽपि दुष्टाशये नैव रोषं विधत्ते जने जातुचिन्नाकिनि क्षुद्रसत्त्वे दयालीनचेताः १०० सुखं वाञ्छति प्राणिनां भावतोऽथा-पहायाखिलं वैरभावं चिरागूढगूढं कृतक्लेशमान्द्या-समाधिस्थितिश्लोकविध्वंसहेतुं भजाऽऽगत्य चानन्तसंसार-नीराम्बुधिप्रान्तमेहि प्रसिद्धोदयागारसंसारिशृङ्गारकल्पं मरुच्छाखिचिन्तामणिस्तोमसम्प्राप्तिसन्तोषकल्पं गृहाणाङ्ग २०० णं सर्वसम्पत्तिभावस्य सम्यक्त्वरत्नं प्रयत्नेन वाक्यं हितप्रीतिकृत् तत्समाकर्ण्य चालोक्य तीर्थेशभक्तं महच्छक्ति-भक्तिप्रभाशोभमानं धराधीश्वरं प्राप्तसंवेगभावोऽसुरो मेघमाली भवाब्धौ पतज्जन्तुजातोद्धृतौ सावधानावनेकाङ्कुशच्छत्र-शङ्खाकृतिभाजमानौ जिनां ३०० ह्री प्रणम्यैवमूचे जगन्नाथ ! पापातपक्लेश-संवेशसङ्घातक ! द्वेषतोऽहं भवेष्वप्रमाणेष्वसद्दुःख-सन्दोहरूपेषु तिर्यग्नरामर्त्यपापार्तिभृन्नारकेषु स्वयं सम्भ्रमस्त्राणभूतं भवत्सन्निभं क्वापि न प्राप्तवानीश ! सद्भाग्यतोऽद्य श्रितानन्दचिद्रूपमासाद्य नाजन्म मुञ्चा ४०० मि सभ्यं भवन्तं कृपापात्रमश्लाघ्य-माचीर्णमस्तोकवैरं च निन्दामि गर्हामि नैवं पुनर्वीतरागोत्तम ! क्षीणपापो विधास्यामि नन्वेवमावेद्य च प्राप वेश्म स्वकीयं गृहीत्वा सुबोधिं ततो नागराजोऽपि जैनाऽग्रतो नाटकं देवशक्त्या विधायोरु नत्वा च शिश्राय सद्मश्रियं साङ्ग ५०० नः क्षेमकृत् पार्श्वनाथोऽपि पातालनाथार्चितः प्राप्तशोभोऽभितोऽभिग्रहं

पूर्णमासेव्य निर्जित्य चोपद्रवं नीरजं नीरजा भूमिपीठे विहारं विधत्ते स्म लोकोऽथ तत्र स्वभावेन मूर्तिं नवीनां तथा चैत्यमत्युच्चमानन्दकन्दं विहा(धा)य त्रिकालं समभ्यर्च्चयामास लोके ततस्तीर्थ ६०० मासीद्धितं सज्जनानामहिच्छत्रसञ्ज्ञं जनेष्टार्थसम्पादकं तीर्थनाथः प्रभुर्लोकनिस्तारको नीलवर्णो धरामण्डलं पावनं पादपद्मोच्छलद्रेणुसम्पाततः साधु कुर्वन् कलेः पर्वतस्यान्तिके स्थितः कायमुत्सृज्य नीरागतां संसृतेर्भावयन् भावितात्मा तथा भूतमा ७०० लोक्य तं तीर्थपं तन्निवासी करी जातजातिस्मृतिः स्वं भवं पूर्वकं ज्ञातवानेवमालोचयामास चाहं जडो वामनो मन्त्रिपुत्रोऽभवं हास्यमानो जनैरेकदा मर्त्तुकामो मुधा बोधितः साधुना तापसोऽभूवमस्तोककालं तपस्यां विधायान्तकाले शरीरं महन् मे तपस्याफलादा ८०० यतौ स्यादितीदं निदानं दधन्मानसे मृत्युमासाद्य जातो महाकायवान् कुञ्जरोऽत्र स्थले हारितो दुष्टचित्तेन पापेन नारो भवः पुण्ययोगात् पुनस्तीर्थराजो गुणानां निवासो मयाऽदर्शि नैनं विना प्राणिनां कोऽपि निस्तारको दुःख-संहारकर्ता जनोऽन्यः क्षमामण्डलेऽयं च विज्ञाय-९०० ते मां समुद्दिश्य निःसंशयं तारणायाऽऽगतोऽत्राऽथ पूज्यो मया पूजनीयो यथाशक्ति भक्त्या यथाहं सुखी स्यां विमृश्यैवमानीय पानीयमच्छं तटाकात्तथा पङ्कजश्रेणिभिः पूजयामास वामासुतं भावतो ज्ञातवार्त्तो जनाद् भूपतिस्तत्र चैत्यं चकार प्रभोरर्चयामास लोके ततः २००० ।

सकलसुखदमिष्टमासेवनी(यं) जनैस्तीर्थमापद्धरं जातमेतत् कलेरग्रतः कुण्डसञ्ज्ञं ततः सोऽथ सम्यक्त्वरत्नान्वितो

मेरुतुङ्गाभिधो हस्तिराट् पुण्यसार्थेशयुग् देवलोकं महानन्द-दाय्यष्टमं प्राप शुद्धाशयस्त्यक्तवल्लः समन्ताज् जिनाधीशनिः-सङ्गमूर्त्तिस्ततोऽन्यत्र भूमौ १०० तपस्यां व्यधादेवमाचीर्ण-शुद्धव्रतव्रातनाथोऽखिलः कर्मराशिर्भवानन्त्यजन्यः क्षयं सर्वतो नीयमानो गुणस्थानरीत्या प्रधानेन शुक्लेन विभ्राजमानोऽबलक्षे चतुर्थीदिने चैत्रमासस्य पूर्वाह्णकाले विशालं समग्रं जगद्ज्योतिरुद्योतकं केवलज्ञानमासेदिवान् ज्ञात २०० लोकत्रयालोकपर्यायकोऽगुप्तगुप्तप्रमादाप्रमादप्रसिद्धार्थसार्थप्रवेदी क्षणे तत्र देवासुरव्यन्तरज्योतिषां कम्पिताकम्पसिंहासनानां स्वकीयर्द्धिसामान्यदेवीचलत्पत्तियानान्वितानामभूदाऽऽगमः कोटिकोटिप्रमाणश्रितानां ततस्ते मिलित्वा जिनं चाभिनन्द्य प्रमो - ३०० देन सालत्रयं रत्नकल्याणरूप्यात्मकं चक्रुरुत्साह-संसक्तचित्ता अथो वीतरागो नमस्कृत्य तीर्थं स्थितः पूर्वदिक्सम्मुखो राजमानोऽधिकं देशनां धर्मरूपां जगज्जन्तुजीवातुकल्पामनल्पार्थजीवादिसञ्ज्ञानमालां विशालार्त्तिविद्वेषहालाहलध्वंसपीयूषनिःस्यन्दतुल्यां ४०० शराग्निप्रमाणेन वाचां गुणेनाऽक्षयां देवभूस्पृक्तिरश्चां मनःसंशयोच्छेदपट्वीं स्वकीयस्वकीयोरुभाषागतज्ञानभावेन निद्राबुभुक्षातृषोत्पत्तिनाशां ददौ योजनाक्रान्तभूमिस्थितप्राणिनां श्रोत्रगामेवमेषोऽस्थिरो दुःखहेतुर्भवो यत्र जीवाः समे प्राप्नुवन्ति ध्रुवं जन्म ५०० मृत्युं जरां क्लेशमश्लोकमामं (रोगं) वियोगं तथा निर्धनत्वं मिथो वैरभावं विमातृत्वमातृत्वपितृत्वपुत्रीत्वरामात्व-मुख्यानि चिह्नानि भूयः परं नैव धर्मं कृताशेषसातं प्रमादेन कुर्वन्ति

सम्मूर्च्छिताः स्त्रीविलासाद्यसत्कर्मसु स्तोकसौख्येष्व-नित्येष्वसत्कर्म बन्धेष्वथो प्राप्त (प्य) चि ६०० न्तामणिप्राय-चुल्लादिदृष्टान्तदुः-प्राप्यनृत्वं मनुष्याः कुरुध्वं प्रमादं विहायाऽशु धर्मं जनालम्बनं पार्श्वनाथोदितं मानवा एवमाकर्ण्य सञ्जातवैराग्यतः केऽपि दीक्षां ललुः केऽपि सम्यक्त्वरत्नव्रतानि स्वकायं पवित्रं विधाय प्रणम्याऽऽप्तनाथं च केऽपि स्वकीयं स्वकीयं गृहं शि-७०० श्रियुः प्रीतिभाजो नरास्तीर्थराजोऽष्टभिः प्रातिहार्यैः सदा शोभमानो विहारं विधत्ते स्म देवैः समं कोटिभिर्न्यूनभावेऽपि जाग्रद्यशा वेदलोकप्रमाणैः (३४) शयैरातिपूर्वैश्चमत्कारमुत्पादयन् सर्वतः सर्वविश्वश्रियं पालयामास देवाधिदेवो महात्मा मुनीन्द्रो गुणानन्त्यभृत् क्षीण ८०० मोहो जितात्मा चिदानन्दरूपः कलावान् निरीहो जनानन्ददायी कलाकेलिकन्दक्षये कोलभूतः स्व(सु)धावाक् क्रियावान् जगन्मित्रताशेवधिः सद्विधिर्बान्धवः प्राणिनां भव्यभूतात्मनां शान्तिमूर्त्तिर्जगत्कीर्त्तिलक्ष्मीवरस्तारकः पारगामी भवाम्भोधिमध्यस्य सभ्यार्चितः कर्मसम्मूलनो ९०० द्योगभी(ती)क्ष्णाशयो भारतक्षेत्ररत्नं जिनेशो मुनीनां सहस्राण्यथो षोडश प्रीतिभाजां सहस्रं तथा सिद्धिवह्निप्रमाणं नतार्यार्यिकानां नराणां सुराणां तिरश्चां च कोटीश्च संरक्ष्य संसारतो भीतिहेतोः स्वयं ज्ञातनिर्वाणकालो दयालुः क्षमासागरः प्राप्तसर्वार्थ सिद्धिः सुखी ३०००,

शिरसि शिखरिणः श्रिया राजमानस्य सम्मेतनाम्नः समागत्य कृत्वा च संलेखनां मासिकीं साधुभिस्त्र्युत्तरत्रिंशता राजमानो बलक्षेऽष्टमीवासरे श्रावणस्यार्द्धरात्रक्षणे क्षीणकर्मा

विशाखास्थिते रोहिणीवल्लभे वल्लभो मोक्षलक्ष्म्या बभूव श्रितो
जैनमुद्रामनङ्गोऽक्षयी सि-१०० द्धकार्यो निरालम्बनः
सिद्धमध्यस्थितोऽनन्त-च्चिद्दर्शनोऽन-न्तसौख्यश्रितोऽनन्त-
सारात्मकोऽनक्षरूपारसः स्पर्शगन्धच्युतः सङ्गवेदोज्झितो
देवनाथैर्मिलित्वाथ सर्वैः कृतश्चन्दनैर्देहदाहो जिनस्यास्थिराशिः
क्षणादुज्झितः क्षीरनीराम्बुधौ पूर्वरीत्या समादाय दाढाः समा
द्वीप २०० नन्दीश्वरेष्टाहिकां जैनभक्त्या च निर्माय देवालयं
शिश्रिये भक्तलोकस्ततः स्थापनार्हन्तमानन्दसन्दोहहेत्वर्थ-
मर्हत्समानं विधायाच्चर्व- यामासुराजन्मकल्याणरत्नाश्मरूप्या-
दिसद्द्रव्यजातैः पवित्रैर्विचित्रैः स्फुरत्कान्तिभिः शान्तपापं च
तं समालोक्य भव्या अनेके नमस्य-३०० न्ति बोधिं लभन्ते
श्रियं मोक्षलक्ष्मीं सुराज्यं शरीरं निरामं यशःकीर्त्तिसौख्यं
भव्यार्द्रनागार्जुनश्रीकुमारादिपालाद्यनेकाङ्गिवर्गा इव प्रीतिभाजः
पुरे राजधान्यां तथा ग्रामजाते गृहे कोटिसङ्ख्यात्मके देशदेशान्तरे
सर्वतो भ्राम्यता पार्श्वबिम्बानि रम्याण्यनेकानि दृष्टानि ॥४००
पुण्यानुभावात् समाकर्णितानि प्रसिद्धानि च स्तम्भनादीनि
संवत्सरे लोकसिद्ध्यङ्गभूमि (१६८३) प्रमाणे मया भाग्यतो
जैनराजाज्ञया जेसलाख्यप्रधाने च दुर्गे क्षमाधीशसन्दोहगर्वापहारे
महीमण्डलाक्षोभ्यसामर्थ्यरम्ये विपक्षैरगम्ये शरण्ये महद्धर्मशर्मप्रदं
मोक्षल ५०० क्ष्म्याः पदं कृत्तसर्वापदंशस्थितिक्षेमकृत्
लोकशोकापहारि प्रमोदास्पदं चैत्यमुच्चं प्रभोः पार्श्वनाथस्य दृष्टं
सदिष्टं क्षमाकारणं पापसन्तापनिर्व्यापनेऽलं भयक्लेशनिर्नाशकं
यत्र सर्वत्र बिम्बानि रम्याणि पुण्यानुयायीनि सन्त्यस्तपापानि

भूयश्चतुर्दिक्षु देवालयानां ६०० लघूनां द्विपञ्चाशदङ्गिप्रणम्याऽस्ति यत्राद्भुतैर्बिम्बचक्रैः सदा शोभमाना पुनर्यत्र नन्दीश्वरद्वीपवर्त्त्यार्हता- गारसङ्ख्याकृतिर्वर्त्तते भव्यलोकैर्नता मुक्तिमार्गे प्रोच्चमाङ्गल्यमालेव विभ्राजते तोरणश्रेणिराप्ताच्छबिम्बैर्युता माननीया महेभ्याङ्गिभिर्यत्र भाग्योद ७०० योद्रेकरूपगुणानां गृहं मोक्षलक्ष्म्याः सुपुण्ड्रौपमं तोरणं द्वारवर्ति प्रदीपोपमं स्वर्गमार्गप्रकाशप्रदे मन्दिरस्याग्रतः शिल्पिभिर्निर्मिताभिः प्रशस्योत्तमै रम्यपाञ्चालिभिर्विचित्राभिरानन्ददाद्यस्ति सत्सूरिमुख्याकृति क्षेत्रपालाम्बिकाशाश्व(स)नाधिश्वरीमूर्तिभी राजितं ८०० यत्र (श्री) पार्श्वपारङ्गतस्याच्छमूर्तिं चलत्पुण्यमूर्तिं सुरश्रेणितेजःश्रितां नागराजानुभावान्वितां कल्पवृक्षोपमां कामितार्थप्रदे मोक्षनिःश्रेणिभूतां जिनाद्यन्तकौशल्यसूरीशमुख्यैः प्रतिष्ठां सुनीतां महत्सूरिमन्त्रेण जाग्रत्प्रतापां विलोक्याच्छपात्रं प्रमोदस्य जातं मनः प्री ९०० तिभाग् मे सुलब्धो भवो मानुषोऽद्याथ हे नाथ ! विज्ञप्तिरेषा पवित्रा महादण्डकेन श्रिता तावकीना नवीना कृता रत्नसारान्तिषद्रत्न-हर्षोल्लसद्धेम- सन्नन्दनानां प्रसादात् स्वाभावादि-सत्कीर्तिनाम्ना विनेयेन सभ्यं पदं वाचकं बिभ्रता सज्जनानां प्रमोदाय भूयात् सदा ॥४०००

## (५५) ॥ श्रीपञ्चासरपार्श्वनाथस्तुतिः ॥

### (दण्डक)

सुखसमुदयसाधकं विश्वविश्वेश्वरं पार्श्वपञ्चासरं पत्तनाधीश्वरं संस्तुवे सादरादश्वसेन-क्षमाधीश-वंशावतंसं, सहस्राक्ष-शीतांशु-भास्वन्नराधीश-नागेन्द्र-विद्याधराधीश-

सन्दोहसंसेवितं, दत्तचितेप्सितं, प्राप्तपूर्णद्युतिद्योतितार्थं समर्थं सदा सुप्रसादं भवाम्भोधिसेतुं शिवश्रीविलासोद्यतं तीर्थपं, विगतममलमद्भुतं स्वेदसंवर्ज्जितं स्फारगन्धं स्वभावात्सुरूपं महानन्दरूपं समुत्फुल्लराजीव-राजी-विराजत्परा-मोद-सब्रह्मचारि-स्फुरत्श्वासमत्युत्तमामोद-गोक्षीरधारा-

सदृग्मांसरक्तं जगल्लोचनाऽगोचराहारनीहार-कार्य-क्रिया-पूर्णकुम्भं शरीरं धरन्तं धरायां सुसम्पत्परायां महानन्द-संसिद्धये, अतिशयविभवान्वितं घातिकर्मक्षयाद् दीप्यमानं स्फुटं तेजसा भूयसा केवलज्ञानरूपेण सर्वार्थसार्थ-प्रकाश-स्वरूपेण लोकत्रयानन्द-कन्दायिते धर्मसद्मन्यनेक-प्रकार-स्वधाभोजि-तिर्यग्-मनुष्याऽसुराणां भृशं कोटिकोटि-प्रमाणां, स्थिति-स्थापके योजनस्यैक - मात्रेऽपि सर्वासुमद्बोध-मुत्पादयन्तं सदुक्त्या शुभं, त्रिभुवन- पतिपाद-विन्यासपुण्ये विहार-क्षमा-मण्डले मञ्जुले योजनानां शते साधिके साधिकान् गुल्मछर्दि प्रछर्दि-प्रभृत्योल्लसद्राजयक्ष्मारूपा-नतिपामाऽतिसाराऽर्श

-मूर्च्छा-प्रमेह-प्रतिश्याय-शोकोपतापान् नयन्तं क्षयं, तत्क्षणावेशं यन्महिम्नां प्रभावेण विश्वैकविस्तारिणा ह्योषधिनेव कल्याणमालाभृता ॥ १

प्रबलशलभमूषकाः शस्यसम्पल्लताडूयका ईतयो नोद्भवन्त्येव विश्वंभरायां प्रभूणां प्रभावे प्रसर्पत्यवश्यं प्रणश्यन्ति लोभानिलैर्वर्द्धमानस्वभावा अपि स्फार-रामाश्वरत्नाम्बरो-त्तंसताडङ्क-केयूर-हारार्द्धहारोर्मिका-किङ्किणी नू-पुरोद्यानसोमोद्भवा वैरधूमध्वजा यद्विहाराम्बुना शान्तिभावं गताः,

नियमतोऽतिवृष्टयः कष्टमुत्पादितुं नैव शक्ताः समन्तादनावृष्टयोऽवग्रहैस्संगृहीताः, क्षितौ मारयश्चाप्यसातं न कर्तुं मनागप्यहो सार्वमाहात्म्यतः स्वीयचक्रोद्भवा वाऽन्य-चक्रोद्भवा भीतयोऽनीतयः पार्थिवैर्वार्यमाणा इव नोत्सहन्ते प्रभापूरदूरीभवद्-ध्वान्ते जाते जगत्स्वामिपृष्टौ हि भामण्डले भ्राजमाने सति, अभिनवरुचिराजितं रत्ननिर्मापितं धर्मचक्रं स्फुरत्पञ्चवर्णां प्रसूनाभिवृष्टिं तथा भव्यनव्योल्ल-सद्वर्ण-सौवर्ण-पद्मानि सार्वक्रमाम्भोज-विन्यास-भूमौ विकुर्वन्ति देवाश्चतूरूपतां चापि दानादिभेदप्रकाशार्थमिन्द्रध्वजं व्योम-संस्पर्शिनं, स्वर्ण-माणिक्य-रूपात्मिकां चारु-वप्रत्रयीं, कान्ति-संशोभितां, सकल-भुवन-विस्तरं दुन्दुभिध्वान-मानन्दसंसूचकं, कण्टकानामधोवक्त्रता चानुकूल्यं समीरे, कचश्मश्रुलोम्नो नखानां च तद्रूपतां, पक्षिणां दक्षिणत्वेन सञ्चारितां, सौष्ठवं, स्पष्टमानन्द-सम्पादकत्वं, वसन्ता-द्यृतूनां प्रसूनादिभिः इन्द्रियार्थानामनुकूलत्वं, द्रुमानां नतिं द्रव्यतो भावतश्चार्पिते सन्तु सौख्यश्रिये तीर्थपाः ॥ २

समवसरणमण्डले कोटिकोटिप्रमाणैस्सदा पादपीठे लुठद्भिः सुपर्वव्रजैराजिते चामरोद्भासिते प्राज्यशोभे वरस्फाटिक-स्वच्छसिंहासने ह्युपविश्यासुमत्तत्त्व-सम्पत्तये धर्म आदिष्ट-आप्तैर्वरज्ञान रत्नैर्गिरा, संस्तुतोल्लेखयोच्चैःस्वरोदारया,

ग्राम्यतात्यक्तया, मेघगम्भीरया सप्रतिच्छन्दया, दक्षिणालापया समुदितबहुराजया, स्फारबद्धार्थया, त्यक्त-पूर्वापरास्पर्शिवाक्यार्थया, स्वीयसिद्धान्त-साकल्यसिद्धार्थया, वक्तृशिष्टत्व-सार्थीकृतश्लाघया, संशयायुक्तया,

न्यक्कृतानेकदोषोरुसंसर्गया चित्तसंगृह्ययाऽन्योन्य-वाक्यादिसाकाङ्क्षया, संसदुल्लासिसंदर्भया, वाच्यवस्तुस्वरूपा-नुसारिश्रियाऽन्त्यन्त-संबद्ध-सत्संप्रसाराच्छ्या परिहृत-परकीय-निन्दात्मकीर्तिप्रथा-सङ्गयोद्देश्यवस्तुप्रसङ्गी-भवद्-व्याख्यया, स्नैग्ध्य-माधुर्य-सङ्गर्भया, प्रोक्तसाद्‌गुण्यतः प्राप्तसुश्लाघया, चान्यमर्माप्रकासिप्रवृत्याभिधेयार्थया, तुच्छराहित्यया, व्यक्तधर्मार्थसंबंद्धया, कारकादेर्विपर्यासनिर्मुक्तया, भ्रान्ति-सन्त्यक्तसद्‌वाक्योत्पादिताच्छिन्नकौतूहलव्रातसम्यक्‌श्रिया विशदविषयमद्‌भुतत्वास्पदीभूतया, चाबिलम्बप्रशस्यार्थया, नैकवस्तूल्लसद्‌वर्णनोक्तार्थयाऽऽरोपितोद्‌भूत-वैशिष्ट्यया, साहसोपेतया, वर्णवाक्यादि-भेद-प्रतिष्ठाभृता, वक्ष्यमाणार्थ-निर्णीतपर्यन्तया, प्राणिनां खेदविच्छेदसंपर्कया, द्वादशाङ्गी सतां साऽस्तु सौख्याय, मिथ्यामतध्वान्त-विध्वंसिनी, शुद्धमार्गोदयार्क-प्रभा ॥ ३

सरस-कुसुम-मालया नित्यमुत्फुल्लया प्रोल्ल-सद्‌गन्धविस्तारया सुन्दराकारया कान्तिसम्भारया केतकीस्फारया चम्पको-दारयाऽलङ्कृतोरःस्थललोकलब्धादरा, नम्रविद्याधरा, पत्रलेखाधरा अर्ध्यशुद्धाम्बरा, पार्श्वसेवापरा, ध्यानबद्धादरा पादपद्मद्विरेफीभवन्नागरा, सर्वगीर्वाण-रामार्ध्य-मानाद्‌भुत-श्रीभरा, विपुलकमल-लोचना नाग-नाथाग्रपत्नी प्रसिद्धा। समृद्धा प्रगल्भीभवत्सर्व-शास्त्रार्थ-वैशद्यसद्यस्कपद्यादिसंन्दर्भ-गर्भीकृतात्यन्त-बुद्धि-प्रदीपैः प्रबुद्धैर्मनःपद्मकोशे धृता, भक्तितः शक्तिः सेवकानन्दसन्दोह-संसाधिनी, पूर्णपुण्यप्रथा सूचका-द्‌भुतवादित्रनिर्घोष-गम्भीरपार्श्व-प्रदेश-प्रकामोत्सवैः शोभिता,

जयति विजयसिंहसूरीश्वराणां यशःकीर्ति-विख्यातिविस्तारिणी, स्फारसिंहासनस्था, शरीरद्युद्योतिताऽशेष-सामाजिका काश्यपीमण्डला-खण्डतेजःप्रचारा, प्रभुप्रोक्तसिद्धान्त-भक्ति-भवच्चित्तवृत्तिप्रतिव्रात-सन्तोष-सन्दोह-सिन्धु- प्रभूल्लासचन्द्र-प्रभा सद्गुण-श्रेणि-शुभ्रीकृतानेक - लोका कला-कौशल-भ्राजिता, बुधगजविजय-प्रकृष्टार्थ-सार्थ-प्रदा, मोहितानेक-विद्वज्जना, कामरूपा, वरज्ञान-विज्ञान-लीला विलासश्रिया, स्फारधम्मिल्ल-संविस्फुरत्कान्ति-कर्पूर-कस्तूरिका-स्तोम-सम्प्रीणितानेकलुभ्यद्-भ्रमद् - भृङ्ग-पङ्क्ति-प्रभावा, तथा भाग्य-सौभाग्य-सौख्य-प्रगल्भ-स्वभावैक-भूमिः सेदाऽऽशाल-तावाटिका, विश्वदेवीवृता देवी पद्मावती ॥ ४

(५६)

चिदानन्दकल्याणवल्लीवसन्तं लसन्तं महाप्रातिहार्यैः प्रधानै-र्निधानैः शिवानां नवानां विशिष्टगरिष्ठैः स्फुरद्भाग्यसौभाग्यलक्ष्मीं ददानं निदानं जनानां लसद्भक्तिभारैर्भृतानां शिवश्रीरमायाः क्षमाया अगारं नगाधीशधैर्येण वर्यं,

जगज्जन्तुराजीमनोऽभीष्टसम्पादनप्रौढगीर्वाणवृक्षोपमानं प्रभावैः प्रभूतैस्त्रिलोकीतलैश्वर्यकारिस्वरूपैः सनाथं सदा विश्वनाथं यशोभिः सुशोभां समानैरमानैर्निशानाथमन्दारगङ्गातरङ्गोत्कराणां समन्ताद् भृशं सञ्चरद्भिः शुभाभैः ।

नमन्नाकिनाथावलीसेव्यमानं मदक्रोधमायाभयक्लेशमाना-दिदोषद्रुदावानलं प्रत्यलस्फातिभृत्प्रीतिदानैकशुद्धानुभावं

भवद्धोगभङ्गीभिरङ्गीकृतं क्रान्तिमत्कान्तलावण्यपूरैः पवित्रैः पुनानं समग्रं महीमण्डलं प्रीणयन्तं प्रभाभिः,
प्रसिद्धाश्वसेनक्षमाधीशवंशोदयक्षोणिभृत्शृङ्गारणद्वादशात्मान-मात्मानमाशु प्रशस्तं परं सर्वदेवाधिदेवं स्फुरद्विघ्नविध्वं-सबद्धावधानं जिनं पार्श्वनाथं नमामि त्रिसन्ध्यं त्रिशुद्ध्या प्रसिद्धं समग्राग्रिमानन्तसम्पत्कृते भावतोऽहम् ॥१॥

अगाधं स्फुरद्दर्पकन्दर्पपरैर्भवाम्भोनिधिं नित्यमुक्तावधिं मानमायामदक्रोधनक्रावलीसङ्कुलं शोकसन्तापदुष्टापदालोलक-ल्लोल-मालाकरालं दुरन्तातुलादृष्टपुष्टाम्बुसम्पत्कराक्रूर-विद्युत्कषायै-स्तुपातालकुम्भैरिवाकीर्णमध्यं,
जराजातिपाठीनपीठोत्कटं सङ्कटं मोहवल्लीवितानैर्भृशं सर्वतः पूरितं भूरितृष्णापयोभिः प्रभूतैः प्रचण्डैः कुबोधोद्धुतो-र्वाग्निदुःसञ्चरं सञ्चरन्मत्सरातुच्छमत्स्यैर्भयोद्भृतिकृद्दर्शनं सत्वरं भव्यजीवा न के के तरन्ति प्रमोदात् समग्राः ? ।
यदीयं पदाम्भोजमासाद्य पोतोपमानं लसन्नव्यनानागुण-श्रेणिमाणिक्यमालाभिरालिङ्गितं सङ्गतं विश्वशस्यश्रिया संश्रितं सर्वदा बुद्धिवृद्धैः समृद्धैः प्रबुद्धैर्विशुद्धार्थसार्थप्रदं देवताऽधिष्ठितं सत्कृतं लक्षणानां समाजैः प्रक्लृप्तोत्सवाद्यैः,
मम श्रीजिनेन्द्राः सुरेन्द्रावलीनम्यमाना अमाना महोभिर्महद्भि-र्जनानन्ददानप्रवीणैर्नवीनैर्जगज्जन्तुसन्तापविध्वंसकृद्वा-ग्विलासा निवासाः स्फुरच्छर्मलक्ष्म्या अभङ्गोत्तमानन्तसद्भाग्य-सम्भारलभ्याः सृजन्तु प्रकामं मनोवाञ्छितं ते समग्रम् ॥२॥

अनेकान्तसद्वादमूलं जगन्नाथदत्तत्रिपद्येकबीजं गणाधारमुख्यैः कलालब्धलक्षैरिवारामिकै रोपितं सर्वसम्पत्तिजाताभिलाषोद्यति-र्निस्तुषादूष्यवैदूष्यशिष्यव्रजक्षोणिपीठे प्रकृष्टोत्तमानन्त-सद्भक्तिपूरैः सदार्द्रश्रियं श्रीयमाणे,

स्फुटानित्यनित्यादिवादस्थलैः प्रत्यलैस्तार्किकश्रेणिसंशीतिदा-घौघविच्छेदलीलाविधौ वेदसंख्यैः ककुन्मण्डलव्यापकैः प्रौढशाखाकुलैः शोभमानं समानन्दितानेकलोकं निजच्छायया स्वच्छया संहरन्तं दुरन्तं ततव्यापतापप्रचारं प्रभृतम् ।

अनन्तागमासङ्ख्यपर्यायवर्यप्रसर्पल्लसत्पल्लवैः प्रीणयन्तं सकर्णव्रजैस्तूर्णमावर्ण्यमानैरमानैर्बुधाधीशनेत्राणि सच्चित्रकृद् व्यक्ति-भृद्युक्तिभृद्युक्तिसंयुक्तवाक्यावलीपत्रराजीपवित्रप्रभं निवृत्तेः कारणं वारणं व्यापदां सन्ततेः सर्वकालं,

जिनेन्द्रागमं सङ्गमं शुद्धसिद्धेः सुपर्वद्रुमं न्यायपुष्पावलीसङ्कुलं मञ्जुलं भङ्गजालप्रतानैः सदा सर्वतः सेव्यमानं मुनीशैः स्वपक्षद्वयीराजमानैर्मनोऽभीष्टसृष्टिपरिष्टं श्रयेऽहं फलैः पूरितं विश्वविश्रामभूमिं मरुन्मण्डलीरक्ष्यमाणम् ॥३॥

चलत्कुण्डलामण्डिता खण्डितानेकशत्रुप्रचारा विचारा-ञ्चितागण्यलावण्यपूरप्रवाहैर्न वा हेमसौदर्यवर्यस्वदेहप्रभाभिः शुभाभिः प्रभावैः प्रभूतैर्विभूतिप्रदैः प्रीणयन्ती मुनीनां समाजं समाजन्यमानाश्रितश्रेणिरक्षा कलौ कल्पवृक्षा,

स्फुरद्व्यक्तमुक्ताफलोदारहारश्रिया सङ्गता चङ्गतारुण्यपुण्यालया लीलया सञ्चरन्ती चरन्ती द्विषां प्रौढिरूढानुभावं विभावन्नता-

शेषगीर्वाणवर्णा सुवर्णाचलौपम्यभृद्धैर्यसौन्दर्यगाम्भी-र्यतेजोभरैः सुन्दरैर्निभरं संश्रयन्ती महत्त्वम् ।
क्वणन्नू पुरालङ्कृता न्यक्कृतारातिजाताऽद्भुता नागिनी-राजिसम्पूजिता तर्जितापारविघ्नप्रकारा महामत्तमातङ्गरङ्गद्गति-प्राञ्जला विश्वविख्यातकीर्त्या शशाङ्कं जयन्ती जगद् रञ्जयन्ती भयं भञ्जयन्ती कुतीर्थप्रभूणां परेषां समेषां,
मम श्रीनिवासा नगाधीशपत्नी घटाकोटिसाम्राज्यलक्ष्मीं श्रयन्ती नयन्ती सदैवोन्नतिं शासनं पार्श्वनाथस्य देवाधिदेवस्य नित्यं मनश्चिन्तितं सत्वरं देवतामुख्यपद्मावती स्वामिनी विश्वमाता ददातु त्रिलोकोत्तमं पुण्यकारुण्यपण्यार्पणाभा ॥४॥

(५७) (दण्डक)

सरसिज-समसुन्दरानन्द-सन्दोह-शम्याद-नामन्द-सम्यक् मदेंदिन्दिरामोदनन्दि-प्रदास्यन्दि-वाणी-मधु-भ्राजिरम्याननं,
फणधर-धरणाधिराज-प्रजापाल-लेखाधिपेभ्यो नमन्मौलि-सन्मौलिमाला-लसत्सलीलालिमाला-सुमस्रक् सुगन्धिक्रमाम्भोरुहम् ।
नवनिधि-नवसम्पदादान-सन्धान-रङ्गत्फणा-शालि शालासलीलोल्लसन्नीलवर्णा-सवर्ण-प्रभुतोरु-वर्णाङ्ग-कल्पद्रुमं,
सुमिलित-नरनारी-सम्भारसङ्गीत-गीत-प्रभुताति-सङ्गीत-वादित्र-संशोभितोत्तङ्ग-सद्रङ्ग-रङ्ग-गृहे पार्श्वनाथं स्तुवे ॥ १

कुलगिरिवर-कुटसम्यक् - कुरुव्यन्तरोदारतारा-सुरादि-गृहोदार- वैमानिकानेकनाना-विमानान्तर-स्फीत-चैत्याश्रितान्,

दधिमुख–रतिकार–भाराञ्जनाद्रि–प्रकार–प्रभासि–प्रभा–भारत–
नन्दीश्वर–द्वीपसत्तार–तारोच्चवैताढ्य–कूटे स्थितानादरात् ।
विविधरूचक–कुण्डल–द्वीपमेरुद्वीपोद्यद्द्रह–शृंग–वक्षस्कृद्दष्टा–
पद श्रीनिकेतोज्जयन्ताद्रिसम्मेत–तीर्थाधिराजाद्रि–शत्रुञ्जये, नमत
जगति कृत्रिमाकृत्रिमान्, स्थापनार्हत्त्वसारानन्तोरू–विज्ञान–
विज्ञान–सर्वार्थवर्याननर्थ–प्रमाथप्रधानान् जिनान् ॥ २

जिनमत–मतनु–स्वरूपं स्वरूप–प्रमा–रूपितारोप–निर्मुक्त–
सद्युक्ति–संयुक्ति–संयुक्त–पर्याप्त–पर्याय–द्रव्यादि सम्पादकं,
प्रवर्तितनय–नैगमादि–प्रवादप्रवादित्व–शब्दार्थता–सूपपाद–
संवाद–संवादि–सप्तोक्त–सङ्ख्यैर्नयैर्भूषितान्तःपथपावनम् ।
जलधर–मिव सर्वसार्वं–क्रिया–विप्रयुक्ताऽक्रिया–ज्ञानवादि–
क्रियावैनयादि–स्व–पाखण्डवाग्ग्रीष्मसन्तप्त–भव्याङ्गि–
निर्वापणम्, गणधर–वर–निर्मितं निर्मित–द्वादशाङ्गोत्तमोपाङ्ग–
युक्तोक्ति–निर्युक्तिगोप्यश्रुतैर्विश्रुतं सूत्रतः सूत्रितं चार्थतस्तीर्थपैः
॥ ३

वितरित–जिनशासना, शासनोद्भासनाकारिकर्तव्य–कर्तव्यता–
सव्यपेक्षा, विपक्षाक्ष–दुर्लक्ष–सत्पक्षचेतःप्रवृत्तिः सताम्, सुरवर–
सुरसुन्दरी–सुन्दरोदस्त–हस्त–द्वया–वीक्ष्यमाणप्रकीर्णाति–
संकीर्णसत्केशहस्त–प्रशस्तोत्तमाङ्गप्रसङ्गाङ्गभृत् ।
विदलित–परपक्षलक्षाति–दुर्दक्षचञ्चत्सटाभारलक्षोरुपक्षोग्र–
पिङ्गाक्षहर्यक्षराजस्थिता भोगि–भोगव्रजालङ्कृता,
प्रदिशतु धरणाग्र–पत्नी सुयत्नेन, पद्मावती सयक्ष–सोमरम्या–
नना सर्वदा जैनचन्द्रानतस्यार्यसङ्घस्य वृद्धिप्रदा ॥ ४

(५८) (अनुष्टुप्)

जिणजिराउलीपासं, थुणामि महिमालयम् ।
अमन्दानन्दमन्दारं, देविंदवंदिअक्कमं ॥ १

संसाराम्बुनिहाणम्मि, पाणीणो पोअसंनिभे ।
नाभेयाई जिणे वंदे, आइविज्झाण कारणे ॥ २

जीवाईसव्ववत्थूणं, पयासणदिणाहिवे ।
हुज्ज बुद्धिप्पयासो मे, सिद्धंते जिणभासिअे ॥ ३

जक्खोवि पासनामेण, नागिंदाइसमण्णिओ ।
निव्वाणसाहणे सज्झं, करिज्जा सुहकारओ ॥ ४

(५९) (उपजाति)

जीराउलीपासजिणिंदचंदं, नमन्तधीमन्तसुरासुरेन्दम् ।
नमामि तेलुक्ककयपयासं, सपायसेवापरिपूरिआसम् ॥ १

तेलुक्कलच्छीनिलया नरिंदा, मरिंदवन्दिय-पयालविंदा ।
कल्लाणवल्लीजलया जिणिंदा, जत्थ तुलच्छिसुविसालकंदा ॥२

जिणिंदकयागमओ गइंदो, निव्वाणमग्गे सुविसालकंदो ।
कुवायवाईभमए मइंदो, मोहान्धयारप्पहणे दिणिंदो ॥ ३

तित्थप्पभावो नय-निव्ववायं, निव्वाणमग्गे विगयप्पमायं ।
जिणिंदसेवासुरइसुसायं, जक्खोवि पासो कुणउ प्पसायं ॥ ४

पू.पं.श्री सौभाग्यविजयगणिविरचिता

(६०) (भुजङ्गप्रयात)

महाणन्दमायन्दकल्लाणकीरं,
कला-कोसलं पत्त-संसार-तीरम् ।

जिणाधीसपासं सरण्णं बुहाणं
सया संथुणो अंतलिक्खाभिहाणम् ॥ १

तिलोगप्पहाणा जिणा वट्टमाणा,
महीमण्डलाखण्डलासेवमाणा ।
तहा जे य भूआ भविस्संति बुद्धा,
सुहं दिंतु ते सासयं तित्थ-सिद्धा ॥ २

महा-दुक्ख-दावग्गि-निण्णासनीरं,
मणुन्नाइ माया-महीदारसीरं ।
भवारण्णपाहेज्जमाणन्दखाणी,
सुखं देऊ मज्झं जिणिंदाण वाणी ॥ ३

सुरिन्दासुरिन्दा य नागिंद-जक्खा,
सुभत्ताण भव्वाण रक्खासुदक्खा ।
तहा जक्खिणीओ पसायग्गहत्था,
पकुव्वंत संघस्स संतिं पसत्था ॥ ४

(६१) (मालिनी)

नमिरनरसुरेसो, नट्ठनीसेसदोसो,
सयलजयपयासो, पूरियासेसआसो ।
जणियमणयणासो, सिद्धिबुद्धीण वासो
सयलगुणनिवासो, मे सुहं देउ पासो ॥ १

खुडियनिबिडमोहे, निज्जियाणंगजोहे,
विहियविविहबोहे, पत्तसम्मत्तसोहे ।
विमलगुणसणाहे, निज्जियासेसबाहे
विगयविसयदाहे, वंदिमो तित्थनाहे ॥ २

पयडियपरमत्थं, मोहनिब्भेयसत्थं,
दुहदलणसमत्थं, सव्वभावप्पसत्थं ।
नयगहणपसत्थं, हेउ–जुत्तीमहत्थं,
हरउ दुरियसत्थं, तित्थनाहस्स तित्थं ॥ ३

सुर–नरनयपाया, सिद्धिधम्माणुराया,
पणयकयपसाया, सच्छ–ताविच्छ–च्छाया ।
परदलियअवाया, धम्मकिच्चे सुहाया,
मम सुहमविसाया देउ नागिंदजाया ॥ ४

(६२) (स्त्रग्विणी)

पुण्ण संपुण्ण चंदाणणो णंदणो,
आससेणस्स जीराउलीमंडणो ।
वंदणो देववंदाणसस्संदणो,
मुत्तिमग्गंमि पासो सया णंदणो ॥ १

तित्थणाहा महाणंद संपायणा,
कम्मममम्माहई सासई सासणा ।
हेम रम्मा छुआली सुलीलामणा,
अम्ह आसाउ पूरतुं पुण्णासणा ॥ २

दूरदूरीकया कंतभतारणो,
दारणो दूरणाणं भवत्तारणो ।
या सभासारणो, दुम्मणो वारणो,
हेउ मे संमओ पुर्ण (ण्ण) संसारणो ॥ ३

पासजनकासुरखो सुरकामणो,
भामणो ईमणो इह भयामणो ।
अद्य कज्जाणसज्जाण ओसावणो,
दंतवणवाई पवाईया पावणो ॥ ४

(६३)

सयलजयपयासं भव्वसंपूरियासं
जणमयणवियासं नट्ठनीसेसतासं ।
जसभरभरियासं खुट्टसंसारपासं
पणमह सिरिपासं दुट्ठकम्मट्ठनासं ॥ १

विहडियपडिवक्खे सव्वसंपत्तिदक्खे
नयसुरनरजक्खे फेडियाणंतदुक्खे ।
कयनयजणरक्खे तित्थनाहे सुलक्खे
विहियपरमसुक्खे वंदिमो पत्तमुक्खे ॥ २

भुवणयलपहाणं जम्मभूमिमहाणं
पयडवरनिहाणं सग्ज(व्व?)सिद्धिसुहाणं ।
मलियकुनयमाणं निच्चमक्खेभमाणं
वियरउ वरनाणं सासणं मे जिणाणं ॥ ३

गुणगणपडिपुन्ना हारनीहारवन्ना
वरकमलनिसन्ना देवसंघाणवन्ना ।
फुरियरयणकन्ना वद्दिया संखपुन्ना
मम विमलियपुन्ना होउ वी(वा)णी पसन्ना ॥ ४

(६४) (उपजाति)

अघौघवल्लिच्छिदिशातपार्श्व !, सम्पादितानन्दपदैकपार्श्व ! ।
श्रीपार्श्व ! चञ्चत्समय ! स्वयम्भो,
सर्वज्ञजात स्तुत ! शं विधेहि ॥ १

(६५)

विजयदेव-संसेव्य-पार्श्वं सुपार्श्वं
विजयदेव-वृक्षानुकारं सुतारम् ।
विजयदेव-सत्तां सुसत्चित्तकोशे,
विजयदेव-तीर्थेशमार्हन्त्यमीडे ॥ १

२४

# ॥ श्रीवर्धमानजिनस्तुतयः ॥

(१) (मालिनी)

कनकसमशरीरं, प्राप्तसंसारतीरं,
कुमतघनसमीरं, क्रोधदावाग्निनीरम् ।
जलधिजलगभीरं, दम्भभूसारसीरं,
सुरगिरिसमधीरं, स्तौमि भक्त्या च वीरम् ॥ १

नमदखिलसुरेन्द्राः, पापपङ्के दिनेन्द्राः,
कुमतमृगमृगेन्द्राः, कर्मवृक्षे गजेन्द्राः ।
सुगुणमणिसमुद्राः, साधुचक्कोरचन्द्राः,
गतघनतरतन्द्राः, पान्तु वः श्रीजिनेन्द्राः ॥ २

जिनवदनहूदान्तात्, निर्गता वार्द्धिकान्ता,
सुपदसलिलपूता, पापपङ्कौघहर्त्री ।
जननमरणनित्या, द्वादशाङ्गी विचित्रा,
मुनिजनहितकर्त्री मोक्षसौख्यप्रदात्री ॥ ३

जितनयनकुरङ्गी, श्यामवेणीभुजङ्गी,
जिनमुखकजभृङ्गी, श्वेतवस्त्रैर्वृताङ्गी ।
निबिडजडिमरोग-ध्वंसने मातुलिङ्गी,
श्रुतनिचयवराङ्गी, देहि मे देवी सद्गीः ॥ ४

पू.आ.श्री जिनपतिसूरिविरचिता

(२) (मालिनी)

मदनदहननीरं क्रोधयोद्धैकवीरं,
मदजलदगभीरं दम्भभूभेदसीरम् ।

जलधिगुरुगभीरं लब्धलोभाब्धितीरं,
कनकरुचिशरीरं श्रीजिनं नौमि वीरम् ॥ १

हृतविषयविकाराः कर्मवल्लिकुठारा
नतसुरनरवाराः प्राप्तसंसारपाराः ।
सुखमतुलमुदारास्तीर्थपा लोकसारा
ददत शिववधूराः मण्डनास्तारहाराः ॥ २

नमदमरसुरेन्द्रं प्राप्तसम्मोहनेन्द्रं,
सुगुणमणिसमुद्रं यत्कषायादिरौद्रम् ।
नमत विहितभद्रं सत्त्वपीडादरिद्रं,
क्रमणकमलचन्द्रं शासनं जैनचन्द्रम् ॥ ३

जिनपतिनतिदक्षः प्लुष्टमिथ्यात्वकक्षः,
प्रणयिविहगवृक्षः स्मेरपद्मोपलक्षः ।
विचितकुशलपक्षः सद्यशोभिर्विलक्षः,
प्रवचनकृतरक्षः सोऽस्तु सर्वाणुयक्षः ॥ ४

पू.आ.श्री मुनिसुन्दरसूरिविरचिता

(३) (मालिनी)

रुचिररुचिरुचस्ते वर्धमानाक्षरश्री-
दयितदयितभव्याः श्रेयसः शासनस्य ।
परमपरमतश्रीजैत्रभक्तः सदा स्या-
मुदयमुदयपात्रं यल्लभे शर्म नित्यम् ॥ १

महायतमहायतच्चरणवन्दनाः श्रीजिनाः,
सदोदयसदोदयप्रथितशुद्धपुण्यागमाः ।
सुभाववसुभाववत्त्रिदशराजवृन्दार्चिताः,
सुरोचितसुरोचितप्रचितदामभिः पान्तु माम् ॥ २

सन्तः सन्ततशर्मणे दधति यं धीरोचितधीरोचितं,
श्रीदश्रीदमदर्शकं हृदि सते सम्पन्नसम्पन्नतः ।
प्राणिप्राणितदानवाग्वितनुतां सर्वज्ञसर्वज्ञराट्,
श्रेयः श्रेयसि वासकानि समयः पुण्यानि पुण्यानि मे ॥ ३

(शा. वि.)

कारं कारं जिनानामतिमतिविभवा ये स्तवं वास्तवं वा,
सारा: सारा: स्वभक्तेहितहितविपिने स्युः समानाः समानाः ।
क्रीडाक्रीडामहिम्नां सरसरतिसुरीराजयः श्रीजयश्री-
श्रेयः श्रेयस्विनस्तेऽसुरसुरपतयो मे क्रियासु क्रियासुः ॥ ४

(स्रग्धरा)

(४) (मालिनी)

प्रणतसुरनरेन्द्रस्फारकोटीरकोटी-
घटितमणिमयूखक्षीरधौताऽङ्घ्रिपद्मः ।
जयति जयरमायाः सद्मदीपालिकाया-
मुदितशिवसुखश्रीः श्रीमहावीरदेवः ॥ १

विशदकुमुदबन्धुज्योतिरुद्योतिलोकं-,
पृणगुणमणिमालारोहणक्ष्माधरक्ष्मा ।
त्रिभुवनजनगेयध्येयपुण्यप्रभावा,
भवतु जिनवराणां सन्ततिः श्रेयसे वः ॥ २

सुकृतकमलराजीबोधनब्रध्नतुल्ये,
शिवशिवपुरमार्गोद्योतदीप्रप्रदीपे ।
जगदखिलजनानां मोहनिद्रापहारो-
षसि वचसि जिनानामस्तु मे धीप्रकाशः ॥ ३

चरमजिनवरेन्दोस्तीर्थरक्षाधिकारे !,
कृतजगदुपकारे ! स्फारशृङ्गारसारे ।
प्रणत-सुरसमूहे ! देवि ! सिद्धायिके ! त्वं,
भव भविकजनानां सिद्धये वृद्धये च ॥ ४

छन्दोभिधाननिबद्धं वर्धमानजिनस्तुतिः

(५) (मालिनी)

वरकनकसुवर्णं श्रीमदम्भोजनेत्रं,
दिनकर-कुलिशाद्यैर्लक्षणैर्लक्षिताङ्गम् ।
सुरगण-नरदेवै र्मालिनीस्वं शुभाङ्गं,
व्यपगतमदमोहं नौमि तं वर्धमानम् ॥ १

परमतविहितोन्यत् कर्ममुक्तोऽन्यदात्मा,
वरविषयविधिज्ञं ज्ञानमन्यत् तदेवं ।
तदुभयमपि येषां नैव भिन्नं कथञ्चि-
न्निगदितमविकल्पं पान्तु नस्ते जिनेन्द्राः ॥ २

जयति हि सुविशालं कारणं कारणानां,
सकलभुवनचक्षुर्मङ्गलं मङ्गलानाम् ।
सततमशरणानां देहिनां दुःखितानां,
जगति शरणमेकं वर्धमानस्य तीर्थम् ॥ ३

असितजलदनीलः पद्मपत्रायताक्षः,
पृथुविपुलभुजांशः पीनलम्बोदरोरुः ।
त्रिभुवनमहितानां भाषितं यो जिनानां,
प्रवचनमनुरक्तः पातु सर्वाणयक्षः ॥ ४

वादिगजपञ्चाननपण्डितवीरचन्द्रेण रचितास्तुतिः

(६) (मालिनी)

मथितमदनदर्पं ध्वंसिताज्ञानचक्रम्,
प्रणतसकलशक्रं प्रीणितप्राणिचक्रम् ।
दलितकुनयमाणं सत्तहत्थप्पमाणं,
सुरसयकयमाणं वंदिमो वद्धमाणम् ॥ १

विदितसकललोकान् खण्डिताशेषशोकान्,
सजलजलदघोषान् वर्धितानन्ततोषान् ।
गुणरयणसमुद्दे पत्तनीसेसभद्दे,
पणयसुरनरिंदे वंदिमो तित्थइंदे ॥ २

प्रणतहतकलङ्कं धौतमिथ्यात्वपङ्कं,
प्रमितिजलविशालं चारु हेतूर्मिमालम् ।
विबुहकयपसंसं नासियासेसदोसं,
पणमह जिणतित्थं भावओ सुपसत्थं ॥ ३

मदमलिनकपोलं प्रावृडम्भोदनीलं,
गजपतिमपि संस्थो याति यः सुव्यवस्थः ।
जिनवरभवणेसुं सक्कसंपूइएसुं,
दिसउ सुकयरक्खो सुक्खमम्हाण जक्खो ॥ ४

(७) (शार्दूलविक्रीडित)

पद्माऽऽस्ये शतपत्रपत्रनयने कुम्भीनकुम्भस्तने,
रम्भास्तम्भनिभोरुचारुचरणे सन्नाकनारीजने ।
लास्यं यस्य कलाकलापकुशले कुर्वत्यपि ध्यानत-
श्चेले नाऽचलनिश्चलेन मनसा जीयात्स वीरो जिनः ॥ १

जन्मस्नात्रविधौ विधूततमसा येषामशेषं जगत्,
जातं जातमहोदयं दितिसुताऽऽरातीयलोकोपमम् ।
नम्राखण्डलमण्डलामलगलत्सन्मौलिमालावली,
गाढालीढसरोजचारुचरणास्ते पान्तु वस्तीर्थपाः ॥ २

व्रजति भवसमुद्रं द्राक् विलङ्घ्यातिरौद्रं,
शिवपदमनवद्यं विश्वविश्वेन वन्द्यम् ।
विलसदतुलसत्त्वोऽयं भजन् भव्यसत्त्वो,
दिशतु स शिवशर्म प्राणिनां जैनधर्मः ॥ (मालिनी) ३

यस्या भाति करे विकासिकमलं वृन्दैरलीनां वृतं,
सद्युक्तिप्रभवादिवादिविभवाद् धामत्वमुच्चैर्गतम् ।
सा देवी विकचारविन्दविलसन् नेत्रा त्रिलोकैः स्तुता,
हस्तन्यस्तसुपुस्तकाऽस्तु भवतां विध्वस्तमोहा सदा ॥ ४

(८) (शार्दुलविक्रीडित)

नम्राखण्डल-मण्डल-स्तुतपद ! श्री-वीर ! लोकाधिभू !,
सिद्धार्थाङ्गज ! रागनाग-विनता सूनो ! दयानायक ! ।
दद्या मङ्गल-मङ्गिनामविकलं सद्यः प्रसद्य प्रभो !,
सिद्धार्थाङ्गज-रागनाग-विनता-सूनोदया-नायक ! ॥ १

अंहः संहतिमाहताज्जिन-पति-श्रेणी नृणां रंहसा,
नव्यापन्न-महोदयान-रमणी-रुच्यानभोगादृता ।
प्राञ्चत्केवल-दर्पण-प्रति-फलत्साऽलोक - लोकत्रयी,
नव्यापन्न-महोदयान-रमणी-रुच्यानभोगादृता ॥ २

उन्मीलन्नयभङ्ग-रङ्ग-भवनं भव्य-व्रजापादिता-
पन्नाशं सकलङ्क-पङ्क-विकलं वैधुर्य-विध्यापनम् ।
श्रेयः संवननं जिन-प्रवचनं स्याद्वादिकं पूरिता-
पन्नाशं सकलङ्क - पङ्क-विकलं वैधुर्य-विध्यापनम् ॥ ३

अम्भोजन्म विकस्वरं स्वरवर्ती शश्वत्करे बिभ्रती,
मेघा-बन्धु-रपास्त-भव्य-कमला पद्मालयाध्यासिनी ।
प्रीतिं पातु सरस्वती भगवती पुंसां नमस्याऽञ्चिता,
मेघा-बन्धुर-पास्त-भव्य-कमला पद्मालयाध्यासिनी ॥ ४

पू.आ.श्री बालचन्द्रसूरिविरचिता

(९) (शार्दूलविक्रीडित)

स्नातस्याऽप्रतिमस्य मेरुशिखरे, शच्या विभोः शैशवे
रूपा-लोकन-विस्मया-हृतरस-भ्रान्त्या भ्रमच्चक्षुषा ।
उन्मृष्टं नयनप्रभा-धवलितं, क्षीरोदकाशङ्कया
वक्त्रं यस्य पुनः पुनः स जयति श्रीवर्द्धमानो जिनः ॥ १

हंसां साहत-पद्म-रेणु-कपिश,-क्षीरार्णवाम्भोभृतैः
कुम्भैरप्सरसां पयोधर-भर-प्रस्पर्द्धिभिः काञ्चनैः ।
येषां मन्दर-रत्न-शैल-शिखरे, जन्माऽभिषेकः कृतः
सर्वैः सर्वसुरासुरेश्वरगणैस्तेषां नतोऽहं क्रमान् ॥ २

(स्रग्धरा)

अर्हद्-वक्त्र-प्रसूतं गणधर-रचित द्वादशाङ्गं विशालं
चित्रं बह्वर्थयुक्तं मुनिगण-वृषभैर्धारितं बुद्धिमद्भिः ।
मोक्षाऽग्रद्वारभूतं व्रत-चरण-फलं, ज्ञेय-भाव-प्रदीपं
भक्त्या नित्यं प्रपद्ये श्रुतमहमखिलं सर्व-
लोकैक-सारम् ॥ ३

निष्पङ्क-व्योमनील-द्युतिमल-सदृशं,
बालचन्द्राभ-दंष्ट्रम्
मत्तं घण्टारवेण प्रसृत-मदजलं, पूरयन्तं समन्तात् ।
आरूढो दिव्यनागं विचरति गगने कामदः कामरूपी
यक्षः सर्वानुभूतिर्दिशतु मम सदा, सर्वकार्येषु सिद्धिम् ॥ ४

पू.मु.श्री गुणविजयगणिविरचिता

(१०) (शार्दूलविक्रीडित)

स्फूर्जद्भक्तिनतेन्द्रशीर्षविलसत्कोटीररत्नावली-
रङ्गत्कान्तिकरम्बिताऽद्भुतनखश्रेणिसमुज्जृम्भितम् ।
सिद्धार्थाङ्गरुहस्य कीर्तितगुणस्थांह्रिद्वयं पातु वः,
स्नातस्याप्रतिमस्य मेरुशिखरे शच्या विभोः शैशवे ॥ १

श्रेयःशर्मकृते भवन्तु भवतां सर्वेऽपि तीर्थाधिपाः,
येषां जन्ममहः कृतः सुरगिरौ वृन्दारकैः साऽऽदरैः ।
पौलोमीस्तनगर्वखण्डनपरैः कुम्भैः सुवर्णोद्भवैः,
हंसांसाहतपद्मरेणुकपिशक्षीरार्णवाम्भोभृतैः ॥ २

सेवे सिद्धान्तमुद्यत्सकलमुनिजनप्रार्थितामर्त्यरत्नं,
गर्जद्वाचाटवादिद्विरदघनघटादर्पकण्ठीरवाऽऽभम् ।
मिथ्याधर्मान्धकारे स्फुटविकटकरादित्यमल्पप्रभं नो,
अर्हद्वक्त्रप्रसूतं गणधररचितं द्वादशाङ्गं विशालम् ॥ ३

(स्रग्धरा)

दक्षो यक्षाऽधिराजो महिमगुणनिधिश्चण्डदोर्दण्डधारी,
सर्वं सर्वानुभूतिर्विदलयतु मुदा सङ्घविघ्नं महौजाः ।

अध्यारूढो द्विपेन्द्रं वरभवनगतस्तम्भहस्तोत्कटाऽऽस्यं,
निष्पङ्कव्योमनीलद्युतिमलसदृशं बालचन्द्राभदंष्ट्रम् ॥ ४

(११) (शार्दूलविक्रीडित)

स्नातस्याऽप्रतिमस्य मेरुशिखरे, शच्या विभोः शैशवे,
देवेन्द्रैः समकं स्वरागत-सुरैः, भक्त्या सुतीर्थोदकैः ।
वक्त्रं यस्य विभूषणैर्विरचितं, दिव्यारविन्द-प्रभम्,
त्रैलोक्याधिप-वर्धमान-जिनराट्, भूयाद् भवच्छर्मणे ॥ १

हंसां साहत पद्मरेणु कपिशः, क्षीरार्णवाम्भोभृतैः,
कुम्भैः स्वर्णकृतैः सुरासुरनरैः, दीक्षाक्षणे स्नापितम् ।
तत्काले भवति स्म संज्ञिमनसां, पर्याय-संज्ञापकं,
यज ज्ञानं भवशत्रुचक्रसदृशं, तज्जैनचक्रं स्तुमः ॥ २

(स्रग्धरा)

अर्हद्वक्त्रप्रसूतं गणधररचितं, द्वादशाङ्गं विशालं,
प्रोक्तानेकार्थ-चित्रं, गुरु विनयपरैः शिष्यवृन्दैश्च लभ्यम् ।
नाना विद्यागृहं तत् नयगमगहनं सप्तभङ्गं विचित्रं,
सार्वं सिद्धान्तरम्यं सुविहितमुनिभिः सर्वदाराधनीयम् ॥ ३

निष्पंकव्योमनील-द्युतिमलसदृशं बालचन्द्राभदंष्ट्रं,
सिद्धादेवी स्वयानं विचरणसमये सिंहबालं भजन्ती ।
संघे सौवप्रसादं सकलजनहिता या मुदाविस्तरन्ती,
हस्ते चक्रं दधाना रिपुविजयकरं शक्ति-भक्ति प्रदातु ॥ ४

स्नातस्या-पादपूर्तिः

(१२) (शार्दूलविक्रीडित)

देवानन्दिकया पयोधरयुगे लब्धो महाप्रश्रवः,
प्रापत्तापसकत्रिपञ्चशतकं ज्ञानध्रुवं केवलम् ।
धर्म-स्नेहभरं च गौतभ-विभुः संवीक्ष्य हर्षोत्कराद्-
वक्त्रं यस्य पुनः पुनः स जयति श्री - वर्द्धमानो जिनः ॥ १

जम्बूद्वीप-विलोकनाद-वधिना ज्ञानेन मत्वा जिनान्,
प्रौढानन्दभरेण मङ्गलजयैर्भक्त्या नमन्मस्तकैः ।
येषां स्नात्रमकारि काञ्चनगिरौ भावादपायच्छिदे,
सर्वैः सर्व-सुरासुरेश्वर-गणैस्तेषां नतोऽहं क्रमान् ॥ २

(स्रग्धरा)

नित्यानित्यादि-धर्मात्मक-सकल-पदार्थ-प्रबोधे प्रतिष्ठः,
प्रादुर्भूतो यथार्थः श्रुतिपठन-वशाद् यस्य विश्वाङ्गभाजः ।
अक्षीण-ज्ञान-सौख्यं शिवपद-मसमं प्राप्यते तत्प्रधानं,
भक्त्या नित्यं प्रपद्ये श्रुतमहमखिलं सर्व-लोकैकसारम् ॥ ३

श्रीसिद्धार्थ-क्षितीन्द्रात्मज-चरण-सरो-जन्मयुग्मार्च्चकानां,
विघ्नव्राता-पहर्ता धनघन-सुसुख-प्रौढसम्पत्प्रदाता ।
प्रस्फूर्जत्संप्रनिर्यन्मद-सजल-घनश्याम-दन्ताबलस्थो,
यक्षः सर्वानुभूतिर्दिशतु मम सदा सर्वकार्येषु सिद्धिम् ॥ ४

## पू.आ.श्री हरिभद्रसूरिविरचिता

(१३)

संसारदावानलदाहनीरं
सम्मोहधूलीहरणे समीरम् ।
मायारसादारणसारसीरं
नमामि वीरं गिरिसारधीरम् ॥ (उपजाति) १

भावावनामसुरदानवमानवेन-
चूलाविलोलकमलावलिमालितानि ।
सम्पूरिताभिनतलोकसमीहितानि
कामं नमामि जिनराजपदानि तानि ॥ (वसंततिलका) २

बोधागाधं सुपदपदवीनीरपूराभिरामं
जीवाहिंसाविरललहरीसङ्गमागाहदेहम् ।
चूलावेलं गुरुगममणीसङ्कुलं दूरपारं
सारं वीरागमजलनिधिं सादरं साधु सेवे ॥ (मन्दाक्रान्ता) ३

(स्त्रग्धरा)

आमूलालोलधूलीबहुलपरिमलालीढलोलालिमाला
झङ्कारारावसारामलदलकमलागारभूमीनिवासे ।
छाया-सम्भारसारे ! वरकमलकरे ! तारहाराभिरामे !
वाणी सन्दोहदेहे ! भवविरहवरं देहि मे देवि ! सारम् ॥ ४

## संसारदावा-पादपूर्तिः स्तुतिः

(१४)

नम्रेन्द्रमौलिप्रपतत्पराग-पुञ्जस्फुरत्कर्बुरितक्रमाब्जम् ।
वीरं भजे निर्जितमोहवीरं, संसारदावानलदाहनीरम् ॥ १
(उपजाति)

पुष्पौघपद्मदलसौरभगुण्ठितानि,
स्वर्णाम्बुजैः सुरकृतैःपरिमण्डितानि ।
वन्देऽर्हतां वरपदानि नतान्यजेन,
भावावनामसुरदानवमानवेन ॥ (व.ति.) २

नानारत्नैः सुभगमतुलप्रौढसादृश्यपाठै-
र्विज्ञज्ञातैर्बहुनयभरैः सत्तरङ्गैरुपेतम् ।
युक्त्या जैनं समयमुदधिं कीर्त्तयाम्यस्मि कामं,
बोधागाधं सुपदपदवीनीरपूराभिरामम् ॥ (मन्दाक्रान्ता) ३

श्रीमद्वीरक्रमाम्भोरुहरसिकमना राजहंसीव रम्या,
सिद्धा सिद्धाविरुद्धा विशदगुणलसद्भक्तहृत्पद्मरुद्धा ।
या धत्ते स्वीयकण्ठे घनसुरभिरसां पुष्पमालां विशालां,
आमूलालोलधूलीबहुलपरिमलालीढलोलालिमालाम् ॥ ४
(स्रग्धरा)

(१५) (इन्द्रवज्रा)

कल्याणवल्लीवनवारिवाहं, श्रेयःपुरसङ्गमसार्थवाहम् ।
हर्षप्रकर्षेण नमामि वीरं, संसार-दावानलदाहनीरम् ॥ १
(उपजाति)

विभोजनास्ते जगति प्रधाना, ये त्वां भजन्ते दलिताऽभिमाना ।
संप्राप्तसंसार-समुद्रतीरं, संमोह-धूली-हरणे समीरम् ॥ २

केनापि जिग्ये नहि मोहभूपः, प्रकाममुद्दामतमस्वरूपः ।
विना भवन्तं भुवनैकवीरं, मायारसादारणसार-सीरम् ॥ ३

वन्दारुवृन्दारक-वृन्दवन्द्यं, प्रत्यूहसन्दोह-विदारणेशम् ।
कल्याण-कोटी-करणैकशूरं, नमामि वीरं गिरिसार-धीरम् ॥४

(१६)

सिद्धं विधत्ते चरणारविन्दं, सेवा हि सारा समयानुसारा ।
तं देवदेवं महिमाऽभिरामं,
नमामि वीरं गिरिसारधीरम् ॥ (उपजाति) १

संसार-वास-विलयं विदधात्यनन्तं,
कामं जयन्ति भवि - मोह-तमो हरन्ति ।
संपूरयन्ति भविमानस-चिन्तितानि,
कामं नमामि जिनराज-पदानि तानि ॥ (वसन्ततिलका) २

नानाभावाऽमल-मणि-भरैर्भूरि-गम्भीर-रावं,
भूयो भूयो नयगमजलोदारवेलं सचूलम् ।
सीमावन्तं कविकुल-गतिं धीवरैः सेव्यमानं,
सारं वीरा-गमजल-निधिं सादरं साधु सेवे ॥(मन्दाक्रान्ता) ३

नानालङ्कारहारे कविजनदृदिगे मान-मायापहारे,
गङ्गा-कल्लोल-माला सीत-रुचि-रुचिरे चारुचारूपकारे ।
हंसारूढे सवीणे गजवरगमनेऽनङ्ग-लीलोद्धताङ्गे,
वाणी-संदोह-देहे भवविरहवरं देहि मे देवि सारम् ॥ (स्रग्धरा) ४

(१७)

आनन्द-कन्दोद्गम-वारिवाहं,
निवारिता-शेष-भवारिवाहम् ।
विध्वस्त-मोह-प्रति-वीरवीरं,
नमामि वीरं गिरि-सार-धीरम् ॥ (उपजाति) १

संसार-वारिधि-पतज्जन-तारणैक-
पोतोपमानि, जनतावनती-कृतानि ।

पुष्णन्ति यानि यमिनाममितात्म-पुष्टिं,
कामं नमामि जिनराज-पदानि तानि ॥ (वसन्ततिलका) २

जीवाजीवादिक-नवपद-प्राज्य-मुक्ता-मणीनां,
स्थानं दान-प्रमुख-तटिनी-पूर-पूर्णावतारम् ।
सम्यग् नानानयचयमहल्लोल-कल्लोल-मालं,
सारं वीरागमजलनिधिं सादरं साधु सेवे ॥ (मन्दाक्रान्ता) ३

भूयः स्वर्णादिभूषाविकचकज-मुखी हंसयानायमाना,
पद्मास्या पद्मनेत्रा कविजनजननी पद्मसद्मासनस्था ।
विद्यां हृद्यानवद्यां प्रमुदित-हृदया भक्तिभाजां दधाना,
वाणी-संदोहदेहे भवविरहवरं देहि मे देवि सारम् ॥(स्रग्धरा)४

(१८)

सुवर्ण-सद्वर्ण-सवर्ण-देहं, समस्त-कल्याण-विशालगेहम् ।
संलब्ध-संसार-समुद्र-तीरं, नमामि वीरं गिरिसार-धीरम् ॥१
(उपजाति)

भक्त्या नताङ्ग-सुर-शेखर-रञ्जितानि,
सज्जातरूप-जनितोत्पल-संस्थितानि ।
यानि त्रिलोक-भविकै-रपि पूजितानि,
कामं नमामि जिनराज-पदानि तानि ॥ (वसन्ततिलका) २

सम्यग्भाषा - विमल-मणिमद्-गण्यविस्तार-वर्यं,
शुद्धाचारं कुमतिजनलसन्मीनमाला-विशालम् ।
ड्रन् ड्रन्माद्यन्मकर-निकरा-लोल-कल्लोल-मालं,
सारं वीरागम-जल-निधिं सादरं साधु सेवे ॥ ३
(मन्दाक्रान्ता)

सज्ज्योत्स्ना-युक्द्विज-पति-विकसन्मण्डलप्रष्टतुण्डे,
पञ्चास्यालीन-देहे गजपति-गमने नेत्रपीयूष-कुण्डे ।
सर्वज्ञज्ञातपुत्र-क्रमनिहितमनःशङ्करे दत्तसाते,
वाणी-संदोह-देहे भवविरहवरं देहि से देवि सारम् ॥ ४
(स्रग्धरा)

(१९)

अवाप्त-संसार-समुद्रतीरं, विमुक्ति-माकन्द-दलेषु कीरम् ।
हेला-विलक्षीकृत-मार-वीरं, नमामि वीरं गिरि-सार धीरम्॥ १
(उपजातिः)

नतामरासुरनरोरग मौलि-मौलि-
माणिक्यदीधितिरमातति-भूषितानि ।
भव्याङ्गिनां सकल - दापित-वाञ्छितानि,
कामं नमामि जिनराज-पदानि तानि ॥ (वसन्ततिलका) २

विद्याऽगाधं सुनयचयनैर्नीर-पूरैरपारं,
भङ्गीवेलं गमकलहरी-सङ्ग-रङ्गत्तरङ्गम् ।
युक्त्या युक्तं गुणमणिभृतं दुस्तरं वर्य-हेतोः,
सारं वीरागमजलनिधिं सादरं साधु सेवे ॥ (मन्दाक्रान्ता) ३

आलोलोत्फुल्ल-लीला-कमल-दल-कलाकर्ण-नेत्रे पवित्रे,
धीरे गोक्षीर-गौरे हिमकर-कुमुदाहासहंसासनस्थे ।
वीणानादेन लीने नतजनवरदे पुस्तकन्यस्त-हस्ते,
वाणी-सन्दोह-देहे भवविरह-
वरं देहि मे देवि सारम् ॥ (स्रग्धरा) ४

(२०)

संसार-रत्नाकर-लब्धतीरं, सज्ज्ञान-विज्ञान-सदाऽऽम्रकीरम्।
नमन्नराणां वृजिनैकनीरं, नमामि वीरं गिरिसार-धीरम् ॥ १
(उपजाति)

यस्माद् भवन्ति धनधोरणि-पूरितानि,
सत्पुत्र-सज्जन-जन-व्रज-संयुतानि ।
भव्य-व्रजस्य भवनानि विराजितानि,
कामं नमामि जिनराजपदानि तानि ॥ (वसन्ततिलका) २

स्फूर्जद्बुद्धि-प्रधन-परमानन्द-सन्दोहकर्त्री,
शान्तिर्यस्माद् भवति विपुला विश्वविश्वे प्रशस्या ।
पुण्य-श्रेणी-विमल-कमला-तातरूपं तमेकं,
सारं वीरागमजलनिधिं सादरं साधु सेवे ॥ (मन्दाक्रान्ता) ३

अज्ञानध्वान्तविध्वंसननिपुणपराह्वान-मन्त्र-प्रधाने,
प्रोद्यन्मन्दार-पुष्प-प्रकर-विरचित-स्फारहारेण रम्ये ।
गीर्वाणाधीश-सेव्यक्रम-कमलयुगे सर्व-लोकप्रकाशे,
वाणी संदोह-देहे भवविरहवरं देहि मे देवि सारम् ॥ ४
(स्रग्धरा)

(२१)

सम्प्राप्तसंसारसमुद्रतीरं, मोहारिमल्ल-प्रतिमल्लवीरम् ।
कन्दर्पदर्पाग्निशमैक नीरं, नमामि वीरं गिरिसारधीरम् ॥ १
(उपजाति)

भक्तैकनिष्ठ-सुरमौलि-किरिट - कोटी
माणिक्य-मौक्तिक-मणि-कपिशीकृतानि ।

सन्तप्त–हैम–नव–नीरज–संस्थितानि,
कामं नमामि जिनराज–पदानि तानि ॥ (वसन्ततिलका) २

अङ्गोपाङ्ग–प्रवर–तटिनी–वार–कल्लोल–लोलं,
भाष्याद्युद्यत् करवर–मणि–श्रेणिभि–र्बद्ध–मूलम् ।
टीका–चन्द्र–द्युति–तति–कृति जैन - राजीव–चूलं,
सारं वीरा–गम–जल–निधिं सादरं साधु सेवे ॥(मन्दाक्रान्ता)३

मातः पुण्यैक–पाथः कवि - हृदय–सरो राजहंसीयमाने,
कुन्देन्दु–क्षीर–पाथो–निधि–रुचिर–तर–स्फार–वासो दधाने ।
वीणा–वादित्र–तन्त्री–झणण–रण–झणात्–कार सङ्गीयमाने
वाणी सन्दोह–देहे भवविरह–वरं देहि मे देवि ! सारम् ॥ ४
(स्त्रग्धरा)

(२२)

नमोऽस्तु वर्द्धमानाय, स्पर्द्धमानाय कर्मणा ।
तज्जयावाप्तमोक्षाय, परोक्षाय कुतीर्थिनाम् ॥ (अनुष्टुप्) १

येषां विकचारविन्दराज्या, ज्यायःक्रमकमलावलिं दधत्या ।
सदृशैरिति सङ्गतं प्रशस्यं,
कथितं सन्तु शिवाय ते जिनेन्द्राः ॥ (वैतालीय) २

कषायतापाऽर्दितजन्तुनिर्वृतिं, करोति यो जैनमुखाम्बुदोद्‌गतः ।
स शुक्रमासोद्भववृष्टिसन्निभो,
दधातु तुष्टिं मयि विस्तरो गिराम् ॥ (वंशस्थ) ३

श्वसितसुरभिगन्धालीढभृङ्गीकुरङ्गं,
मुखशशिनमजस्त्रं बिभ्रती या बिभर्ति ।

विकचकमलमुच्चैः साऽस्त्वचिन्त्यप्रभावा,
सकलसुखविधात्री प्राणभाजां श्रुताङ्गी ॥ (मालिनी) ४

विशाललोचन-स्तुतिः

(२३) (अनुष्टुप्)

विशाल-लोचनदलं, प्रोद्यद्दन्तांशुकेशरम् ।
प्रातर्वीर-जिनेन्द्रस्य, मुखपद्मं पुनातु वः ॥ १

येषामभिषेककर्म कृत्वा मत्ता हर्षभरात्सुखं सुरेन्द्राः ।
तृणमपि गणयन्ति नैव नाकं,
प्रातः सन्तु शिवाय ते जिनेन्द्राः ॥ (आर्या) २

कलङ्क-निर्मुक्तममुक्तपूर्णतं, कुतर्कराहुग्रसनं सदोदयम् ।
अपूर्वचन्द्रं जिनचन्द्रभाषितं, जिनागमे नौमि बुधैर्नमस्कृतम् ॥३
(वंशस्थ)

विकटदशन-मुद्यद्दीपनेत्रं मृगेन्द्रं,
प्रतिदिनमधिरूढा याति या वन्द्यभावम् ।
जिनगृह-मिह देवी पात्वसौ भव्यलोकं,
तनययुगलमम्बा बिभ्रती वासरादौ ॥ (मालिनी) ४

(२४) (वसन्ततिलका)

कल्याणमन्दिरमुदारमवद्यभेदि,
दुष्कर्मवारणविदारणपञ्चवक्त्रम् ।
यत्पादपद्मयुगलं प्रणमन्ति शक्राः,
स्तोष्ये मुदाजिनवरञ्जिनत्रैशलेयम् ॥ १

क्षीणाष्टकर्मनिकरस्य नमोऽस्तु नित्यं,
भीताभयप्रदमनिन्दितमङ्घ्रिपद्मम् ।

इष्टार्थमण्डलसुसर्जनदेववृक्षं,
नित्योदयं दलिततीव्रकषायमुक्तम् ॥ २

जैनागमं दिशतु सर्वसुखैकदारं,
श्रीनन्दनक्षितिजहव्यहतिप्रकारम् ।
संसारसागरनिमज्जदशेषजन्तु-
बोहित्थसन्निभमभीष्टदमाशुमुग्धम् ॥ ३

मातङ्गयक्षरमलां प्रकरोति सेवां,
पूर्वान्तमारसमभीप्सितदं विशालम् ।
उत्पत्तिविस्तरनदीशपतज्जनानां,
पोतायमानमभिनम्य जिनेश्वरस्य ॥ ४

(२५) (द्रुतविलम्बित)

सकलमङ्गलमञ्जुलकन्दलं, गुणगणालयकं शिवशम्बलम् ।
जिनवरं हि नमामि सदा युतं, सुमनसा मनसा त्रिशलासुतम् ॥१

अशुभकन्दनवन्दनमालिकां, धवलमङ्गलमञ्जुलबालिकाम् ।
जितमनोजिनराजपरम्परां, प्रतिनमामि नमामि शुभङ्कराम् ॥२

जिनवरेण जयाय हितोदितं, गणधरेण धिया गुरुगुम्फितम् ।
नमतु तन्मनसा जनसन्तती, रसमयं समयं समयं प्रति ॥ ३

रणझणत्पदनूपुरपेशला, वदनमण्डितशीतलभाकला ।
सकलसङ्घसुखाय विनोदिता, भवतु भासनशासनदेवता ॥ ४

(२६) (द्रुतविलम्बित)

विभुमशिश्रियदद्भुतवीरता, गुणमनीदृशमाश्रयितुं हरिः ।
यमनिशं स खलु त्रिशलाङ्गजो, वितनुतां तनुतां दुरितव्रजे ॥१

जगति मे सुहितैकशरण्यता-भणितमर्हति सन्ततिरार्हती ।
जयतु सा त्वरितं भविकव्रजं, शुभवती भवतीरमुपासिता ॥२

नयगमादिशिलोच्चयदुर्गमो, बहुविधार्थमहामणिमण्डितः ।
जिनवराऽऽगमसिन्धुपतिः स्फुरत्,
समुदयो मुदयोदयदोऽस्तु नः ॥ ३

सुमहिमानमलं सुधियां हि वाक्, त्रिपथगा भजते यदनुग्रहात् ।
भवतु सा कुशलानि वितन्वती, मतिमहातिमहाय सरस्वती ॥४

(२७) (भुजङ्गप्रयात)

मुदोन्निद्रयोगीन्द्रहृद्ध्यायमानं, परिध्वस्तमानं सुरैर्गीयमानम् ।
लसन्मानवामानवामानमानं, भजे वर्द्धमानं भजे वर्द्धमानम् ॥१

जिनाधीशलेखा नताशेषलेखा, नतद्वेषदोषप्रदोषांशुलेखा ।
स्मृता येन तं निःप्रतीपं प्रतीत्य,
कलं कोमलं कोमलं कोऽप्यलं स्यात् ॥ २

महावीरवाणीगुणो वर्णवर्ण्यः, सकर्णेन नाकर्णितो येन तूर्णम् ।
स घूर्णन्महामायया मन्यतेऽसा-रसंसारसंसारसंसारसारम् ॥३

सुधर्मासुराणामधीशः शचीनां, शुचिप्रेमनर्मादि सौख्यं विहाय ।
जिनाधीशसेवाविधौ यः प्रसक्तः,
सुदेवः सुदेवः सुदेवः सुदेवः ॥ ४

(२८)

शौर्याधरीकृतद्वन्दं वीरधीरचक्रीशचक्रिणम् ।
रूपनिर्जितकामं श्रीवीरं वन्दे जिनाधिपम् ॥ १

सर्वनीतिनयोत्थानान् सिद्धान्तसरिताम्बुदान् ।
संकल्पमुक्तचेतस्कान् वन्दे ज्ञानाम्बुधीञ्जिनान् ॥ २

स्वर्धेनुः सुखसंप्राप्तेः कल्पवल्लीष्टसाधने ।
वसतात् शारदा चित्ते श्रीवीरजिन तायिनः ॥ ३

भीषणे दुःषमे काले वीरभक्तेष्टशर्मणे ।
एहि सिद्धायिका देवि शीघ्रं भवगुणेष्टदा ॥ ४

(२९) (भुजङ्गप्रयात)

नताऽशेषलेखं कृतद्वेषपेषं जगत्तोषपोषं लसद्दोषमोषम् ।
अयोषं सयोषं विनिर्धूतरोषं, नमस्यामि वीरं धराधीशधीरम्॥१

प्रशस्तप्रसादं समस्तप्रसादं, समस्तप्रसादं सुगम्भीरनादम् ।
स्तुमस्त्वामुदारं महत्तापदारं, महत्तापदारं जिनस्तोममारम् ॥२

सदङ्गं सदङ्गं सदं गद्यपद्य-प्रधानं निधानं मुदः पातु सद्यः ।
मतं मे मतं मेदुरक्रोधयोध-प्रमाथं सनाथं गमैर्जैननाथम् ॥ ३

महस्वल्ललाटस्ततोरः कपाटः,
स्फुरच्चण्डदण्डः कृतारातिखण्डः ।
शुभच्छत्रहस्तः कविस्तोमशस्तः,
स्यतु ब्रह्मशान्तिर्भयं स्वर्णकान्तिः ॥ ४

पू.पं.श्री गुणसागरगणिविरचिता

(३०) (भुजङ्गप्रयात)

पटिष्ठाऽष्टकर्मद्विषद्ध्वंसनेन, प्रदत्तं त्वदीयं महन्नामधेयम् ।
महावीर इत्यद्भुतं देवराज्ञा, कृताऽऽज्ञाप्रपञ्चेन देवावलीभिः॥१

जिनाली भवाली हताली नराली-नतारा नतारा समारा समारा।
प्रमोदा प्रमोदा निदानानिदाना,
विमाना विमाना प्रमाणा प्रमाणा ॥ २

ततान्तः कृतान्तः कृतान्तः प्रशान्तः,
प्रकान्तं मितान्तं नतान्तं महान्तम् ।
ददातु त्वजातु प्रमादः प्रमादः,
सुखं नः पुनानः समानां समानाम् ॥ ३

अधिष्ठायिका साधु सिद्धायिका वः,
पुनीतात् स्फुरन्नूपुरद्वन्द्वपादा ।
स्वकीयप्रभुप्रष्ठसेवानुरक्ता,
विरक्ता भवेभ्यः पतज्जन्मवद्भ्यः ॥ ४

(३१) (हरिणी)

धनमुनिवराः श्राद्धाः सिद्धाः मनस्तनुसंवरात्,
प्रभवति महालब्धिव्यूहो गदार्त्तिविनाशकः ।
त्रिदशपतयो देव्यो नार्यो नमन्ति नरेश्वराः,
असुरविभवः श्रीमद्वीरं समाधिसमन्वितम् ॥ १

समवसरणे रत्नैः स्वर्णैः कृते रजतैर्मणि-
कनकरचिते स्थित्वा सिंहासने परमेष्ठिनः ।
नृपशुसुरवाक्-संवादिन्या गिरोपदिशन्ति ते,
पिहितसकलाक्षव्यापाराच्छिवं व्रतसंवरात् ॥ २

धरत समितिं गुप्तिं मेयां त्रिभिः किल पञ्चभि-
स्त्यजत हि मनोभृङ्गं शृङ्गिभवन्तमहर्निशम् ।
विरसविषये पुष्पौपम्ये परीषहवाहिनि,
जयति जगदीशोक्तिर्मुक्तेर्निबन्धनमीरितम् (?) ॥ ३

करणसदनद्वारो वारं विमाननिवासदं,
भजत भविनोऽवश्यं वश्यं भवेश्च शिवश्रियः ।

चरमभगवद्भवत्या सिद्धायिका वरदायिनी,
सृजति सुखशुद्धेभावं सुसंवरिणामिह ॥ ४

(३२) (कामक्रीडा)

श्री सिद्धार्थ-क्षोणिनाथ-प्रोद्यद्वंशे कोटीरं,
कल्याणाभ-स्फूर्जत्कायं प्राप्तं दुःखाब्धेस्तीरम् ।
देवेन्द्राद्यैर्भक्ति-प्रह्वैर्नूतं भूभृद्वद्धीरं,
सेवध्वं भो भव्याः सत्त्वास्तीर्थाधीशं श्रीवीरम् ॥ १

माद्यन्मोहोन्माद-ज्ञान-ध्वान्तध्वंसे ये दक्षाः,
सद्दृग्व्रात-स्वेष्टस्याप्तौ साक्षात्स्वाहाभुग्वृक्षाः ।
योगीन्द्राणां हृत्पद्मस्थे ध्यानादर्शे प्रत्यक्षा,
भूयासुस्ते सार्वाः सर्वे संसिध्यै द्राक्सत्पक्षाः ॥ २

विश्व-व्यापि-द्रव्याभासान्नष्ट-ध्वान्तं निर्भ्रान्त-
मोक्ष-प्राप्तेस्तत्त्वोद्बोधात्सच्चारित्रश्रीकान्तम् ।
रङ्गद् भङ्गैः सूक्त्या युक्त्या संयुक्तं सद्वृत्तान्तं,
सेवे श्रद्धोपेतः प्रीत्या सर्वज्ञोक्तं सिद्धान्तम् ॥ ३

भ्राजद्भूषावासाः कान्तिक्लृप्तोद्योतश्चार्वङ्गः,
कीर्त्याक्रान्तः शान्तः श्रीमानर्हत्पादाब्जे भृङ्गः ।
भव्यान् जीवानव्याद् भीत्या यक्षाधीशो मातङ्गः,
कामक्रीडा छन्दोवृत्तः सत्कृत्यो देव्या प्रोत्तुङ्गः ॥ ४

(३३) (कामक्रीडा)

श्रीकर्तारं पुण्यागारं विश्वोदारं सत्सारं,
विध्वस्तारं कान्ताकारं सालङ्कारं ज्ञातारम् ।
दानेनारं श्री-मन्दारं भव्योद्धारं जेतारं,
वीरं सारं नौमि स्फारं याज्ञाचारं नेतारम् ॥ १

अर्हद्वारं वारं वारं वन्देऽदारं निर्म्मारं,
तीर्थाधारं कामे वारं क्षान्त्यापारं सत्सारम् ।
भाविस्तारं शुद्धाहारं रैप्राकारं व्यक्तारं,
प्रास्तद्वारं त्यक्तासारं निस्संसारं धीधारम् ॥ २

श्रव्योद्गारं शम्भोस्सारं वर्णाकारं सोङ्कारं,
हेतुद्वारं सालङ्कारं चित्कासारं निष्पारम् ।
उट्टङ्कारं सद्भृङ्गारं सर्वोदारं स्तौम्यारं,
श्री-दातारं क्रुद्धर्तारं बोधिद्वारं शास्तारम् ॥ ३

सत्शृङ्गारा स्फूर्जद्वारा श्रेयस्कारा सत्कारा,
पद्मोद्गारा स्त्वन्यक्कारा भूयस्सारा निर्धारा ।
सुव्यापारा सद्गन्धारा प्रोद्यत्तारा सत्तारा,
निस्तुङ्कारा भास्सम्भारा जैनाचारा गीस्तारा ॥ ४

(३४) (उपजातिः)

श्रीवर्द्धमानाऽभिधतीर्थराज-पदारविन्दं विधिना निषेवे ।
सद्धर्मलक्ष्मीवरकेलिगेहं, सदा सदाऽऽनन्दपदं सतां तु ॥ १

असौ जिनौघः प्रददातु नित्यं, भव्याङ्गिनां भक्तिमतामभीष्टम् ।
यद्देशनावारिदवर्षणेन, सद्धर्मशाखी नवपल्लवः स्यात् ॥ २

श्रीजैनसिद्धान्तमपारभद्रं, ध्यायामि तत्त्वार्थयुतं पवित्रम् ।
सम्यक्तया निर्वृतिशर्मकार-मन्तःसमाधाननिदानमेव ॥ ३

श्रीवीरतीर्थेशपदाऽनुरक्तः, सर्वानुभूतिः सततं श्रिये स्तात् ।
सिद्धायिका शासनदेवता च, धर्मार्थिनां धर्मधुरन्धराणाम् ॥४

(३५) (उपजातिः)

सुचण्डिमाडम्बरपञ्चबाण- दावोरुदाहानलवारिवाहम् ।
संसारकारालयभङ्गसज्जं, देवं महावीरमहं नमामि ॥ १

दुरन्त-रागोदयमत्त-दन्ति-हिंसाकुरङ्गारि-समानताऽढ्याः ।
गुणावलिं-केवलिपुङ्गवा-मे, निरन्तराया बहुमानभाजः ॥ २

उद्दामवामावहदेहमेघ-नीहार-संहार-विमोक्ष-बिम्बम् ।
अखण्डभूमिवलयाभिरामं, वीरागमं सत् सुखदं नमामि ॥ ३

सराव-लोलालिव्रजाभिरुद्ध-पङ्केरुहासनमञ्जुवासे ।
राजीवहस्ते प्रविरामबुद्धिं, कामं कुरु त्वं जिनवाणी-देवि ! ॥४

(३६) (तोटक)

महसार ! विकल्प सकल्पतरो !,
महसा रविकल्प ! सकल्पतरो ! ।
भव वीर ! सुधीर ! सुनिर्वृतये,
भववीर ! सुधीर ! सुनिर्वृतये ॥ १

जनजात महो ममतीर्थकृतां, जन जातमहो ममतीर्थकृताम् ।
प्रमदे हितरामदरामतर, प्रमदे हितरा मदरामतर ॥ २

क्षमतीर्थकर श्रुत सत्सुकृत, क्षमतीर्थ कर श्रुत सत्सुकृत ।
क्रममातनु सद्गुरु साधुपद, क्रम मात नु सद्गुरु साधुपद ॥३

कविराजिसभा जितकान्तिपदे,
कविराजि ! सभाजित कान्तिपदे ।
नय भारति मारु चिता ररदे, नयभारति मारु चिताररदे ॥ ४

चतुर्द्वार-राजविहारालङ्कार-सिद्धपुरशृङ्गारश्री-वीरजिन-स्तुतिः।

(३७) (शिखरिणी)

चतुर्वक्त्रः स्वामी मनसिजमहावीर-विजयी,
प्रजानिघ्नान् विघ्नान् प्रगुणित-महा-वीरयति यः ।
महावीरेणैष स्वबल-विजितेनेव भवतो,
महावीरः पायाच्छ्रित-चरणपद्मोऽङ्क-मिषतः ॥ १

महाऽऽवीरं सार्वांस्तुवृषभ-मुखान्नीवृतिलता-
महावी-रत्यंहः कृतिजन ! परब्रह्मणि रतान् ।
भवाद्भीतो भूत्वाऽधिवनितम-हार्वी रमणतां,
यदि प्रेप्सुर्मुक्तेः स्फुरदव-महावीरतिभुवः ॥ २

महाऽवी-राऽनार्यं पर-समयमस्यन् करुणया,
जयेऽरीणां धाम्ना दशशतमहा वीर ! समयाः ।
महावीरः स्फूर्ज्जद्विषमविपदां मुक्तिरपि च,
महावीरं वैर-क्षितिभृति भवन्ति प्रणमतः ॥ ३

निकुर्वन्तं गर्वं महति यम-हावीर मयिताऽऽ-
महाऽवीरं कुर्याद्रिपुकुलमुपेतः कृतिजनः ।
महावीरो विघ्नव्यतिकर-हुतौ रातु मघवा,
महाऽवी रम्यं स प्रवचनजुषां वः शिवसुखम् ॥ ४

पू.पण्डित श्रीमेरूविजयगणिविरचिता

(३८) (उपेन्द्रवज्रा)

महारमा वीर ! कराऽङ्गतार-महा रमा ऽऽ वीर ! कराऽङ्गतार !।
महा रमा वीर कराऽङ्ग तार, महारमावीर क ! राङ्ग ता-र ॥१

सदा ऽऽ प्तमाले ! हितदे ! ऽवमाऽनां,
सदाऽऽप्त-माऽऽले हितदे ऽव मानाऽ ।

सदाऽऽप्तमाले-हितदे ! ऽव माऽनाऽ-,
सदाऽऽप्तमा ऽलेऽहितदेव माऽना ॥ २

समाऽरमाऽऽमाऽगमयामराऽमाऽ-,
समाऽरमा ऽमा गमयामरा मा ।
समाऽरमा मा गमयाऽमराऽमाऽ-,
समाऽरमाऽमा ! ऽऽगम ! यामरामा ॥ ३

सिद्धा ! ऽयि ! का मे-भवतादमाया,
सिद्धाऽऽयिकामे ! भवतादमाया ।
सिद्धायिका मेऽभवतादमाऽऽया,
सिद्धायिका मे ! भवतादमाऽया ॥ ४

पू.मु.श्री रविसागरविरचिता

(३९) (आर्या)

रुचिराजी रुचिराऽजीहित नोऽहितनोदकोदकोपमित ! ।
पङ्के पङ्केऽपङ्केहित ! हि तवावीरवाऽ! वीर ! ॥ १

विश्वं विश्वं विश्वम्भर ! भर ताऽनत ! न तामसाऽराम ! ।
महसा महसाऽऽमहसाचित ! चितमर्हत्कलाप ! तवता पात् ॥२

भारत्याभा रत्यापादित-दितपातकाऽऽतपायकृतः ।
जिनभर्तुर्जिनभर्तुर्मानोमाऽनोकसोवशाऽऽनद्धः ॥ ३

भविकं भवि कं भविकं नय नय नयनोरुरश्मिराजिष्णुः ।
रामा रामाराऽऽमा सिद्धा सिद्धायिके ! सके ! ऽशङ्के ॥ ४

(४०) (इन्द्रवंशा)

सिद्धार्थजं काञ्चनवर्णभूघनं, सम्पूर्णविज्ञानवरं स्मिताननम् ।
वृन्दारकैर्वन्दितपादपङ्कजं,
वीरं भजेऽहं तत-काम-सामजम् ॥ १

येऽनन्तसंसारसमुद्रतारकाः, कन्दर्पदर्पानल-भीबलाहकाः ।
कल्याणवल्लीमुदिरा, नतामरा-
स्तीर्थङ्करास्तेऽपि जयन्तु शङ्कराः ॥ २

हिंसाविमुक्तं विजयान्वितं हितं, निर्मायिकं श्रीमुनिराजसेवितम्।
नानाकुवाद्यावलिदर्पनाशनं, वन्दे वरं श्रीजिनराजशासनम् ॥३

मातङ्गदेवोऽतिवरः शिवंकरः, श्रीमन्महावीरमते विपद्धरः ।
सिद्धायिकापि प्रबलतमोज्ज्वलं,
ज्ञानं हि लक्ष्मीविजयस्य यच्छतात् ॥ ४

(४१) वर्धमानाक्षर-गुप्त-युक्तश्रीमहावीर-स्तुतिः

परसमय-तिमिर-तरणिं, भवसागरवारि-तरणवरतरणिम् ।
रागपराग-समीरं, वंदे देवं महावीरम् ॥ (आर्या) १

निरुद्ध-संसार-निहारकारिदुरन्तभावारि-गणा निकामम् ।
निरन्तरं केवलिसत्तमा वो, भवावहं मोहभरं हरन्तु ॥(इन्द्रवज्रा)२

सन्देहकारि कुनयागम-रूढ-गूढ-
सम्मोहपङ्क-हरणामलवारि-पूरम् ।
संसार-सागर-समुत्तरणोरुनावं,
वीरागमं परमसिद्धि-करं नमामि ॥ (वसन्ततिलका) ३

परिमलभर-लोलालीढ-लोलालि-माला-
वरकमल-निवासे हार-निहार-भासे ।
अविरल-भवकारा-गार-विच्छित्तिकारं,
कुरु कमल-करे मे मङ्गलं देवि सारम् ॥ (मालिनी) ४

(४२)

यदंह्रिनमनादेव, देहिनः सन्ति संस्थिताः ।
तस्मै नमोऽस्तु वीराय, सर्वविघ्नविघातिने ॥ (अनुष्टुप्) १

सुरपतिनतचरणयुगा–न्नाभेयजिनादिजिनपतीन्नौमि ।
यद्वचनपालनपरा, जलाञ्जलिं ददति दुःखेभ्यः ॥ २

वदन्ति वन्दारुगणाग्रतो जिनाः, सदर्थतो यद्रचयन्ति सूत्रतः ।
गणाधिपास्तीर्थसमर्थनक्षणे, तदङ्गिनामस्तु मतं विमुक्तये ॥३
(वंशस्थ)

प्रोक्तः सुरासुरवरैरिह देवताभिः,
सर्वज्ञशासनसुखाय समुद्यताभिः ।
श्रीवर्धमान इह निर्वृतिमीहमानो,
भव्याङ्गनानवतु नित्यममङ्गलेभ्यः ॥ (वसन्ततिलका) ४

(४३) (स्रग्धरा)

पा पा धा धा नि धा धा ध म ध म ध ग सा सारि गा सारिगा पा
सा सा गा गा री धा पा नी गरी म स र सापा प गा सारी धा पा ।
इत्थं षट्जातिरम्यं करणलययूतं सत्कलाभिः समेतं,
सङ्गीतं यस्य देवैर्विहितमतिशुभं पात्वसौ वर्धमानः ॥ १

खुदां खुदां खुखुदां डि खि डिखिडाखिमांटां घुमांटां घुमां
डुकमां डुकमां डुडुकमां डुलि डुलि डुलिमां भांग भांभां भभां
भाम् ।
भां भा छं छं भं भां भां छटकी छटकी रटित्वाभवाभां भवभू
येषामातोद्यवाद्यं विदधति विबुधाः पान्तु वस्तीर्थपास्ते ॥ २

कोटं टं रावणं टंत्रिभुवनकरटं दर्पणं हंरणंटं,
द्राव्यं द्राव्यं द्रद्रव्यं डह डहडह च त्रांगुटं त्रागुनेत्रम् ।
ज्रांप्र ज्रांप्रं झ झ प्रांत्रिखित्रिखिभ क्षुद्रभिः क्षुद्रमासै-
रेभिस्तूर्यैः सतोषं जिनपतिवचसा पातु पूजयोपचारः ॥ ३

स्त्राटाभिस्त्राटयंती त्रुटितकरतटं कापटं साटयन्ती,
कोटांडु कोटयन्ती त्रुटित कटमटं कापटं लोलयन्ती ।
उत्तालैर्व्यालफालैः स्फुटजटिलजटाजूटलं जोटयन्ती,
वैरोट्या लाटयन्ती धन सूघन सूरी छन्दसो वर्धमानः ॥ ४

(४४) (अनुष्टुप्)

नमस् त्रिलोकनाथाय, सर्वसत्त्वोपकारिणे ।
संसारार्णवतीर्णाय, महावीराय शान्तये ॥ १

जिनाविक्षिप्तकर्माणौ, भव्याम्बुजदिवाकराः ।
केवलज्ञानसम्पूर्णा, दिशन्तु परमां गतिम् ॥ २

नानानयशतैः पूर्णं, नानाहेतूपशोभितम् ।
वाक्यं जिनास्यनिःक्रान्तं, नतोऽस्मि शिरसा हितम् ॥ ३

वरकाञ्चनवर्णाभा, यक्षमातङ्गपूजिता ।
रक्षां करोति सा देवी, कूष्माण्डी जिनशासने ॥ ४

॥ श्री वीरस्य पञ्चवर्गपरिहारस्तुतिः ॥

(४५) (अनुष्टुप्)

हरहासयशोराशिं सेवे हारं शिवश्रियः ।
रोषोर्वीरुहसंहार-वायुं वीरेश्वरं वरम् ॥ १

विश्वश्रीसंश्रियः सार्व-विसरांह्रि (रोऽह्रि) सरोरुहम् ।
सुरहंसावलीसेव्यं स श्रियात् पा(ल्या)लि वः श्रिये ॥ २

सुरासुरविशां वारा सहर्षी(र्षा)यं हि शश्रुवुः ।
श्रेयसेऽ(स)रहः सर्वे (सार्व) विहारविसरः स वः ॥ ३

शिवहारि सरोहंसं सार्व सार्वहसारवम् ।
विषषे(से)वृषवः सार्वश्रिये वः स्युः सुराः सुराः ॥ ४

(४६) (अनुष्टुप्)

तीर्थकृत्त्वं परां दद्याः सुमतिं कुमतिं हरन् ।
कुवलये नवे स्थायिन्नः पाहि भवतः प्रभो ! ॥ १

चतुर्विंशतिजिनास्तद्‌भ(भा)वन्तो भवन्तो(भावतो)ऽभयात् ।
सुरेन्द्रैः पूजिताः सर्वे, राजन्ते, करुणापराः ॥ २

सिद्धान्तः प्राकृतः देवैः सेव्यो भक्तसुरैर्वरैः ।
गणधरैः शिवं प्राणिन् दीयते भवते(तो) यतः ॥ ३

सिद्धायिका परा शक्ति-र्दक्षा श्री -परमे पदे ।
कराग्रे कमलां दत्ते, जयन्ती दुरुपद्रवम् ॥ ४

(४७) (अनुष्टुप्)

वीरं विनाशितारिष्टं, देवं देवेन्द्रवन्दितम् ।
नित्यं निरभिमानं हि, वन्दे वन्द्यपदद्वयम् ॥ १

जैना जैवातृकश्वेताः, पादाः पापविनाशकाः ।
युष्मानायुष्मतो नित्यं, पान्तु पङ्कजनिर्मलाः ॥ २

जैनं जीवगणैः पेयं, वाक्यं पीयूषसन्निभम् ।
भूयाद् भूवलये भूरि-भूत्यै भव्यात्मनां सदा ॥ ३

सिद्धा सिद्धिकरा लोके, देवी देवगणार्चिता ।
दद्याद् दासगणानां हि, सौख्यं विघ्नविदारकम् ॥ ४

(४८) (अनुष्टुप्)

सिद्धार्थ-पार्थिव-सुतं, कामवल्ली-हिमागमम् ।
महावीरं मुदा वन्दे, सुरासुरनतं मतम् ॥ १

सिद्धि- सीमन्तिनीहारा, रम्याकारा जिनेश्वराः ।
जयन्तु जगतीजन्तु-तापव्याप-घनोपमाः ॥ २

जैनागमं सदा वन्दे, मोक्षलक्ष्मी-फलप्रदम् ।
भवकूपार-पाराय, कर्णधार-महो-मतम् ॥ ३

ददातु भारती देवी, शं सदा सुख-शालिनी ।
श्रीमज्जैन-मुखाम्भोज-राजहंसी शुभानना ॥ ४

पू.मु.श्री भानुचन्द्रविरचिता

(४९) (इन्द्रवज्रा)

स्तोष्ये मुदा श्रीयुत-वर्धमानं, संवर्धमानं नतभानुचन्द्रम् ।
सिद्धार्थवंशाम्बर-पद्मबन्धुं, विश्वाधिनाथं विपदं हरन्तम् ॥ १

सर्वज्ञवारो वितनोतु शस्तं, पूतो यशोभी रुचिभानुचन्द्रः ।
पङ्काब्ज-सङ्कोचनचक्रबन्धुः, देवाग्रणीर्निर्जितपार्वतीशः ॥ २

जीयान्मतं शर्मकरं जिनानां सेवाकरैकाऽद्भुत-भानुचन्द्रम् ।
क्षीणाष्टकर्मास्यसृतं विशुद्धं, रागाद्यसूयाजयपञ्चवक्त्रम् ॥ ३

सद्रूप-चन्द्रेण नुता वराम्बा, सारासु-चञ्चत्त्तरभानुचन्द्रा ।
चन्द्र-प्रतीक्ष्योदय-चन्द्रपादां-
भोरूट् प्रभावात् प्रथितानुभावात् ॥ ४

(५०)

नमत त्रिभुवनसारं जितमारं हारतारगुणवारम् ।
वीरं कान्तशरीरं गिरिधीरं पापमलनीरम् ॥ १

नमदमरविसरमणिमुकुटकोटितटघटितमसृणनखमुकुरान् ।
जिनराजः शिवभाजः स्मरत त्रैलोक्यसम्राजः ॥ २

विलसत्कुबोधसन्तमससञ्चयापचयकरणखरकिरणम् ।
ध्यायत जैनकृतान्तं नितान्तं ततभवकृतान्तम् ॥ ३

विदलन्नवीनसरसीरुहकृतनिवासा विकासकमलकरा ।
विमलयतु मम मनीषां, हरहसितसितप्रभादेवी ॥ ४

(५१)

यो ज्ञानी यमुपासते मुनिवरा येनोदिता सत्क्रिया
यस्मै विश्वजनो नमस्यति यतो धर्म्मः प्रवृत्तोऽनघः ।
यस्याश्चर्यकरी समृद्धिरवसन् यस्मिंश्च सर्वे गुणाः
स श्रीवीरजिनस्तु(स्त)नोतु सुतरां नित्यं सतां मङ्गलम् ॥ १

नित्यानित्यजिनालयाच(व)लिगता ये भूर्भुवःस्वस्तये
वर्त्तते वररत्नरूपरुचिर(च्)छायामनोहारिणः ।
सद्भक्त्या नरखेचरामरवरैराराध्यपादाम्बुजा-
स्ते सर्वे(ऽ)पि जिना दिशंतु सुतरां नित्यं सताम् (मङ्गलम्) ॥२

यत् कल्याणकलापकाननसमुल्लासेम्बुवाहायते ।
यन्मिथ्यात्वतमः समूहहरणे प्रोद्युत्प्रदीपायते ।
यत् संसारसमुद्रतारणविधौ प्रत्यग्रपोतायते ।
तत् सार्वज्ञवचस्तनोतु स(सु)त्त(त)रां नित्यं सताम् (मङ्गलम्॥३

या (द्व) पीयूषमयूषमण्डलगलत्पीयूषधारावली-
स्नातेवातिपवित्रगात्रलतिका सद्भिः सदा ध्यायते ।
वीणापङ्कजश(शा) स्त्रपुस्तकवराक्षालीपरोद्यत्करा ।
वाग्देवी बत सा तनोतु सुतरां नित्यं सु(स)तां मङ्गलम् ॥ ४

## अल्लाशब्दाङ्किता

(५२)

अल्ला अल्ला अल्ला, रुदितं येनेति नैव वीरेण ।
देवापहारसमये, तस्मै तुभ्यं नमो वीर ! ॥ १

अल्ला प्रमुदिता येषां, दृष्ट्वा स्वप्नाँश्चतुर्दश ।
अल्ला स्वप्नार्चिता येषां, तेऽर्हन्तः स्युः शिवाय वः ॥ २

अल्ला जिनागमो जीया-दनल्लानां शरीरिणाम् ।
अल्ला कल्याणकोटीनां, अल्ला जीवदयाऽङ्गिनाम् ॥ ३

अल्ला च जैनी देवी, जैनानां सर्वदेहिनाम् ।
जहारोपद्रवं सर्वं, या सा स्याद् वः शुभङ्करा ॥ ४

(५३) (अत्युक्ताजातौ स्त्रीछन्दः)

वीरं देवं नित्यं वन्दे ॥ १

जैनाः पादा युष्मान् पान्तु ॥ २

जैनं वाक्यं भूयाद् भूत्यै ॥ ३

शन्नो देवी देयादम्बा ॥ (सिद्धादेवी दद्यात्सौख्यम्) ४

(५४) (कन्या)

श्रीदेवार्यं विश्वे वर्यम् । पूर्णानन्दं, भक्त्या वन्दे ॥ १

तीर्थाधीशाः, शुद्धादेशाः । सर्वेऽभीष्टं, शं कुर्वन्तु ॥ २

अर्हद्वाचो वाचो युक्त्या । क्लृप्ताः सद्भिः पापं घ्नन्तु ॥ ३

शान्ता कान्ता, सिद्धादेवी । शान्त्यै दान्त्यै, शश्वत् भूयात् ॥ ४

(५५) (उपजाति)

सदा महावीर ! भजे भवन्तम् (४) ॥ १

समे जिना मालमलङ्कवन्ते (४) ॥ २

संसारवारागममानदेहि (४) ॥ ३

रमाकरा मे भवतादरेशा (४) ॥ ४

(५६) (अत्युक्ताजातौ स्त्रीछन्दः)

वीरं हीरं सेवे भक्त्या ॥ १

सर्वेऽर्हन्तः शान्तिं कुर्युः ॥ २

जैनं वाक्यं सिद्धिं दद्यात् ॥ ३

सिद्धादेवी दद्याद्विद्याम् ॥ ४

(५७) (कन्या)

लोकाधारं शान्ताकारं वन्दे वीरं वीरं वीरम् ॥ १

सिद्धा बुद्धा ये श्रीदेवाः तेषां भावैः कार्या सेवा ॥ २

श्रौतीभक्तिश्चित्ते येषां प्रज्ञाजातं पुण्यं तेषाम् ॥ ३

जैना यक्षा रक्षा दक्षा दिशन्तु मे धर्मे शिक्षाः ॥ ४

(५८) (कन्या)

श्रीमद्वीरं, वन्दे धीरं । हर्यक्षाङ्कं, ह्यस्तातङ्कम् ॥ १

विश्वोद्धर्त्तः, श्रेयस्कर्तः । जीयास्त्रातः, सार्थव्रात ! ॥ २

श्रीसिद्धान्तं, सेवे कान्तम् । अर्थव्रातं, नष्टानिष्टम् ॥ ३

दत्तादिष्टं, यक्षोमुख्यः । मातङ्गाख्यश्चञ्चत्सौख्यः ॥ ४

(५९) (कन्या)

वीरं वन्दे दीव्यद्रूपम् । कामक्रीडात्यक्तासङ्गम् ॥ १

सर्वेऽर्हन्तो, जैनानस्मान् । मुक्तेर्लीलां, दद्युः शीघ्रम् ॥ २

आप्तं वाक्यं, प्राप्तं पुण्यात् । पोतं रम्यं, संसाराब्धौ ॥ ३

व्योम्नि भ्राम्यन्नागारूढो । मातङ्गो मे विघ्नं हन्यात् ॥ ४

(६०) (वसन्ततिलका)

श्री वर्द्धमानजिनदेव-महाप्रभुत्वः,
रागादिशत्रुहतितोऽर्जित-मोक्ष-लक्ष्मीः ।
श्री-मज्जिनार्ह-सकल-प्रवचो-विलासः,
सिद्धे हि देवि शिवसौख्यमथो विधेहि ॥ १

(चतुर्शः उच्यते)

(६१) (शार्दूलविक्रीडितम्)

श्रीवीरोदितवाक्तरङ्गतरलश्रेणिसमुद्रागमः,
सम्यग्दृष्टि-सुरार्चितस्तुतनरैः सद्भङ्ग-चारुक्रमः ।
यस्त्वं त्रासयसेऽत्र रात्रि-कुनयांस्तर्कांस्तमांसि हरेः,
सप्तव्रातहितः सतां वितनु वै त्वं तथ्यपथ्य-प्रथाम् ॥ १

(चतुर्शः उच्यते)

(६२) (उपजातिः)

श्री-वर्धमानाऽजित-भारतीशा वृद्धौ धराया यशसाऽम्भसेव ।
त्वमेव वल्ली जिनराजराजी, श्रुताऽनिशं सम्मदादाप्तपुंसाम् ॥१

(चतुर्शः उच्यते)

(६३) (उपजाति)

श्री-वर्धमानोऽचेत-चारुवाचो, जिनाधिराजा नत-देवराजी ।
श्री-हीरसूरीश्वर-पादपद्मा, सेवापराणां ददतां शुभानि ॥ १

(चतुर्शः उच्यते)

(६४)

कर्पूरपूरकमनीययशोऽसमानं,
कल्याणगौर-वपुषं जिनवर्धमानम् ।
जैनागमं वरममन्दसुधासमानं,
स्फूर्जन्मुदो विजयदानगुरोः प्रभावम् ॥ (इन्द्रवज्रा) १

(चतुर्शः उच्यते)

(६५) (उपजाति)

श्री-वर्धमानाप्त-यशोभिरामः, सुवर्णकान्तोन्नतिभाग्जिनौघः ।
सर्वानुभूतिर्वसुभूति-जात-स्सदागमो नस्कुरुतां शिवानि ॥ १

(चतुर्शः उच्यते)

(६६) (अनुष्टुप्)

श्रीवीरोदितवाक्सुधा, तीर्थराजो महामहाः ।
प्रणमद्देवराजो नो, ददतां शिव-सम्पदः ॥ १

(चतुर्शः उच्यते)

(६७) (अनुष्टुप्)

श्रीवर्धमानतीर्थेशाः, कुरुतो-चित-सम्पदः ।
भक्तदेवा हिता वाचः , स्मरणं कुर्वतां सताम् ॥ १

(चतुर्शः उच्यते)

(६८)

प्रभुमहावीरदेवजिनेश्वरं,
सकलतीर्थपतिं अचलेश्वरम् ।

प्रतिदिनं प्रणमामि जिनागमं
कुरु हि यक्षिणी संघ सहायताम् ॥ १

(चतुर्शः उच्यते)

पू.मु.श्री कनककुशलगणिकृता

(६९) (वसन्ततिलका)

श्रीवर्धमान ! जिनशासन ! सर्वदर्शि !,
सङ्घस्तुतोत्तमगुणैः श्रितसन्निकृष्ट ! ।
मातङ्गहारिगम ! शर्म कुरुष्व सम्यग् !,
श्रीसूरिहीरविजयोदित ! सत्प्रभाव ! ॥ १

(चतुर्शः उच्यते)

(७०) (वसन्ततिलका)

श्रीवर्द्धमान ! जय ! सर्वजिनेशसिद्ध-
सिद्धान्तगोमुखहिमद्युतिकान्तिकान्त ! ।
सौवर्णवर्णवरदेहसमुल्लसच्छ्री-
लावण्यतोषितसुधीजनलोचनाली ॥ १

(चतुर्शः उच्यते)

(७१) (वसन्ततिलका)

श्रीवर्द्धमानजिनराजि कृतान्तभक्ते,
कल्याणमुख्यविजयोदयसारकीर्ते ।
सर्वानुभूतिरनिशं तनुतात् सुखानि,
सश्रीकहीरविजयाभिधसूरिसङ्घे ॥ १

(चतुर्शः उच्यते)

(७२) (इन्द्रवज्रा)

श्रीवर्धमान ! प्रभुताऽभिराम ! श्रीतीर्थराजः शिवशौच(शुचि?)वाचः।
सर्वानुभूतिप्रभवः प्रसर्पत्-सौख्यं प्रकर्षं ददतां जनानाम् ॥ १

(चतुर्शः उच्यते)

(७३) (इन्द्रवज्रा)

श्रीवर्द्धमानाप्तगणप्रशस्य-राद्धान्त ! भक्त्यामरनाथपूज्य ! ।
सूरीश्वरानन्दगुरोर्गणेशं, मनोज्ञवाचः कुरुतामुदारः ॥ १

(चतुर्शः उच्यते)

(७४)

कमलदललोचनं विमलकुलरोचनं,
भजत भयभञ्जनं भुवनजनरञ्जनम् ।
समयमभिवन्दितं त्रिजगतीजीवनं,
वीरमर्हद्गुणं शासनस्वामिनम् ॥ १

(चतुर्शः उच्यते)

पू.आ.श्री सहस्रावधानिश्रीमुनिसुन्दरसूरिविरचिता

(७५) (गगनदण्डकच्छन्दः)

त्रिभुवनविभ(भो+ई)वीप्सितार्थप्रथाप्रत्यलत्वातिकल्प
द्रुमोग्रप्रभावस्फुरत्सौरभाद्यत्क्रमाम्भोजरोलम्बली-
लावलम्ब्युल्लसद्भक्ति-सन्नम्रनाकाधिराट्-
नरपतिततिमौलिसन्मौलिभास्वत्प्रभाजालविद्योतितोपान्तदेशस्त्वमर्हं-
स्त्रिलोकैकबन्धो ! धराधीशसिद्धार्थवंशाग्रभूषामणे ! वर्धमानप्रभो ! ।
कुवलयवनकोकिलश्यामलागाधमोहान्धकारप्रचारापहारार्कबिम्बोपमापा-
रकारुण्यपाथोनिधे ! धाम ! धाम्नां विधेहि प्रसद्याशु मे बिभ्रतः,

सुकरुणरसगोचर ! त्वं चिरं भीष्मसंसारकान्तारवा-सोद्भवै
र्दुःखपूरैःश्रित-स्याधुना पादयुग्मं त्वदीयं कथञ्चित् पुराणैरगण्यैः
सुपुण्यैः शिवम् ॥ १

वितरतु मम निवृत्तेः शर्म सा सन्ततिस्तीर्थराजां विचक्रे सुपर्वेश्वरैः
देशनासद्म यस्यास्तदेकश्रिया भ्राजितं भाभराभ्रंलिहादभ्रवप्रत्रयी-
परिगतमुरु किन्नरस्त्री समारब्धगीतिप्रतिश्रुन्निनादौघवा-
चालिताशा-न्तरालं प्रमोदातिरेकात् प्रनृत्यत् सुरालीक्रमाघात-
संक्षुब्धगौत्राचलम् ।
त्रिदशततिभिराहितोद्दामवादित्रचक्राऽद्भुतैर्यत्र कोलाहलैः
स्फुरति सु-विस्तृतैर्नाकिनाथोच्चितोद्यत्पताकावलीनद्ध
सत्किङ्किणीनिःक्वणैः सद्गतै-स्तरलिततरस्तारमीयु स्तुरङ्गाः
किलाहर्मणेर्यानयुग्मास्तथा त्रासमत्युद्भूतं नैव कुत्राप्यवस्थान
मेकत्रसम्प्राप्नुयुस्ते तथाऽद्यापि भीता इव ॥ २

भवतु भवभिदे ममानन्तसङ्ख्यार्थवाचाक्षरालीजलागाधमध्यो जि-
नेन्दूक्तसिद्धान्तपाथोनिधिर्धीवरैरप्यगम्यस्तनूमत्कृपोल्लासिवेलाकुलो,
बहुविधनयभङ्गकाऽप्रत्नरत्नोत्करभ्राजितोऽप्राप्तपारः सुपाठीन-
मालाभिरप्युल्लसद्धेतुरङ्गत्तरङ्गावलीमालितः प्राज्ययुक्ति-
प्रथाशुक्तिभृत् ।
पृथुचतुरनुयोगदीव्यत्तटः स्पष्टदृष्टान्तमुक्ताकलापाचिताङ्गप्रदेशो
मुनीन्द्रादिसद्वृत्तसर्पत्तिमिश्रेणिभिः सङ्कुलः श्रीनिवासो
गम्भीरत्वभू-र्विबुधजनमनोमुदुल्लासनप्रत्यल प्रेङ्खदिद्धप्रमाणौ-
घकेलिमहाभूमिभृद्धो-रणीबन्धुरः सूक्तसन्दोहभास्वत्प्रवालालयो
देवताऽधिष्ठितः ॥ ३

अपहर भयमम्भसा सम्भृतस्य भ्रमोद्रेकरूपेण संसारपाथोनिधेर्वी-
तरागोक्तसिद्धान्तबोधप्रथायानपात्रप्रदाने वाग्देवि ! विश्वार्चिते!,
सुमधुरगति निःस्वनं हंसमधिरूढवत्यङ्गिनां स्वं शिवाकाङ्क्षिणां
लोलरोलम्बझङ्कारारवैरिवागीयमानोल्लसत्सौरभं बिभ्रती
पुण्डरीकं करे ।
सितकरहारनीहारशुभ्रप्रभाभासमाने ! नरोल्लसिभक्त्या
नमन्नाकिना-गाङ्गनाचक्रवालोत्तमाङ्गच्युतोदारसिन्दूररेणूत्करै-
ररुणितमभिधारयन्ती क्रमद्वन्द्वमज्ञानविद्वेषिणि ! क्रोधपूरा-
दिवाशेष-विश्वत्रयीबोधिरत्नापहारप्रगल्भ-
स्फुरद्विक्रमोद्दण्डचापोत्कटे ॥ ४

पू. मु. श्री उदय(लावण्य)धर्मगणिकृताः

(७६) (उद्दामदण्डक)

स चरमपरमेष्ठिनाथ ! त्वदेकान्तविश्रान्तचित्ताः स्वयं सूरय-
स्सूचयन्तीति तत्त्वं परेषां यदेनं जिनं वर्द्धमानप्रभुं,
भजत रजतगौरवर्णं विवर्णावनीभूतवर्णागमं निर्जराधीनपुण्यां च
नार्हं तमोदीर्णभावं प्रभावास्तवामाहितम् ।
विविधधनसमिद्धसिद्धार्थपृथ्वीय(प)ति-प्रीतिकारिण्यु-
दाराशया-ऽम्भोरुहाशीतपादोदयं दीप्ततेजोदयं पादपद्मद्वयी,
भजत रजतगौरवर्णं विवर्णावनीभूतवर्णागमं निर्जराधीनपुण्यां
च नार्हं तमोदीर्णभावं प्रभावास्तवामाहितम् ॥ १

निखिलजिनवरावली दर्शनानन्दलीनात्मनां व्यक्तभक्ताङ्गभृत्
कौमुदीवल्लभानां मनश्शान्तिपीयूषयूषार्पणे तर्पणे,
रजनीपतिविभास्वरा वर्जिताखण्डजी-वासनज्येष्ठमध्यस्थ
बाणस्थिति-र्मुक्तनिर्ग्रन्थनाथायतागारसाराजभावञ्चकम् ।

शुभमुभयभवाश्रयायातसातोदयं वर्द्धयन्ती चयं वर्द्धयन्ती च तीव्रांहसां पुष्पयत्वाशुपुष्पर्तुतुल्यां यशोजालकै,
रजनीपतिविभास्वरावर्जिताखण्डजीवासनज्येष्ठमध्यस्थबाणस्थिति-
र्मुक्तनिर्ग्रन्थनाथायतागारसाराजभावञ्चकम् ॥ २

जिणगणिभणिआगमो दाणि माणेइ णिम्माइणिव्वत्तए देइ वित्थारए आसु णित्थारए बारए गाढपाठत्थिणं पाणिणं,
दुहबहूविह वेअणं तत्तसंकित्तणं तं कलंकित्तणं पावणिज्जायणं सीससंघायणं सव्ववेरग्गयं सव्वहा भग्गयं ।
गमणयसयसंकुलो तक्कचक्केसु चक्केसरो वक्क वक्केसरो छिंदई भिंदई रुंधइ संधए बंधए सोहए बोहए,
दुहबहूविह वेअणं तत्तसंकित्तणं तं कलंकित्तणं पावणिज्जायणं सीससंघायणं सव्ववेरग्गयं सव्वहा भग्गयं ॥ ३

हवइ कइवईणि वायकाएसु णिद्दोसया वित्तपावित्तयं सद्दिट्ठि गंगातरंगालिए णाणसुण्हाणसंताणओ,
सिअवसण सुहासिआ जुग्गहं सप्पिणा अप्पवीणिक्कणिस्साण अत्ताण मायालयाणं च सारप्पणासायओ हारिणी सामिणी ।
दिसउ सुअसमिद्धिमिद्धा पसिद्धा ससिद्धा सुरेहिं सुरेहिं णया सारया सारयादेवया मे वरा पुण्णलावण्णधम्माणुआ,
सिअवसण सुहासिआ जुग्गहं सप्पिआ अप्पवीणिक्कणिस्साण अत्ताण मायालयाणं च सारप्पणासायओ हारिणी सामिणी ॥४

(७७) (महादण्डक)

जयति जयविभूषितोऽदूषितोऽरूषितः सूषितः सिद्धिसौधे प्रबुद्धे-डितोऽपीडित- पापपूरेण दूरे स्थितोऽनन्तसंसारि-णामङ्गिनां दुष्टदुष्पार-संसार-विस्तार-निस्तारकारी क्षमाद्,

रणकणदलने घरट्टो मरट्टोज्झितः पूजितः कूजितं कोकिलं तर्जयन्, गर्जितं वारिवाहं च, कण्ठस्य-कान्तत्व-गम्भीरता-स्फारता-तारतम्येण रम्येण रूपेण लोकत्रयी-चित्तचौर्यादृतः ।
भृशमसदृशामतीतो वनितो-पगीतो विगीतादपेतो विनीतैरुपेतः सुधीभिः सुधावत् सुपीतो-पदेशोऽथ धर्मास्तिकायादि-सद्वस्तुनः स्कन्ध-देश-प्रदेशादि-विज्ञान-शाली, कपालीश्वरः,
कविकुल-कवितोऽभितो नाभितो देहजैर्दक्षिणैर्लक्षणैर्लक्षितः पण्डितैश्चेतनामण्डितैः कैश्चनाऽखण्डितैः खण्डनग्रन्थनिर्मन्थ-नेष्टैरपि प्रस्तुतो भोगिभि- योगिभिर्वर्द्धमानो जिनः ॥ १

विमलकमलमञ्जुनेत्राः पवित्राः समुद्यच्चरित्रा लवित्राः, काराः कुकर्मावलिकर्षणे, हर्षणे हेतवः स्वे कुले केतवः, संसृतौ सागरे सेतवः, शत्रुसंहार-कालैर्महाक्षोणिपालैस्त्रिधा वन्दिताः,
अमरकुमर-कोटिभिर्वेणु-वीणादिवादित्र-वृन्दैर्वरैः क्लृप्तकीर्ति-प्रताना, अनन्ताभिधानावधाना प्रधाना निधानाधिकाध्याना-नला विमानाधिप-ध्येय-दान-प्रदाना अदाना निदाना-प्रहारोपधाः ।
अतिशयचय-राजितास्त्याजितात्यन्ततान्ति-प्ररोहा अमोहास्त-मोहावरोहाऽव्यपोहा अदोहा अधातूपरोधादलोहा अधातूपरोधाद्विरोधाद् विमुक्ता विमुक्ताफलैर्वर्द्धिता स्पर्द्धिता नाप्यजैरनुपहतवचोविलासा अहासा विसृष्टान्तरङ्गारिवर्ग-प्रवासा सुधान्धोवधू-धोरणी-गीयमान-स्फुर-द्रास-भासः स्वभासोपहासास्पदीभूत-भानु-प्रभासाः प्रददुर्जिनेशा जयवरं सर्वदाप्यक्षयम् ॥ २

जिनपति-परिभाषितं तावदेवार्थतः सूत्रतः शब्दितं गच्छनाथैर्जिनाधीशभर्त्रा सनाथैस्ततो लब्ध-लब्धापरिच्छिन्न-निश्शेष-नाथैः परेषां प्रमाथैरथो सद्गुरोर्व्यूढयोगैरधीतं तथाऽध्यापितं साधुभिर्नापरैः कृश-भव-भविवाञ्छितं लाञ्छितं सप्तभिर्नैगमाद्यैर्नयैरञ्चितं सप्त-भङ्ग्या प्रमाणो-भयभासुरं नम्रदेवासुरं सूक्तजीवादि-देवादितत्त्व-स्वरूपं परिक्षिप्त-संसारकूपं निरस्तेष्टरूपं विचित्रैरसैः ।
सपदि भणति विस्तरं गद्यपद्योभयीबन्धुरं, वादि-वृक्षावली-धूनने सिन्धुरं, कर्णनानन्तरं धूनितद्राक्-त्रिलोकीशिरःकन्धरं, सर्वपक्षान्तर-ग्रन्थवल्मीकपीयूष-भुक् - भूधरं, दुर्धरं, चारु-सीमाधरं, भजत, रजत-शुद्ध-सद्भाकुला द्रव्यतः क्षेत्रतः कालतो भावतो द्रव्यपर्याय-भेदाश्रितं सापवादं तथोत्सर्गवर्गं, विभक्त्यष्टकार्घ्यं त्रिकालं त्रिलिङ्गं त्रिवाक्यं तथा दर्शनद्रव्यषट्कं यतिश्रावकाचारमाप्तागमम् ॥ ३

सदुदय-रुचिचारूचारा, गुणौघैरुदारा, बुधैरप्यसम्प्राप्त-पारा, प्रशस्यावतारा, शुभ-श्लोक-वैशद्यलोकात्त-लक्ष्मीभवत्तार-तारा, निजाज्ञावशस्थापितानेकनिर्वाणवारा, जिनोपास्तितो नष्टविकारप्रकाराक्षरावंश-मणिमय-चीरधाम-प्रसारा, नदन्नुपुरा, सप्तादिसुस्वरसारा, कटीमेखला-किङ्किणीक्वाण-निष्पन्न-विश्वप्रतारा, सुवर्णीयबाहा, परिष्कारधारा, मणिस्वर्णमुक्ता-ढ्यहारा, सचूडामणीकेशभारा लसत्कुण्डला ।
प्रवचनवचनचातुरी-रञ्जितानेकभूपा क्वचिद्दर्शितद्राक् स्वकीय-स्वरूपा क्वचित्सृष्ट-सङ्गीत-वीणा-विनोदा क्वचिद् दत्तदेवेश-सत्सभ्यमोदा, क्वचिन्निर्मितानुत्तरादिशा, क्वचित्षोडशार्च्चिस्तु-

राषाड्जितार्च्चिर्भरा क्वचन वचन-दर्शना जाततोषा, क्वचित्पादयोः पाततो नुन्नरोषा क्वचिन्नाकनाथासनासीन देहात्क्वचिन्नागनेतुर्हठात्पूरितेहा, जिनाधीश्वर-प्रोदित-द्वादशाङ्गश्रुताधीश्वरी भारती देवता सेवतामर्हतः ॥ ४

(७८)

अमहेलं अमहेलं अमहेलं सहस्सपत्तपडिबोहे ।
सत्तासं सत्तासं सत्तासं मह महावीरं ॥ १

कमलासा कमलासा कमलासा सियविणीयनीय जणा ।
संसारं संसारं संसारं दलयउ जिणाली ॥ २

सवणेहिं सवणेहिं सवणेहिं सावहेवहेलकरिं ।
अमयरसं अमयरसं अमयरसं भयसुहं पीयं ॥ ३

सयवत्तं सयवत्तं सयवत्तं भारइ वहंती वो ।
सियपक्खा सियपक्खा सियपक्खा वड्डिया अवउ ॥ ४

(७९) (उपजातिः)

कल्लाणकंदाहि-अदिप्पमाणं सम्मत्त-सत्ताहि-असेवमाणं ।
अनन्त-नाणाहिय-वद्धमाणं, भत्तीइ वंदे सिरिवद्धमाणं ॥ १

जे सव्वया सव्वसुरा-सुरिंदा, नमंति नागिंद-नरिंद-वंदा ।
ते दिंतु सव्वाण सुहं जिणिंदा,
कल्लाण-वल्लीण विसाल-कंदा ॥ २

निन्नाय-लोअस्स महानिहाणं, संसार-संतारण-सावहाणं ।
जिणागमं दुक्खगई-पिहाणं, नमामि निच्चं तिजगप्पहाणं ॥ ३

पणासिया-सेस-कुबुद्धि-मत्ता, अन्नाण-विद्धंसकअे समत्था ।
सरस्सई हंस-सुहा-समत्ता, सुहाय सा अम्ह सया पसत्था ॥४

(८०) (अनुष्टुप्)

वीर ! देवव्रजाराध्य-यक्ष सिद्धान्ततत्त्ववित् ! ।
श्रीमद्विजयसेनाख्य !, कुरु भद्रं महोदयम् ॥ १

पू.आ. श्रीहीरविजयसूरिकृता

(८१) (वसन्ततिलका)

विज्ञानपारगत बालकवीरमान-
मातङ्गमुक्तममतागमदानतारि ! ।
कामं तमोहरतरो परसत्पयोजे !
सूरीशहीरविजयस्य भव प्रसन्नः ॥ १

(८२) (वसन्ततिलका)

श्रीवर्धमान नतमानमशोध यन्ति,
स्वैरं यशांसि भुवनं तव शोधयन्ति ।
बुद्ध्या चकोरनिकरा शतशो धयन्ति,
चन्द्र द्युतामपरदेवयशोधयन्ति ॥ १

(८३) (वसन्ततिलका)

श्री-वर्धमान-जिनराज ! समाज-वन्द्य !
भास्वद्गुणौघगदितागम-सम्पदाद्य ! ।
भव्याम्बुजावलिदिनेशसुपर्व-सार्थ !
सम्यग्दृशां कुरु सुखानि गतान्तराय ! ॥ १

(८४) (अनुष्टुप्)

यामाताऽमम ! ता मा या, मा परोक्षक्षरोपमा ।
तारोने गगने रो ! ता-मक्षगक्षक्ष ! गक्षम ! ॥ १

(८५) (उपजाति)

श्रीवर्धमानाभिध - तीर्थराजाः कामं कवीनां ददतां नितान्तम् ।
सुधासुधाधाम- मरीचिवाचः, प्रमोदनम्रामरदेवराजाः ॥ १

(८६) (उपजाति)

मोहादतीतस्य तवेश ! वीर ! सुधीर ! सौभाग्यमुदग्रमायात् ।
मुक्त्यङ्गनालोभन ! यः स्तुते स्म,
सुधीरसौ भाग्यमुदग्रमायात् ॥ १

(८७) (उपजाति)

सदागमाक्षिप्तमरालपङ्क्ते ! विविक्तसत्तेतरभाव-भक्ते ! ।
श्री-वर्धमानाभयदालि-नीलं,
हन्यास्तमः शासनदेव ! ते द्राग् ॥ १

(८८) (स्रग्धरा)

मुक्तोमन्दोदयोर्व्वी शमद कलकलाऽऽसातमोहारिदोऽश्री-
मुक्तोमन्दोदयोर्व्वीश मदकलकलासाऽतमो हारिदोश्रीः ।
नीरागो वर्धमानाऽयमहजयभयासामहीनः सुधीरा-
नीरागो वर्धमानाऽयमहजयभया साम हीनः सुधीरा ॥ १

(८९) (शार्दूलविक्रीडित)

त्रैलोक्योदरलम्बिसुन्दर-महासंसिद्धि-लीलोदयः
कल्याणैक-परम्परावितरणे गीर्वाणभूमीरुहः ।
सत्काम्यं ददतां नतामरनर-श्रेयः श्रियां सङ्गमं,
श्री-वीराभिधतीर्थराज उदितेन्दूद्योतिवाचः सताम् ॥ १

(९०) (द्रुतविलम्बित)

त्रिजगदीक्षण ! केसरिलक्षण ! क्षणमपि प्रभुवीर ! मनोगिरौ ।
गुणगणान्मम मास्म विरज्यतामुदयिता दयितादयि तावकात्॥१

(९१) (द्रुतविलम्बित)

भृशमदभ्रमदभ्रमदभ्रमप्रथमनः सुमनः सुमनः स्तुतः,
असुमतः सुमतः सुमतोऽवदातपरमः परमश्चरमो जिनः ॥ १

(९२) (द्रुतविलम्बित)

चलनकोटिविघट्टनचञ्चलीकृतसुराचल ! वीर ! जगद्गुरो !
त्रिभुवनाशिवनाशविधौ जिनप्रभवते भवते भगवन् ! नमः ॥१

(९३) (द्रुतविलम्बित)

जयति यः सुरसङ्गममानहृत्, जगति वीरजिनो जगतीसुहृत् ।
भवतु भीतिहरो मम सर्वदा, स शरणं शरणं गुणसम्पदाम् ॥१

(९४) (द्रुतविलम्बित)

प्रवरकुण्डनराधिपनन्दनं, वरमहाव्रतपञ्चविकाशकम् ।
कृतसुराधिपमोक्षमहोत्सवं, चरमतीर्थपतिं सुतरां स्तुवे ॥ १

(९५) (रथोद्धता)

भक्तितो मतिजुषो भजन्ति यं, वर्धमानमहमानमामि तम् ।
जन्तुजाततमसो निशातनं, वर्धमानमहमानमामितम् ॥ १

(९६)

देवाधिदेव ! परमेश्वर ! वीतराग !
सर्वज्ञ ! तीर्थंकर सिद्ध ! महानुभाव !
त्रैलोक्यनाथ ! जिनपुङ्गव ! वर्धमान !
स्वामिन् ! गतोऽस्मि शरणं चरणं द्वयं ते ॥

(९७)

जियमोहमहावीरो चरमो तित्थंकरो महावीरो ।
असमसमो असमसमो निरंतरं कुणउ कल्लाणं ॥ १

(९८)

आसाढे धवलाइ छट्ठि चवणं चित्तस्स तेरस्सिए,
सुद्धाए जणणं सुकिण्हदशमी दिक्खायमग्गरस्सिरे ।
जस्सासी वइसाहसुद्धदसमी नाणं जणाणंदणं,
मुक्खो कत्ति अमावसाइ तमहं वंदामि वीरं जिणं ॥ १

(९९) (मालिनी)

कणयसमसरीरं मोहमल्लेगवीरं, दुरियरयसमीरं पावदावग्गिनीरं।
सुगहियभवतीरं लोअलंकारहीरं,
पणमह सिरिवीरं, मेरुसेलेसधीरं ॥ १

# ॥ श्रीचतुर्विंशतिजिनस्तुतयः ॥

(१) (शार्दूलविक्रीडित)

नाभेयाऽजितवासुपूज्यसुविधिश्रेयांसपद्मप्रभान्,
श्रीशान्तिं शशिशम्भवाऽरसुमतीन्नेमिं नमिं शीतलम् ।
धर्मपार्श्वसुपार्श्ववीरविमलाऽनन्तं तथा सुव्रतं,
कुन्थुं मल्ल्यभिनन्दनौ नुत जिनानेतांश्चतुर्विंशतिम् ॥ १

जम्बूद्वीपविदेहपुष्करवरद्वीपार्धसन्धातकी-
खण्डेषु प्रवरेषु ये च भरतेष्वैरावतेषु स्थिताः ।
नम्राऽऽखण्डलमण्डलीमधुकरश्रेणीभिरासेविता,
तेषां तीर्थकृतां मुदे भवतु वः पादाऽरविन्दद्वयी ॥ २

उत्पादादिपदत्रयी समभवन्मूलं बभूवुर्दला-
न्याचारप्रमुखाऽङ्गकानि विपुलाः शाखाप्रशाखा नयाः ।
ज्ञानानि प्रसुनोदयः फलमभूत्स्वर्गादि-सम्पत्तयो,
यस्याऽसौ जयताज्जिनाऽऽगममहावृक्षश्चिरं भूतले ॥ ३

गौरी सैरिभगामिनी पविधरा वज्राङ्कुशी शृङ्खला-
च्छुता चक्रधरा फणीन्द्र-महिषी सर्वायुधा रोहिणी ।
प्रज्ञप्ति मृगगामिनी द्रुमकरा काली महाकालिका,
मानस्या सह षोडशाऽपि कुशलान्येताः प्रयच्छन्तु नः ॥ ४

(२) (शार्दुलविक्रीडित)

नाभेयाऽजित-सम्भवाह्व-सुविधि-श्रेयांस-पद्मप्रभा-ऽ
नन्तान् नेमि-सुपार्श्व-शान्ति-विमल-श्रीपार्श्व-चन्द्रप्रभान् ।
भक्त्या सुव्रत-कुन्थु-शीतल-नमि-श्रीवासुपूज्याऽभिधान्,
वन्दे मल्ल्य-भिनन्दाऽऽख्य-सुमतीन् धर्मा-ऽर-वीरेश्वरान् ॥१

चञ्चत्कुण्डल-तारहार-मुकुट-स्रग्-कङ्कणा-ऽलङ्कृतै-,
र्दुग्घाम्बु-प्रभृतोरु-हेमकलशैः स्नाता गिरौ वैबुधैः ।
सत्त्रिंशत् त्रिदशेश्वरैस् त्रिभुवनप्राज्य प्रतापश्रियस्-
ते वो मुक्तिपदं दिशन्तु, सततं तीर्थाधिपाः शैशवे ॥ २

यस्याकर्णनमेव भव्यमनसां, दुःखौघनिर्मूलनं
वैराग्यं विदधे त्वलं भवशते स्याद्वादमार्गे वरैः ।
चेतः स्वास्थ्यमहर्निशं प्रकुरुते सङ्घस्य सञ्चिन्तने
तद् वन्दे जिनशासनं नतसुरं मोक्षाध्वसारं परम् ॥ ३

घोराकारकठोरदुःखदलना दुष्टारिपक्षक्षया
क्षेत्रारक्षणदक्षपक्षपटुतैः प्रह्वा प्रिये प्राणिनाम् ।
भव्यानां दुरितौघनाशनिकरैः शान्तात्मनां शान्तता
देवी मानव दुष्टरक्षणपराः क्षेत्राधिपाः पान्तु वः ॥ ४

(३)

श्रीगौतमगणधारं शुभतरुराजीप्रतानजलधारम् ।
त्रिभुवनशोभाकारं नौमि सदा सुन्दराकारम् ॥ (आर्या) १

आदीश्वरदेवं सुरकृतसेवं पुण्यविशालं भूपालं,
प्रभुमजितं ध्येयं सुरनरगेयं ज्ञानामेयं वन्देहम् ।
संभवभगवंतं शिवजयवंतं रमावहंतं शुभवंतं,
संवरनृपनन्दनश्री अभिनन्दनमीडे नित्यं जगदीशम् ॥(त्रिभङ्गी)२

मेघमहीपतिपुत्रं सुमतिं पद्मप्रभं स्तुवे शुभदम् ।
श्रीमज्जिनं सुपार्श्वं चन्द्राभं चन्द्र समवक्रम् ॥ (आर्या) ३

(त्रिभङ्गी)

सुविधिं गुणजलधिं वाञ्छितनिधिदं वन्दे सततं लब्धमुदं,
शीतलजिनमिज्यं नतसुरवर्य्यं कृतवरचर्य्यं सद्धैर्य्यं,
समतां बिभ्राणं विश्वत्राणं रुचिरप्राणं श्रेयासं,
जिनं वासुपूज्यं वासवपूज्यं धृतशिवराज्यं शोभार्य्यम् ॥ ४

(४) पू.श्री भुवनहिताचार्यरचिता

(सुरामदण्डक)

नतसुरपतिकोटिकोटीरकोटितटीश्लिष्टपुष्टप्रकृष्टद्युति-
द्योतिताशाननाकाशसर्वावकाशप्रदेशोल्लसन्नीलपीतारुण-
श्यामवर्णाढ्य रत्नावली–प्रसृमरकरवारनिस्तारनिर्मेरनीरान्तरा
नीरजन्मेन्दिरा सारसंभारसारानुकारक्रमन्यास-
पावित्र्यपात्रीकृता–ऽनार्यवर्यार्यभूमण्डली ।
बहुलतिमिरराशिनिर्नाशिभासामधीशांशुसन्दोहसङ्काश-
सत्केवलज्ञानसंलोकितालोकलोकस्वरूपा सुरूपाढ्य-
वैताढ्यवासीशमुख्यैर्नृमुख्यैः श्रिता, जिनपतिविततिस्तनोतु श्रियं
श्रायसीं ज्यायसीं प्राणभाजां सदा भक्तिभाजां कलाकेलिकेली
समारम्भरम्भामहास्तम्भहेलादलीकारकुम्भीशसाराद्भुता ॥ १

अमरनिकरक्लृप्तकङ्केलिसम्फुल्लफुल्लावलीप्रान्तवेल्लन्मधुस्यन्द-
निस्पन्दबिन्दुप्रपापानसञ्जायमानासमान ध्वनिध्वानसन्धानरोल-
म्बमत्ताङ्गनाविरचितनवरङ्गभङ्गीतरङ्गी भवच्चङ्ग
रागाङ्गसङ्गीतिरीतिस्थितिस्फीतिसम्प्रीणितप्राणिसारङ्गचित्तं

महानन्दभित्तं रमाकन्दवृत्तं सुवृत्तं सदा । समवसरणमण्डपं भूषयन्तो नयन्तो नयं नव्यभव्यान् वचश्चस्तरीविस्तरैस्तर्जयन्तो भयं भीमभावारिवीरोदयं निर्दयं दान्तदुर्दान्तसर्वेन्द्रिया, विदधतु विबुधामबाधामगाधा जिनाधीश्वरा भास्वरा मेदुरां देहिनां सम्पदं दन्तिदन्तान्तराकापतिप्रान्तविश्रान्तकान्ति-च्छटाकूटपेटद्यशः-सञ्चयाः ॥ २

कुनयनिचयवादसंवादिदुर्मादकादम्बिनीसादरोदोदरीदूर सञ्चारतारीभवद्भूरिझञ्झासमीरं सुतीरं जडापारसंसारनीराक-रस्यानिशं, कलमलदलजालजम्बालनिक्षालनस्वच्छनीरं कषायानलप्रज्वलद्ज्वालसन्तापिताङ्गाङ्गिसन्तापनिर्वापणाम्भःकरीरं कुटीरं लसत्सम्पदां संविदाम् ।
कुमतवितततुङ्गनिर्भङ्गसारङ्गनिर्भङ्गसारङ्गनाथं शिवश्रीसनाथं कृताघप्रमाथं महायाममायामहीदारसीरं गभीरं महोमन्दिरं भावतो, घनतमगमसङ्गमं सङ्गिभिर्दुर्गमं सन्नमन्नाकिभूमीरुहजङ्गमं मुक्तिमेद्यन्महानन्दमानन्दमाकन्दराधागमं संस्तुवे संश्रये श्रीजिनेन्द्रागमम् ॥ ३

हिमकरकरहारनीहारहीराट्टहासोच्छलत्क्षीरनीराकरस्फारडिण्डी-रपिण्डप्रकाण्डस्फुरत्पाण्डिमाडम्बरोद्दण्डदेहद्युतिस्तोम-विस्तारिशङ्खच्छटा-धवलितसकलत्रिलोकीतला कुण्डला-लीढगण्डस्थला हारसञ्चारणाहारिवक्षःस्थला नूपुरारावसिंरा-विदिग्मण्डला हंसवंशावतं साधिरोहोज्ज्वला ।
विनमदमरसुन्दरीकण्ठपीठीलुठत्तारहारामलाऽऽमूलसङ्क्रान्त-पादाम्बुजव्याजनिर्व्याजसन्दर्शितस्वान्तविश्रान्तसे-वातिहेवा-

कसंसारभावोद्भवा, भुवनहितकरं परं धाम सौवं प्रसद्य प्रदद्यान्
ममावद्यबन्धं विभिद्यान् मणीमालिका पुस्तिकाकच्छपीनीर-
रुट्शस्तहस्ताविहस्तासदासारदा शारदा ॥ ४

(५) (उद्दामदण्डक)

पणमह मरुदेविजायं दुइज्जं जिणं संभवमभिणंदणं मंगलाणं-
दणं पंकयंकं तहा सत्थियंकं जिणं लक्ख-णाणंदणं, पवर-
मयर-लंछणं सीयलं विण्हुरायं-गयं वासुपुज्जं वराहां-
कियाणंत-धम्मे तहा संति-कुंथु-अरे-मल्लि-तित्थाहिवं ।
जिणवर मुणिसुव्वयं नीलपंकेरुहंकं, सिवाणंदणं पासनाहं
जिणं, वद्धमाणाभिहाणं जिणंदोत्तमं संनमामो वयं,
कमिकमिं चउवीसमेवं जिणिंदाहिवा भारहे वासि जंबूदिवम्मि-
अ दीवे पयच्छंतु सव्वाण भव्वाण निव्वाण-मुक्खं सया
रुयगसिहर-कुंडलत्तंग-सरोसुचारु-द्दिसंदीव-नंदीरुये ॥ १

माण-सालंकिअे उत्तरे भूधरे चारुवेयड्ढ सेलेसु य,
परमरुययपुक्खरद्दीव-अड्ढम्मि, सद्धाइअे संडदिवम्मि जंबू
जंबूपयालंकीअे दीवपुव्वावरोह-विदेहेसु खित्तेसु य ।
भरहपणग-पंचएरावएसुं कुरुसुंपि सव्वेसुं वि काणणेसुं
सुमेरु-सुमेरु-सुसीमाधरेसुं तहा द्दंतिदंतेसु य,
भुवणवंतरालए जोइकप्पेसुं गेविज्जगाणुत्तराएसुं,
तित्थेसुं बिंबे पुरारामगामेसुं वण्णेसुरन्ने विहिए कए ॥ २

सरह सरह संसयं भंजयं च्छव्विहावस्सयं हुंतवेयालयं
उत्तरज्झायमायारमंगं च सुयंगडं तहा सुललियपय-

भंगठाणं गठाणं समवायअंगं तहा पंचमंगं विवाहाइपण्णत्ति-
नाम षडंगं च पुव्वाण सव्वाणवि ।
सुविहिय-जिणसारपच्छित्तदाणे फुडं पंचकप्पं निसीहं
विवायं विहारं तहा जियकप्पं सुयक्खंधमायं दसासुयं,
सुरनरतिरिनारयाणेय वुत्तावयामुमोवाइयाइं उवंगाइं सव्व-
न्नुणा अत्थउ गंथियंगं यच्छउ तस्स सीसेहि या ॥ ३

उवरि पढमदेवलोगाइ-एसिं दसिंदा सुहम्मिंद ईसाण-
इंदाइ या सप्परीवारसव्वन्नुपायारविंदम्मि भत्तिब्भरा,
ससहर-रविजोइसिंदाण पन्नीमहावंतरिंदाइ, बत्तीस जक्खे
सुजक्खा तहा जक्खणी बंभसंत्तीओ जक्खोकवड्डिवय ।
चमरबलिमहिंदाइ वीसं सुविज्जामरी सोगत्तसाहं सरी-
सग्ग-पत्तीपरीवार-जुत्ता सिरिबुद्धिलच्छीहरी-भारही,
तिहुअणजगि सम्मदिट्ठिसुरा सम्मदिट्ठिसु साहूण साहूणीणं
सुसड्ढाण सड्ढीणं सम्मं विहीए रयाणं सुहं दिंतु ॥ ४

२६

## ॥ श्रीसामान्यजिनस्तुतयः ॥

(१) (मृदका)

चैत्यद्रुमः कुसुमसन्ततिरासनध्वनि-
च्छत्राणि भावलयदुन्दुभिचामराणि च ।
राजन्ति यस्य रचितानि सदा सुपर्वभिः,
श्रीदेवदेवमुदितोदयमाऽऽनमामि तम् ॥ १

चत्वार आद्यदिनतः प्रभवन्ति यस्मि-
न्नेकादशाऽथ विलयेऽतिशयाः सुभान्ति ।
एकोनविंशतिरमी अमरैः कृताश्च,
श्रीसर्ववेदिनिवहं तमहं स्तवीमि ॥ २

भूयो भवभ्रमणसम्भवतापखिन्ना,
यस्याश्रिताः सपदि निर्वृतिशर्मभाजः ।
हेतुःश्रियामिव सुरद्रुमकाननं श्री-
जैनेन्द्रशासनमिदं शिवदं श्रयेऽहम् ॥ ३

जागर्ति नित्यमिह या कलिकालरात्रौ,
सिंहेऽधिरुह्य जिनधर्मजुषां सुखाय ।
विघ्नाऽपहारमभितः सृजती श्रिताना-
मम्बा शिवाय भवताद्भविनामिवाऽम्बा ॥ ४

(२) (द्रुतविलम्बित)

असमरं समरञ्जनमञ्जन-च्छिदमिनं दमिनं शमिनं जिनम् ।
अविरतं विरतं विरतं रतं, भविहते विहतेऽर्हतमर्चत ॥ १

अममता मम तापघना घनाः, सकरलापकलापर ।
रविपदो विपदो विपदो जिना,
व्यपनयन्तु नयन्तु नयन्तु माम् ॥ २

विलसदक्षरदक्षरजः क्षितौ, कुमततक्षत तक्षणदक्षतौ ।
श्रुत ! सदा नवदानवमानवस्तुत ! नतीनवतीननवर्जित ! ॥ ३

स्फुटितभासुरभा सुरसुन्दरी-व्रजनता जनतापिहिता हिता ।
सकमलं कमलं भुवि बिभ्रती, स्यतु तमांसि तमांसि सरस्वती॥४

पू.पं.श्रीविनयहंसगणिविरचिता

(३) (द्रुतविलम्बित)

सदयतादयतात्मपथप्रका-शकवचः कवचप्रणताङ्गिनाम् ।
तव पदाब्जयुगं सुगुणावली-वनरसं नरसंश्रितमाश्रये ॥ १

जिनवरा नवरागहतोदराः, कुनयदुर्मददुर्मदने हराः ।
सरसदर्शनदर्शनिनः श्रुत-स्वरचयं रचयन्तु हृदङ्गिनाम् ॥ २

गणधरैर्विहितं विहितं श्रितं, रविमिताङ्गमिताङ्गभृतां मते ।
दिशतु संसृतिसंसृतिपारभृत्, सकलया कलया कलितैरलम् ॥३

श्रीसुरी दिशतु कामितानि मे, तानि मेरुरिव धीरदर्शना ।
दर्शनाद्भविकभावुकाकला, शालहर्षविनयत्र ! भूजया ॥ ४

पू.पं.श्रीविनयहंसगणिविरचिता

(४) (हरिणीप्लुत)

येषां कक्षा न्यक्षाऽक्षूण्णाकक्षीकाराक्षोदीयः-
पक्षाक्षेपक्षुण्णारोहांहः सन्दोहापोहोहा ।
वन्द्याऽनिन्द्याऽवद्याऽतोद्या मानज्ञानं विज्ञानं,
नाभेयाद्यान् देवार्यान्त्यान् सर्वान् सार्वांस्तान् स्तोष्ये ॥ १

या संसारे सारासारं मत्वाऽऽदेयं संहेयं,
त्यक्त्वा सङ्गासक्तिं युक्त्याराध्याऽबाध्यं चारित्रम् ।
कर्मोन्मूल्यादाय ज्ञानं नित्यानन्ताभां लेभे,
तीर्थेशाली सम्पल्लीलोल्लासायासौ भूयान्मे ॥ २

सिद्धैश्वर्यं कुर्यात्कस्यावश्यं न श्रीसिद्धान्तः,
सत्याप्यार्थः सार्वैः सूत्र्यासूत्रः सूत्रात्तच्छिष्यैः ।
कैवल्यश्रीलीलावासः सृष्टाभीष्टानुष्ठेयः,
शिष्टाचारस्पष्टीकारे भास्वान् शश्वद्विश्वाऽर्च्यः ॥ ३

सार्वोपास्या यक्षा यक्षिण्यः श्रीरम्बा चक्रेशा,
ब्राह्मी पद्माऽजिह्मब्रह्माद्वैताश्चान्याधिष्ठात्र्यः ।
विघ्नारिष्टं घ्नन्तु श्लोकालोकं मेलं देयासु-
र्योग्यारोग्यं भोग्याभोगं रङ्गद्भाग्यं सौभाग्यम् ॥ ४

पू.पं.श्री विनयहंसगणिविरचिता

## (५) श्रीजिनपारणास्तुतिः

(इन्द्रवज्रा)

यत्पारणासु प्रथमासु हेम-कोट्योऽपतन् द्वादश हन्त सार्धाः ।
शान्ता निशान्तेषु जिनेन्द्र-चन्द्रा,
पात्राणि ते रान्तु मम प्रमोदम् ॥ १

आद्येशितुः पुण्ड्र-रसप्रधानात्, शेषार्हतां पायस-सम्प्रयोगात् ।
श्रीपारणानि प्रथमानि तानि, सङ्घस्य यच्छन्तु महत्समृद्धिम् ॥२

(उपजाति)

यदुक्तमेकं ददतां सुदान-, मेकावतारि-त्वमथो बभूव ।
नृणां तदा तद्भव एव सिद्धिः, सिद्धान्तमर्हद्गदितं तमर्चे ॥३

सिद्धायिका श्री-जिनवीर-तीर्थ-प्रभावनाकारि-पटु-प्रभावात्।
सचक्रचापाद्भुत-पाणि-पद्मा, पद्मापरा रातु मम प्रमोदम् ॥४

पू.पं.श्री विनयहंसगणिविरचिता

(६) (अनुष्टुप्)

कामितं कामितं दद्यात्-परमेष्ठी परेष्टदः ।
सकलः सकलश्रीणां, पारगः पारगत्वरः ॥ १

स्वयम्भुवो भुवो ज्ञान-श्रीणां संवरसंवराः ।
मानसन्मानसयुङ्क्त-सञ्चयं रचयन्तु नः ॥ २

गुणाधीशैर्गणाधीशै-र्विहितं विहितं वदत् ।
श्रुतं श्रुतं श्रियं दद्यात्-सदक्षरं सदक्षरम् ॥ ३

शारदा शारदाभ्राङ्गी, श्रीहर्षविनयश्रियम् ।
नित्यं नित्यं करोतूच्चं, भवे भवे भवोद्भवम् ॥ ४

(७) (उपजातिः)

देवेन्द्रवन्द्यो जिनसर्वविद्या-नन्दं विधत्ते त्वयि वीक्षिते यः ।
सदा समासादितधर्मकीर्तिः, शिवं श्रयेताशिवशासनोऽसौ ॥१

ते सर्वदेवेन्द्रगुरोः सविद्या, नन्दन्ति नूनं सुमनःसभासु ।
ये दर्शितार्थश्रुतधर्मकीर्तिन् ? नमन्ति देवान् परमात्ममूर्तीन् ॥२

यद्भक्तितः श्रीरपि सार्वविद्या-नन्दस्थितं पुंसि सधर्मकीर्तौ ।
ससम्पदेवेन्द्रवति प्रकामं, तस्मै नमो जैनवरागमाय ॥ ३

तेषां मुदेऽवेन्द्रसधर्मकीर्ते, वलक्षमूर्ते श्रुतदेवते त्वम् ।
ये ते गुणानस्तविसार्यविद्या-नान्दोलयन्ति स्तवनेन नित्यम् ॥४

## पू.मु.श्री प्रद्युम्नविजयविरचिता
## संसारदावा – तृतीयस्तुतिपादपूर्तिरूपा
(८) (मन्दाक्रान्ता)

सत्कारुण्यामृतरससृतं पावनं निर्विकारं,
हंसानां ते प्रवचनमिदं मानसाभं जिनेश ! ।
सेव्याम्यद्धासकमलमलं पापतापाप-हेशं,
बोधागाधं सुपदपदवी-नीरपूराभिरामम् ॥ १

तावच्छीतः शिशिरकिरणो गाङ्गमम्भश्च हृद्यं,
पीयूषं वा विरलसुखदं ताप-हृत्तावदेव ।
लब्धं नार्हत्प्रवचनसरोन्तः- पवित्रं विपत्त्रं,
जीवाहिंसा-विरललहरी-सङ्गमागाहदेहम् ॥ २

लक्ष्मीस्थानं शमदमकरं नीतिसत्सिन्धुपूरं,
सम्यग्बोधा-प्रतिमतरणी-लब्ध-सत्तत्त्वरन्तम् ।
श्रीस्याद्वादा-विरल-धवलोल्लासिडिण्डीरपिण्डं,
चूलावेलं गुरुगममणी-सङ्कुलं दूरपारम् ॥ ३

मन्दैर्ज्ञेयं न वरमणिभं साधुसंज्ञानिगम्यं,
कल्याणान्न प्रथमजिनराट्नाभिजन्माभिजातम् ।
सूक्ष्मार्थाब्जप्रकटनखरांशुं नताशेष-लेखं
सारं वीरागम-जलनिधिं सादरं साधु सेवे ॥ ४

(९) (अनुष्टुप्)

गर्भे जन्मनि दीक्षायां, केवले निर्वृतौ तथा ।
यस्य इन्द्रा महश्चक्रुस्तं जिनं नौमि भक्तितः ॥ १

मोहेभकुम्भनिर्भेद-विधौ कण्ठीरवोपमाः ।
ये जिनास्तत्पदाम्भोजं, नमस्याम्यघनाशनम् ॥ २

अङ्गोपाङ्गजलाऽऽपूर्णं, नयकल्लोलसङ्कुलम् ।
सद्दर्शनादिरत्नाढ्यं, वन्दे जैनाऽऽगमोदधिम् ॥ ३

सर्वे यक्षाम्बिकाद्या ये, वैयावृत्त्यकराः जिने ।
क्षुद्रोपद्रवसङ्घातं, ते द्रुतं द्रावयन्तु नः ॥ ४

(१०) (अनुष्टुप्)

जिनो जयति यस्याङ्घ्री सुरासुरनरैर्नतौ ।
निर्वाणभाजनं भव्या, भवन्त्येव यदा नतौ ॥ १

जयन्तु ते जिना येषां, दर्शनादपि देहिनः ।
न केऽपि कांश्च कस्यापि, पुरो जल्पन्ति देहिनः ॥ २

प्रयत्नः सफलो यत्र, जैनं मतं तु सम्मतम् ।
कृतानत-जनानन्दं, सुखस्थानं नमामि तत् ॥ ३

जैन्यो वाचोऽथ मन्यन्ते, गोमुखप्रमुखैः सुरैः ।
सद्दृशो ये च मन्यन्ते, क्लेशनाशाय सन्तु ते ॥ ४

(११) (भुजङ्गप्रयात)

जिनानामनाम स्फुरद्गामगाम-प्रभो वाम-वामक्षमा-रामराम ।
भवा भावताम श्रियः कामकाम,
विनीतामताम प्रभो दामदाम ॥ १

मतव्रातकल्पद्रुसब्रह्मचारी, परब्रह्मधारी जिनौघः सनाथः ।
महोभिः सनाथः स नाथस्तनोतु
श्रियं वः कलङ्कप्रमाथः प्रमाथः ॥ २

सुधासार-सारं दितैनः - प्रचारं, हतव्याधिमारं धुताधीप्रचारम्।
क्षुरक्षुद्रमारं सदोदार - तारं, सुदुष्प्रापपारं श्रुतं नौमि सारम् ॥३

महस्वी ललाटस्ततोरः कपाटः,
स्फुरच्चण्ड-दण्डक्षतारातिखण्डः ।
महावीरतीर्थेशतीर्थे भयच्छिद्,
शुचिब्रह्मशान्तिः शुभस्वर्णकान्तिः ॥ ४

(१२) (सोमराजी)

जिनः कान्तियुक् सोमराजीव सौम्यः ।
क्षितौ दर्शनीयः सदा वीतरागः ॥ १

जिनौघं सुरेन्द्रैः सुरागेऽभिषिक्तम् ।
स्तवीमि स्मरामि, श्रयामि स्वभक्त्या ॥ २

जिनोक्तः कृतान्तः सदाजीवलोके ।
प्रबोधाय नूत्नोऽस्ति, सूर्य-प्रकाशः ॥ ३

जिनाधीश धर्मोद्यत-श्रावकाणाम् ।
सुरास्ते साहाय्यं, वितन्वन्तु नित्यम् ॥ ४

(१३) (शशिवदना)

जिनमिह दृष्ट्वा, शमरसमग्नम् ।
प्रणमति भक्त्या, शशिवदनासौ ॥ १

जिनपति-चक्रं, सुरनर वन्द्यम् ।
वितरतु भव्यान्, निरवधि-सौख्यम् ॥ २

विनय-विशिष्टं शुभमति-पाठ्यम् ।
प्रवचनसारं जनयतु बोधम् ॥ ३

प्रवचन-देवि श्रुतजलधारे ।
कुरु मम रक्षां भगवति दक्षे ॥ ४

## पू.आ.श्री सोमसुन्दरसूरिविरचिता

### (१४)

सर्वे द्युलोकागमजन्मदीक्षा-
ज्ञानाऽपवर्गाऽऽप्तिदिना जिनानाम् ।
महोत्सवोद्योतमया मयाऽमी,
स्मृताः समाधिं ददतां च बोधिम् ॥ (उपजातिः) १

च्यवनजननदीक्षाकेवलज्ञानमोक्षा-
गमसमयविशेषेषूत्सवाद्येषु येषु ।
क्षितिवलयमपास्तस्वर्गशोभं बभास्ति,
प्रददतु मुदमाऽऽप्तास्तेऽत्र कालत्रयेऽपि ॥ (मालिनी) २

उत्सर्पिण्यवसर्पिणीषु भरतेष्वैरावतेष्वर्हतां,
सर्वेषामपि भूतभाविभवतां कल्याणकेषु क्रमात् ।
मासान् भानि तिथींश्च शाश्वततया तान्येव विज्ञा जगु-
र्यस्मात्तज्जिनभाषितं प्रवचनं भक्त्या नमामोऽन्वहम् ॥(शा.वि.)३

ये श्रीतीर्थाधिपानां समसमयभुवां विंशतेर्वा दशानां,
तावद्रूपैरुपेता इह महिमभरं पञ्चकल्याणकेषु ।
अर्हद्भक्तिप्रमोदात्तृणतुलितदिवः कुर्वते सर्वकालं,
ते सर्वेऽपीन्द्रमुख्या विदधतु विबुधाः सङ्घलोकाय भद्रम् ॥४
(स्रग्धरा)

### (१५) ॥ चित्रस्तुतिः ॥

श्रस्ताशर्मावृतसुमहिमावीरितस्वान्तजन्मा-
बाधासिन्धुप्रतरणसहावासनावस्थितानाम् ।

अप्येको द्वौ किमुत बहवो वाऽनिशं ध्येयभावं,
गाते येषां जिनवरवृषा वृद्धये किं न तेषां ? ॥(मन्दाक्रान्ता) १

दूरापास्तसमस्तकुत्सनतमावीताखिलान्तारजावा-
मोल्लासविलासशोभनमहावृद्ध्यग्रिमौकावरम् ।
स्फूर्जद्भावृषभाभिरामनयनिर्दग्धाशुभैधावरं,
गातामेक उभौ समे जिनवृषा वृद्धं प्रसादं मम ॥ (शा.वि.) २

सम्प्राप्तब्रह्मसीमावतनुसुमुखमावर्यमद्वैतधामा-
वीक्ष्यातीताप्तहेमावितदुरितहावृष्टमासावितारम् ।
एको द्वौ वाऽपि सर्वे प्रतिदिनमरिहा वाञ्छित श्रेयसे द्राक्
प्रज्ञाप्तश्रीललामावरमिह भविनामीशतान्नम्रकाणां ॥(स्रग्धरा)३

इत्येको द्वौ समे वा त्रिभिरभियतिभिः काव्यराजैः क्रियादि-
श्लेषैः श्रीधर्मघोषैरभिनुतमहिमावर्यभावप्रकाशैः ।
त्रिच्छत्रीदण्डकैर्वान्तररिपुविजयन्यस्तविश्वत्रयान्तः,
कीर्तिस्तम्भैरिव श्रीजिनवरवृषभावीक्षयाध्यासतां मां ॥ (स्रग्धरा) ४

## (१६) जिनस्तुतिचतुष्कम्

वज्रेन्द्रनील मरकत, कनकाभं क्षिप्तकर्मसङ्घातम् ।
शतमधिकं सप्तत्या, प्रातर्वन्दे जिनेन्द्राणाम् ॥ १

भरतैरावतभूमौ, महाविदेहेषु वर्तमाना येऽ ।
तीताऽनागतरूपास्ते जिना उषसि सुखदा स्युः ॥ २

युक्ति-प्रतीति सिद्धं, प्रमाण-नय-निश्चितं जैनैः ।
प्रोक्तं सचराचरभूतहितं, प्रातर्वन्दे श्रुतं सततम् ॥ ३

देवाश्चतुर्निकायाः, सह देवीभिः, सदा रताः कृत्ये ।
सङ्घस्य चतुर्वर्णस्य, उषसि सुखं ददतु वो नित्यम् ॥ ४

(१७)

अविरलकुवल-गवल-मुक्ताफल-कुवलय-कनकभासुरं,
परिमलबहुलकमलदलकोमलपदतललुलितनरसुरम् ।
त्रिभुवनभवनदीप्रदीपकमणिकलिकाविमलकेवलं,
नवनवयुगलजलधिपरिमितजिनवरनिकरं नमाम्यलम् ॥ १

व्यन्तरनगर-रुचक-वैमानिक-कुलगिरि-कुण्ड-कुण्डले,
तारक-मेरु-जलधि-नन्दीश्वरगिरि-गजदन्तमण्डले ।
वक्षस्कार-भवन-मनुजोत्तर-कुरु-वैताढ्य-कुञ्जगाः,
त्रिजगति जयति विदितशाश्वतजिनततिरिह मोहपारगा ॥ २

श्रुतरत्नैकजलधिमधुमधुरिमरसभरगुरुसरोवरं,
परमततिमिरकिरणहरणोद्धरदिनकरकिरणसोदरम् ।
गमनयहेतुभङ्गगम्भीरिमगणधरदेवगीष्पदं,
जिनवरवचनमवनिमवतात् शुचि दिशतु नतेषु सम्पदम् ॥ ३

श्रीमद्वीरचरमतीर्थाऽधिपमुखकमलाऽधिवासिनी,
पार्वणचन्द्रविशदवदनोज्ज्वलराजमरालगामिनी ।
प्रदिशतु सकलदेवदेवीगणपरिकलिता सतामियं,
विचकिलधवलकुवलकलमूर्तिः श्रुतदेवी श्रुतोच्चयम् ॥ ४

पू.आ.श्री जिनदत्तसूरिविरचिता

(१८)

शक्तो जिनस्तुतिकृतौ न सुदेवसेव्यः,
शक्रापि कस्तदपरः प्रकरोति तां सः ।

यद्वा जिनस्तुतिकृते किल केवलश्री-
लाभो भवत्यपि वसावभवेन्न सेव्यम् ॥ १

श्रीनाभिजात-मजितं जिनसम्भवं च,
वन्देऽभिनन्दनजिनं सुमतिं जिनेशम् ।
पद्मप्रभं शुभकृतेऽस्मि नतः सुपार्श्वं,
चन्द्रप्रभं च सुविधिं जिनशीतलञ्च ॥ २

श्रेयांसमीशमनघं जिनवासुपूज्यं,
भक्त्या नमामि विमलं जिनमप्यनन्तम् ।
धर्म्मं च शान्तिजिन-कुन्थुमरिं च मल्लिं,
श्रीसुव्रतं नमिजिनं च स नेमिपार्श्वम् ॥ ३

वन्दे जिनं गुणगुरुं गुण-वर्द्धमानं
सूरिं जिनेश्वरमिहाभयदेवमेव ।
याचे तनोतु जिनवल्लभमादरेण,
ज्ञानादिमेक जिनदत्तहितं तु देहि ॥ ४

(१९)

केचिज्जात्यसुवर्ण्णवर्ण्णवपुषः केचिद्धिमांशुत्विषः
केचित् शोणमणिप्रकाशरुचयः केचित् प्रियङ्गुप्रभुः (? भाः) ।
केचिन्मेचकारशिसदृक् रुचि [रा] स्त्रैलोक्यवन्द्या जिना-
स्तीत्ता(ता)नागतसाम्प्रता भरत जाः शर्म्माणि यच्छन्तु नः ॥१

ये केचिद् भरतेषु भूषितभूवो ये केचिदैरावता
ये केचिञ्च विदेह जा जिनवराः सज्ञानलक्ष्मीभूतः ।
निःशेषामरवृन्दवन्द्यचरणाम्भोजद्वयाः सर्व्वदा
ते सर्वे(ऽ)पि जयन्तु दुर्जयमहामोहादिशत्रुच्छिदः ॥ २

या(:)कन्दर्प्पसदर्प्पसर्प्पशमने दिव्यप्रभावौषधी
या कुज्ञानमहान्धकारहरणे मार्त्तडबिम्बावली ।
या संसारसमुद्रमध्यनिपतत्प्राणिप्रतारेतया ।
सा सद्बोधविधायिका भवतु वः सर्वार्हतां भारती ॥ ३

ये श्रीमज्जिनमन्दिरेषु सततं पूजाविधानोद्यता(:) ।
क्षुद्रोपद्रवकारिदुष्टदलना रक्षन्ति सङ्घं सदा ।
कूष्माण्डीश्रुतदेवताप्रभृतिकाः सर्वे(ऽ)पि ते सत्वरं ।
वैयावृत्ति(त्य)कराः सुरा दधतु वो धर्मे समाधिं परा(म्) ॥४

(२०)

तव वीर ! सुप्रभातं विकसितसिरसारवृन्दवदनस्य ।
दूरनिरस्तनिरन्तरमोहमहातिमिरपडस्य ॥ १

विमलज्ञानालोचनसुपरिस्फ(स्फु)ट सर्वदृष्टभावानाम् ।
जयतीह सुप्रभातं सर्वजिनानामुपापा(या)नाम् ॥ २

भव्यजनपङ्कजागरविबोधकृत् सर्वपापतिमरघ्नम् ।
जयति जिनवचभानो(:) सुविशुद्धं सुप्रभातमिहम् (?दं) ॥ ३

पुस्तकपङ्कजहस्ते ! भव्यजनविबोधद्ब(?)नेकमलनेत्रे ! ।
विमलं सुप्रभाते श्रुताङ्गि ! वरदेवते ! नित्यं ॥ ४

पू.आ.श्री हीरविजयसूरिविरचिता

(२१) (इन्द्रवज्रा)

देवेन्द्रभूतेरुचिराङ्गि-रुच्यः, कुर्याः क्रियास्वाप्तकलापबोधम् ।
शस्यागमागाधनयैरशेष-श्रेयस्कृदस्त्वक्षर-पद्धतिर्मे ॥ १

(चतुर्शः उच्यते)

(२२) (द्रुतविलम्बित)

जय विभूषण–पारगतागम !, सुर–सुराधिप–पूजित ! सद्गते !.
सकल–मानव–मोदकरा जिनाः,
जय जयिन् विजयप्रभ ! सद्गुरो ! १

(चतुर्शः उच्यते)

(२३) (शार्दूलविक्रीडित)

ये संसारसमुद्रपातविधुरान् रक्षन्ति सत्प्राणिनः
उच्चैः सप्तनयोन्नतिं भवभयप्रध्वंसनाय श्रिताः ।
ये लोक–त्रय–पावना विदधते विश्वस्य कल्याणका–
स्तान्नित्यं जिन–जैनवाक्ययतिपान् वन्दे निरस्ताऽगसः ॥ १

(चतुर्शः उच्यते)

(२४) (वसन्ततिलका)

कल्याणसारसुवितानविशिष्टदृष्टे !,
कान्तारवारण–समान ! जयाद्यदेव ! ।
धर्मार्थ–कामदमहोदय– वीरधीर !
सोमप्रभाव ! परमागम – सिद्धसूरे ! ॥ १

(चतुर्शः उच्यते)

पू.मु.श्री समयराजगणि विरचिता

(२५) (तोटक)

वरकेवलदंसणनाणधरा, बहुपङ्क–कलङ्क–कुवङ्कहराः ।
अरिहन्तशुभागम–देवगणा, विगणन्तु अणन्तदुहं सगुणाः ॥ १

(चतुर्शः उच्यते)

(२६) (मालिनी)

कयसुकयपयासं, नाणलच्छी-निवासं,
हयदुरियविलासं, दिन्नसंमोहतासं ।
सुगुणजणिआवासं, देहि दीप्पंतभासं,
समरह दुहवासं तित्थनाहं सुनाणं ॥ १

(चतुर्शः उच्यते)

(२७) (अर्णवदण्डक)

विपुलविमलकलसकलकमलदलनयनयुगलवरममितकलं,
रुचिर-रुचिर-करकमनतुहिनकर-सुरगज-समगुण-गणममलम्।
फणिफण-पृथुमणि-गुरुतर-शुचि-रुचि-मतिशय-विलसन-
महिमधरं,
विकसित सरसिजवदन-
विजितविधुमभिमतमभिनुत जिनपगुरुम् ॥ १

अनुपमससममबहुलसलिलभरविदलितकलिमलपटलमलं,
शुभततितरुभरसजलजलदनिभमविकलकविकुल-
विनुतकुलकम् ।
शितिवसुवसुचय-तरुण-तरणिकरशशधर-घनघन-कमनरुचं,
भजत भजत जिनचरणनलिन-युगमनुदेवमिहभुवि
दलितशुचम् ॥ २

मधुरमधुर-तरविशद-सुपदपदमवितथमतिनुत-मति-विभवं,
भवभव-परिभव-विषय-विषम-विषजलनिधि-विघटन-
कल-सभवम् ।

विततकुमततमितिमिर-तिमिरभरविकट-चरटभट-दिवसकरं,
विनमत जिनमत-मवनत-घनजनमुदित-कुसुमवन-
सितगुकरम् ॥ ३

सुरवरपरदृढसुदृढगगनचरशुभकर-परिकर-परिकलिता,
सुघटित-जटित-मुकुट-मणिकरभर-निरुपमलवणिम-
गरिमयुता ।
अगणितमदशठकमठकमठहठघनघनरिपुजनकदनपरा,
जयति जगति जय-सुविनयनययुतसधरधरणिधर युवतिवरा॥ ४

(२८) (उद्दामदण्ड)

रुचिररुचिरमहामणिस्वर्णदुर्वर्णनिवृत्तिपावित्र्यभृच्चित्रशालत्रयीमध्यम-
ध्यासितं भाभिरुद्भासितं निर्जरोपासितं,
समदमदनतुङ्गमातङ्गनिर्भङ्गसारङ्गनाथं सनाथं
सहोभिर्महोभिर्महामोहसन्दोह-विध्वं-सदक्षं सदक्षं सदा ।
विघटितधनशोकबिम्बोकमल्लोकमस्तोकदुष्पा-
पसन्तापनिर्वाप-पाथोदमक्षो-दमादविस्तारकं कारकं सम्पदां,
मिलितललितसिद्धगन्धर्वविद्याधरश्रेणिसङ्गीतविस्फीत-
सौरभ्यविभ्राजिकीर्तिप्रदानं सदाऽऽनन्दमर्चामि तीर्थेश्वरम् ॥१

प्रचलदमलकुण्डलभ्राजिगल्लस्थप्रह्वसाखण्डल-
स्वर्गिसेव्योल्ललत्तारभामण्डल-ज्योतिरुद्द्योति-
ताखण्डदिग्मण्डलः, समरमरकविघ्नसङ्घातनिर्घातनिष्णात !
विध्यातविस्तारि-संसारदुर्वारदावानलः पावितक्ष्मातलः
क्षीणमायामलः ।

प्रकटविकटदर्पकन्दर्पविद्वेषिनिष्पेषिनिध्यान-सद्ध्यान-
वाणीकृपाणीसमुच्छिन्नसंशीतिदुर्नीतविल्लीवितान ! प्रभो !,
जिनविसर ! मम क्षतानल्पदुष्कल्पसङ्कल्पकल्पद्रुकल्पः प्रकुष्णातु
दोषं प्रमुष्णातु रोषं प्रतुष्णातु योषं भवान् ॥ २

कुमतकुमुदखण्डसच्चण्डमार्तण्डमुद्दण्डसद्भङ्गकल्लोलमालासमुद्रं
समुद्रं सुमुद्रम्ययोगीन्द्रदेवेन्द्रवृन्दस्तुतं,
यदि हि बत जगज्जनावर्यवैधुर्यविध्वंसिबोधोद्धुरं -
सौवमाधुर्यमाधुर्यदम्लानविज्ञानसन्तानभाजो गणाधीश्वराः ।
विलसदसमवृद्धिदुर्बुद्धिवल्लीसमुच्छेदभल्ली समानं समानं
गुणश्रीनिधानं शमश्रीनिदानं शिवस्वर्गयानं भुवा,
सुरगिरिशिरोविस्फुरच्चारुचूलं सुपर्वानुकूलं सुवर्णाभिरामं
नमस्यामि कामं तदुर्व्या ललामं पवित्रासनं शासनम् ॥ ३

सरसरभसचारूवन्दारूवृन्दारकोदारस्फुरन्मौलिमौलिस्पृग-
प्रत्नरत्नप्रभाभारसार-क्रमाधूतभूतभ्रमा,
स्फटिकतुहिनचन्द्रनिस्तन्द्रचन्द्रचन्द्रप्रभाजिष्णुवर्धिष्णुरोचिष्णुरोचिः
प्रपञ्चस्तुताशावकाशाभृताशा नमस्यन्नृणाम् ।
अपमलकलहंसमध्यासिता नासिता राजिताराजिता सम्पदा शर्मदा
मन्दरमन्दारमालाभिरभ्यर्चिता चर्चिता चन्दनै-
र्विकसितशतपत्रपत्राभनेत्रा पवित्रा विचित्रा ममाद्यत्वविद्या
विभिद्यादवद्यानि सद्यः प्रसद्यादलं भारती भारती ॥ ४

(२९) (शार्दूलविक्रीडित)

एगे जे य रविंदचंदभमरच्छाया परे सामला,
अन्ने निम्मलहेमवण्णतणुणो हंतूण कम्मावलिं ।

अव्वाबाहमणंतमक्खयमहो सोमं सिवं सासयं,
संपत्ता परमं पयं जिणवरा भावेण तेसिं नमो ॥ १

गब्भाहाणदिणाइपंचसु महाकल्लाणएसुं सया,
जेसिं देवविमाणएहि सहसा इंतेहि सव्वादिसिं ।
संरुद्धे गयणंगणे जगमिणं सव्वत्थ सग्गोवमं,
संजायं सुगइं गयाणमणिसं तेसिं जिणाणं नमो ॥ २

मिच्छत्तप्पबलंधयारहरणे जं चंडमाचंडयं,
जं संसारसमुद्दपारगमणे जीवाण जाणोवमं ।
जं मुत्तुं भुवणे वि निव्वुइकरं जीवाण अन्नं न किं,
भावेणं भवनासणं नमह तं सव्वण्णुणो सासणं ॥ ३

धारिंता मुसलासिचक्कपमुहं नाणाउहाणं गणं,
आरूढा अणुरूववाहणगणे गोअस्ससिंहाइए ।
विज्जादेविसमूहओहपरिओ पण्णत्तिपामुक्खओ,
जो सीहो जिणसंघकज्जकरणे मा होउ ढिल्लायरो (?) ॥ ४

(३०) (आर्या)

गब्भावयारजम्मण-निक्खमणे केवले अ निव्वाणे ।
सुरनाहरइअपूअं, तं वंदे जिणवरं सिरसा ॥ १

करुणाए सरणहिअं, उद्धरिअं जेहिं तिहुअणं सयलं ।
भवजलहिंमि पडंतं, अरिहंताणं नमो तेसिं ॥ २

मोहकरिकुंभदलणो, नयभंगपमाणकेसरकलावो ।
तासीयकुमयकुरंगो, सिद्धंतहरि चिरं जयउ ॥ ३

पउममुही पउमकरा, पउमासणसंठिआ पउमनित्ता ।
वरपउमगब्ज(ब्भ?)गोरा, सुअदेवी देउ सुहनाणं ॥ ४

## (३१) (तोटक)

सहसा महसा सहसा महसा, महता परमं महताऽपरमम् ।
शमितस्वमृतं, शमितस्वमृतं, गवि तीर्थकरं गवि तीर्थकरम् ॥१

रुचिरा रुचिरा रुचिराजिघना, जनका जनका जनकामभिदः ।
महिताऽऽमहिता महिता दधता-
मतमाऽऽमतमा मतमाम-रुहाः ॥ २

शमरं शमरं दधतं दधतं, समयं समयं सदयं सदयम् ।
सुपदं सुपदं नुत तं नु ततं, बहुधा बहुधामहितं महितम् ॥ ३

विभया सितया विभयाऽऽसितया, कलिता परदा कलितापरदा।
वरदाऽऽनकरा वरदानकरा, सतिगौरवमा सति गौरव मा ॥४

## (३२) सर्वजिनस्तुतिः

पहुं तित्थनाहं जुगोदारबाहुं,
महामोहवाहं हणंतं अगाहं ।
समुच्छिन्नकामं सयाहिन्नकामं,
परिचत्तवामं नमामि निकामं ॥ (भुजङ्गप्रयात) १

सक्कमासक्कमाणिज्जमाणिक्कमा,
तित्थनाहा महाविक्कमा विक्कमा ।
दिन्नभव्वावलीसंसया संसया,
हुंतु सुखाय मे सव्वया सव्वया ॥ (स्रग्विणी) २

सक्कय मंडलपयंड वियंडजण्णा,
ऽणप्पंधयारपडलीदलणप्पवीणं ।
मायंडमंडलमिव प्पणमामि सालि-
सालं जिणागममहं महसा विशालं ॥ (स्रग्विणी) ३

आरुढा वरकिंकिणीरणज्झणक्कारप्पहाणप्पहा-
पूरद्दारिय तामसुब्भडमहामाणिक्कमालाउला ।
वायुद्धूयधए विमाणरयणे लल्लक्क चक्काउहा
सा वे सुक्खकरा सुहं दिसतु मे सिद्धाइया देवया ॥ (शा.वि.) ४

(३३)

समहिय समहिय समहिय, समहिय समहिय समुज्झियं अरुहा
मयण य मयण य मयण य, मयण य मयण य गयप्पणए ॥१

जणयं जणयं जणयं जणयं, जणयं सुहाण जिणविसरं ।
समहं समहं समहं समहं, समहं समाणंसं वंदे ॥ २

समयं समयं समयं समयं, समयं च नमइ वियरंतं ।
अमयं अमयं अमयं अमयं, अमयं कुणंतमिह ॥ ३

सत्ता सत्ता सत्ता, सत्ता सत्ताण ताण दाणम्मि ।
सुकया सुकया सुकया, सुकया सुकयासणा वाणी ॥ ४

(३४)

सिरिविज्जाणंदपरा सेवंति जणंपि सेविणं जस्स ।
तमहं सधम्मकीत्तिं देविंदणयं थुणामि जिणं ॥ १

सुयधम्मकीत्तिनयमयविज्जाणं देसए सया विसए ।
वंदे विंदेण सुराण वंदिए सव्वजिणचंदे ॥ २

देविंदाइपयं तिणसधम्मकित्तियमिमस्स जो निच्चं ।
झायइ जिणिंदवयणं वरविज्जाणंदपयकरणं ॥ ३

समरह सुयदेविं देहि मोहहरधम्मकित्तियं जीए ।
नामंपि ठाणमागमविज्जाणं देइ सन्नाणं ॥ ४

(३३) (रथोद्धता)

वासवस्तुतपदो महामहा, भक्तदत्तविलसन्महापदः ।
वागुपासितसमस्तमाजिनः, स्वामिनो विदधतो सुखश्रियम् ॥१

(चतुर्शः उच्यते)

पू.आ.श्री सोमतिलकसूरिविरचिता

(३५) (उपजाति)

श्रीतीर्थराजः पदपद्मसेवा-हेवाकिदेवासुरकिन्नरेशः ।
गम्भीरगीस्तारतरा वरेण्य-प्रभावदाता ददतां शिवं वः ॥ १

(चतुर्शः उच्यते)

२७

## ॥ श्रीसीमन्धरजिनस्तुतयः ॥

(१) (शार्दुलविक्रीडित)

कोटाकोट्यतरप्रमाणसमयात् प्राग्जन्मनोऽत्यद्भुतां
श्रीनाभेयविभोर्व्यवस्थितिमिमामाजन्ममोक्षावधि ।
यः प्रत्याययति स्म सम्प्रति नृणां तद्रूपतामाश्रितः
श्रीसीमन्धरसार्वमाश्रयत तं श्रीत्येन्द्रवृन्दस्तुतम् ॥ १

नादे बोधबलौ जिनौ तदितरौ बिन्दौ कलां केऽरुणौ
नीलौ द्वौ शिर ईश्रितौ हरपदे स्वर्णत्विषः षोडश ।
यत्रैवं स्वसवर्णवर्णमयता सिद्ध्यत्यनन्ताऽर्हता-
मप्युच्चैस्तमुपास्महेऽस्तविपदं ह्रीङ्कारमिष्टप्रदम् ॥ २

द्वापञ्चाशदनादिवर्णजनितैर्द्वित्र्यादियोगैर्मितै-
रप्यानन्त्यमितैः सहार्थनिवहाऽऽनन्त्येन यद्व्यानशे ।
लोकालोकमथाप्तमुख्यगणभृद्गुम्फाद्भुवि विश्रुतं
तद् भव्याः श्रयत श्रुतं श्रितहितं मर्त्यामरेन्द्रस्तुतम् ॥ ३

श्वेताब्जस्थाऽरुणाङ्गी स्फुटविकटजटा कोटिहर्यक्षयाना
नानाऽस्त्रालङ्कृताष्टादशविशदभुजा कृष्णवेषाऽहिभूषा ।
नित्यं प्रत्यङ्गिरे त्वं ग्रहविबुधवृताऽनिष्टहन्त्रीष्टकर्त्री
भूत्याः सर्वज्ञसीमन्धरचरणनमस्कारिणां सर्वसिद्ध्यै ॥ ४

(२) (दण्डक)

स्फुरदभिनवभावसम्भूतभक्तिप्रभूतामरेन्द्राऽऽवलि-
स्मेरमाणिक्यकोटीररत्नप्रभाजालविस्मेरिताङ्घ्रि-

कमलयुगरेणुसौरभ्यलुभ्यद्भवारण्यसम्भ्रान्त-
भव्याङ्गिरङ्गद् द्विरेफावलीमण्डलीमण्डलाऽलङ्कृतम् ।
नरसुरशिवशर्मलक्ष्मीलसत्केलिगेहायमानं
प्रमोदास्पदीभूतविश्वत्रयीराजहंसीभिरासेवितं,
विततसुखसमाधिं स्तुवे देवदेवं प्रभोः स्वामि
सीमन्धरस्य प्रभाते प्रभाते पदाब्जद्वयं भक्तितः ॥ १

नवजलदगम्भीरविस्फूर्जदूर्जस्विसद्देशनारम्भ-
संरम्भविद्राविता प्रौढकन्दर्पदोर्दण्डदर्पोर्जिता,
असमशमसुधाम्बुधेर्लोककल्लोलमालाविलासप्रसर्प-
त्प्रभावा(वो ?)द्यता नाशितक्रोधसम्बन्धसर्पोत्कराः ।
दलिततिमिरराजीव जीवेशशोभानिरासक्षमाक्षा-
मधामैकधामाभिरामाननश्रीविलासाश्रिताः,
त्रिभुवनजनवन्द्यपादारविन्दद्वयास्ते जिना मे दिशन्तु ।
श्रियं शाश्वतीं सिद्धिसौधाधिसंवासिनीं सर्वदा ॥ २

कुमतकुलमदोद्धतानेकपानेककुम्भस्थलाद्यातस-
ङ्घातसन्मौक्तिकश्रेणिसंन्यस्तहस्ताग्रपञ्चाननं,
भवभवदुरदुःखदावानलज्वालितानन्तसत्त्वद्रुमौघो-
ल्लसत्पल्लवोल्लासलीलानवाम्भोधरालीनिभम् ।
सुनयनयगभीरमानङ्गरङ्गत्तरङ्गावलीसारविस्तार-
बह्वर्थसद्रत्नराजीविभापूर्णदिग्मण्डलं,
जिनवरवचनं स्तुवे निस्तुषं सद्गणेशैः कृतं बुद्धिमद्भि-
र्धृतं भूरि सूरीश्वरैरीतियुक्तिप्रपञ्चाश्रयम् ॥ ३

विकसितकरपङ्कजामोदलुब्धालिमालारवपूरित-
व्योमविस्तारसारा मुखाम्भोजरोचिर्जितेन्दुप्रभा,
शशशशशशिकरौघकर्पूरपूरोल्लसत्क्षीरनीरे
शऽऽरपिण्डाभदेहद्युतिद्योतितादीशादीसाऽस्तु नः श्रिये ।
विदलितदुरितप्रताना सदा राजहंसाधिरूढा क्वण-
क्वाणवीणाकरा किङ्किणीजालसन्मेखलाभासिता,
विशदतरसुहारयष्टीष्टहृत्कण्ठपीठी रणन्नूपुराङ्घ्रिद्वया
श्रीमती श्वेतवासाञ्चिता भारतीदेवता ॥ ४

(३) (शार्दूलविक्रीडित)

वन्दे पुव्वविदेहभूमिमहिलालंकारहारोपमं,
देवं भत्तिपुरस्सरं जिणवरं सीमंधरं सामियं ।
पाया जस्स जिणेसरस्स भवभीसंदेहसंतासणा,
पोयाभांभवसायरम्मि निविडं ताणं जणाणं सया ॥ १

तीयाणागयवट्टमाणअरिहा सव्वेवि सुक्खावहा,
पाणीणं भवियाण संतु सययं तित्थंकरा ते चिरं ।
जेसिं मेरुगिरिम्मि वासवगणा देवंगनासंगया,
भत्तीये पकुणंति जम्मणमहं सोवन्नकुंभाइहिं ॥ २

निस्सीमामलनाणकाणणघणो संमोहनिन्नासणो,
जो निस्सेसपयत्थसत्थकलणे आइच्चकप्पो फुडो ।
सिद्धंतं भविया सरंत हियडा तं बारसंगीगयं,,
नाणाभेयणयावलिहिकलियं सव्वन्नुणा भासियं ॥ ३

जे तित्थंकरपायपंकजवणासेविक्करोलंबया,
भव्वाणं जिनभत्तयाण अणिसं सोहिज्ज कज्जेरया ।

सम्मद्दिट्ठिसुरावराभरणभा दिप्पन्त देहप्पहा,
ते संघस्स हवन्तु विग्घहरणा कल्लाणसंपायणा ॥ ४

(४) (शार्दूलविक्रीडित)

जो रज्जं परिहत्तु सुव्वयनमीतित्थेसराणांतरे,
दिक्खं गिण्हिय पत्तकेवलमहे बोहेइ भव्वे जणे ।
वंदे पुव्वविदेहवासवसुहासिंगारहारोवमं,
तं सीमंधरसामियं जिनवरं कल्लाणकप्पद्दुमं ॥ १

जुत्तं सट्ठि–सयं विदेहपणगे ऐरावए भारहे,
पत्तेयं पुण पंच सत्तरिसयं एवं अहेसी परा ।
इक्किकम्मि विदेह संपइ पुणो चत्तारि चत्तारि जो,
ते सव्वे अईणागए जिनवरे बद्धंजली वंदिमो ॥ २

जो गंभीरभवंधकूवकुहरुत्तारे करालंबणं,
जो नीसेससमीहियत्थघडणो कप्पद्दुमो पाणिणं ।
मिच्छत्ताइमहंधयारलहरीसंहारसुरुग्गमं,
तं दुद्दंतकुवाइदप्पदलणं वंदे जिणिंदागमं ॥ ३

जा सीमंधरसामिपायकमले सिंगारभिंगी सया,
खुद्दोवद्दवविद्दवम्मि निउणा सव्वस्स संघस्स जा ।
जा अट्ठारसबाहुदंडकलिया सिंहासणे सोहए,
सा कल्लाणपरंपरा दिसउ मे पच्चंगीरादेवया ॥ ४

(५) (भुजङ्गप्रयात)

महीमंडणं पुन्नसुवन्नदेहं, जणाणंदणं केवलनाणगेहं ।
महानंदलच्छीवहूबद्धरायं, सुसेवामि सीमंधरं तित्थरायं ॥ १

पुरा तारगा जे य जीवाण जाया,
भविस्संति जे सव्वभव्वाण ताया ।
तहा संपयं जे जिणा वट्टमाणा,
सुहं दिंतु ते मे तिलोयप्पहाणा ॥ २

दुरुत्तारसंसारकूवारपोयं, कलंकावलीपंकपक्खालतोयं ।
मणोवंछियत्थे सुमंदारकप्पं, जिणिंदागमं वंदिमो समहप्पं ॥३

विकोसे जिणिंदाणणंभोजलीणा, कलारूवलावन्नसोहग्गपीणा ।
वहंतस्स चित्तम्मि णिच्चं पि झाणं,
सुरीभारही देउ मे सुद्धनाणं ॥ ४

(६) (भुजङ्गप्रयात)

महाकेवलणाणकल्लाणवासो, सलावण्णसोवन्नवन्नप्पयासो ।
थुणे सारसिद्धिं पुरिं सत्थवाहं,
सया सामिसीमंधरं तित्थनाहं ॥ १

सुरा किन्नरा जास पायारविंदे, नमंसंति भूयालसेविज्ज वंदे ।
तिलोई जणाणंदसंपुण्णचंदा,
सुहं दिंतु मे सव्वया ते जिणिंदा ॥ २

सया पावसंतीयपीयूषपूरं, तमोरासिनिन्नासउल्लाससूरं ।
गुणापारसंसारकूवारसेउं, जिणिंदागमं वंदिमो सुक्खहेउं ॥ ३

जगन्नाहसीमंधरं पायभत्ता, पवित्ताणरत्ता सुसत्ताण जत्ता ! ।
सुहं सव्व-भव्वाण संपूरिता सा,
सया सेय पत्तिगिरा देविआ सा ॥ ४

(७)

पू.मु.श्री कमलविजयविरचिता

सीमन्धरभूधरबन्धुरसिन्धुरचारी,
सर्वज्ञसुधाकरप्रकरप्रभुताधारी ।
सभयामयवारणनिष्कारणमुपकारी,
जय शासन ! सुस्वरकमलविजय ! जयकारी ॥ १

(चतुर्शः उच्यते)

(८) (शार्दूल.-षट्पदी)

कल्याणैकमयं सुवर्णसदृशं शालत्रयाऽध्यासिनं,
शुद्धं श्रीवृषलाञ्छनं जिनवरं श्रीपुष्कलाधीश्वरम् ।
सत्यक्यास्तनुजं सुबोधजनकं श्रेयांसराज्ञः सुतं,
भव्याऽम्भोरुहभास्करं प्रतिदिनं सद्देशनादायकं ।
सच्चित्ताब्जविकासनैकतरणिं ध्यायं मुनीन्द्रैस्सदा,
श्रीसीमन्धरसज्जिनं सुमनसा संस्तौमि सद्भक्तितः ॥ १

२८

# ॥ श्रीवीसविहरमानजिनस्तुती ॥

(१) (अनुष्टुप्)

विदेहाख्येषु क्षेत्रेषु, पञ्चसु विंशतिर्जिनाः ।
विचरन्तः सदा लोके, वर्त्तन्ते जयकारिणः ॥ १

गजदन्तस्थितान् सर्वान्, भव्यजीवप्रबोधकान् ।
तानहं प्रयतो वन्दे, प्रत्यहं ज्ञानभास्करान् ॥ २

द्वादशाङ्गानि रम्याणि, गणनाथकृतानि ये ।
सेवन्ते परया भक्त्या, लभन्ते ते शिवश्रियम् ॥ ३

चतुर्विंशतिरर्च्येयाः, शासनेशा महर्द्धयः ।
विघ्नविनाशका देव्यः, शं कुर्वन्तु सदा मम ॥ ४

(२) (शार्दूलविक्रीडित)

वंदे सीमंधरं जुगंधरजिणं बाहुं सुबाहुं तहा,
सज्जायं रिसहाणणंतविरियसूरप्पहं ईसरं ।
वीरं वज्जधराइवीरियविसालं चंदबाहुं सयं,
नेमिं देवजसं भुअंगममहाभद्दं च चंदाणणं ॥ १

जंबूदीवमहाविदेहतिलया चत्तारि तित्थंकरा,
अन्ने धाइयखंडमंडणजिणा अट्ठेव जे संथुया ।
तत्तो अट्ठयपुक्खरद्धपहुणो वीसं जिणिंदा इमे,
एवं जे विहरंति संपइ सुहं ते दिंतु अन्नेव मो ॥ २

मिच्छत्तं पणकद्दमंपि विजए सव्वत्थ सो सत्तया,
सव्वंभोरुहकाणणं तमहरालोअम्मि बोहंतया ।
तासं पायकुतित्थभूयनिवहं छायं तया कुग्गहे,
ते निच्चं सियवायवासरमणीपाया पसीयंतु मे ॥ ३

जे संघस्स चऊविहस्स विजये साहज्जकज्जे रया,
ये सम्मत्तसुनिच्चला कलिमलपक्खालनप्पच्चला ।
वेयावच्चकरा सुरा जिणमए कम्मं कुणंताण ते,
अम्हाणं दुरियं हरंतु तुरीयं साहंतु जं चिंतियं ॥ ४

२१

# ॥ श्रीसप्तत्यधिकशतजिनानां स्तुतिः ॥

(१) (शार्दूलविक्रीडित)

ये बन्धूकतमालकुन्दकलिका हेमप्रियङ्गुप्रभा-
श्चञ्चच्चन्द्रमरीचिनिर्मलगुणव्याप्तत्रिलोकोदराः ।
ये पश्यन्ति करस्थितामलकवल्लोकत्रयं सर्वदा,
ते सप्तत्यधिकं शतं जिनवृषा मुष्णन्तु पापानि वः ॥ १

रक्ताऽशोकतरुर्विचित्रसुमनो-वृष्टिः सुदिव्यध्वनिः,
शुभ्रे भास्वरचामरे मणिमयं व्याभाति सिंहासनम् ।
भाश्चक्रं स्वरदुन्दुभिः स्फटिकरुक्छत्रत्रयं राजते,
येषा[न्ते विनयन्तु] वोऽनघगुणाः पाप्मानमाराज्जिनाः ॥ २

यानं मोक्षपुरीप्रयाणकविधौ सेतुर्भवाम्भोनिधे-
र्बीजं बोधिलतोद्गमे च दिनकृद् द्वेषान्धकारे क्षितौ ।
लक्ष्मीवेश्म कुवादिकुञ्जरघटाकण्ठीरवो वोऽनिशं,
सिद्धान्तः सुखहेतुरस्तु जगतामानन्दपात्रं परम् ॥ ३

मुक्ताशङ्खपयोदधीन्दुधवला वाग्देवता बालिका,
[अज्ञानान्धतमो विनोदनचणा धीवैभवोत्पादिका] ।
देव्यः शासनसन्निधाननिरता विद्याधिपाः षोडश,
व्यापत्तिं प्रविदारयन्तु जगतां नः प्रत्यनीकैः सदा ॥ ४

३०

## ।। श्रीशाश्वताऽशाश्वतजिनस्तुतयः ।।

(१) (स्रग्धरा)

यान्यूर्ध्वं मर्त्यलोके भवनपतिगतौ सन्ति चैत्यास्पदानि,
नित्यानित्यानि तेषु प्रतिकृतिनिवहं तीर्थनाथेश्वराणाम् ।
देवेन्द्राणां समूहैः नरगणवृषभैः पूजितं संस्तुतं वा,
भक्त्या नित्यं प्रणौमि त्रिविधविधियुतो भावतो मस्तकेन ।।१

पूर्वं येऽनन्तकाले त्रिदशपतिनता तीर्थनाथा व्यतीता,
विद्यन्ते ये च लोके समवसृतिगता प्रातिहार्यैः समेताः ।
तीर्थाणां ये च नाथा अमरणजनना भाविकाले भवेयुः,
वन्दे तेषां गुणौघान्नमनभरयुतो न्यस्तभूमस्तकोऽहम् ।। २

तीताद्धायां यदासीज्जिनमुनिरुचितं विद्यते साम्प्रतं यत्,
यद्भाव्यं यच्च भावि प्रवचनरचना-प्रेक्षया नित्यमर्थे ।
अङ्गानङ्गप्रविष्टं भवजलधिगतानन्तजन्तुप्रयानं,
वन्द्यं वन्दे मुनीनां सकलगुणनिधिं तीर्थमाद्यं श्रुतं तत् ।। ३

इन्द्राद्या देवलोके सुरगणसहिता ज्योतिषश्चन्द्रताराः,
पाताले ये च सन्ति चमरबलयुता व्यन्तराश्चाष्टभेदाः ।
देवा देव्यः समस्ता जिनवचनरता नित्यदत्तावधानाः,
शान्तिं कुर्वन्तु सङ्घे प्रतिदिनमसकृत् दुःषमायां समायाम् ।।४

(२) (स्रग्धरा)

द्वीपे जम्बाह्वये ये जितमदनबलाः केवलालोकभाजो,
द्वीपे ये च द्वितीये सुखमयविषये पुष्करार्धे तथा ये ।
भावार्हन्तो जयेयुः समवसरणगा धर्मरत्नं दिशन्त-
स्तेभ्यो भूयादजस्रं त्रिकरणविहितो मामकीनः प्रणामः ॥ १

पाताले श्रीविशाले भवनपतिसुधान्धोनिवासान्तराले,
तिर्यग् द्वीपेषु ताराग्रहवनगिरिषु व्यन्तराणां पुरेषु ।
ऊर्ध्वं वैमानिकानां निरुपमगृहगाः स्थापनार्हत्समूहाः,
विद्यन्तेऽनेकधा ये त्रिभुवनतिलकास्तान्नमस्कुर्महेऽत्र ॥ २

कृत्स्नं यत्राऽस्ति वस्तु प्रणिगदितमिदं द्रव्यपर्यायरूपं,
ज्ञानं स्वान्यप्रकाशि प्रदलितसकलाऽऽदीनवाचं प्रमाणम् ।
कर्ता भोक्ता प्रमाता चतसृषु गतिषूत्पत्तिमांश्चित्स्वरूपं,
श्रीसिद्धान्तं नितान्तं जिनपतिगदितं तं भजामः स्मरामः ॥ ३

देवश्रीवर्द्धमानक्रमकमलयुगाऽऽराधनेकाग्रचित्ता,
या देवी दिव्यरूपा करतलविलसच्चक्रचापा विपापा ।
श्रीसर्वज्ञप्रणीतं सुकृतमनुपमं कुर्वतां प्राणभाजां ।
विघ्नव्यूहं समन्ताद्दलयतु नितरामाशु सिद्धायिका सा ॥ ४

(३) (इन्द्रवज्रा)

प्रातः सदा संस्मरणीयनाम-धेयं जिनानां हि चतुष्कमिज्यम् ।
सनातनं देवनराधिनाथैः, संसेव्यमानं समुपासयामि ॥ १

सत्सौरभेयाङ्कितपादपद्मः, संसारविच्छेदकरो जिनेशः ।
जीयाज्जगत्यामृषभाभिधान-श्चन्द्राननेनातिचिरं प्रयुक्तः ॥ २

यस्यापि नामस्मरणेन सद्यो, भव्याः सुखं शाश्वतमग्र्यमेतिः ।
तं वद्र्धमानेन जिनाधिपेन, श्रीवारिषेणेशमहं नमामि ॥ ३

लोकत्रये यानि जिनोत्तमानां, चैत्यानि पूज्यानि हि शाश्वतानि ।
जिनागमोद्भासितसद्गुणानि, वन्देऽहमेतान्यचलानि नित्यम् ॥४

३१

## ।। श्रीपञ्चजिन-तथा-षट्तीर्थ-स्तुतीः

(१) (शार्दूलविक्रीडित)

आद्यं तीर्थकरं नमामि नितरां शत्रुञ्जयेऽष्टापदे,
सम्मेताभिध-शैलराज-शिखरे वन्देऽर्हतां विंशतिम् ।
चम्पायां वसुपूज्यनन्दनमथो नेमिं स्तुवे रैवते,
पापायां पुरि वर्द्धमानममलं देवं नमाम्यन्वहम् ।। १

नृक्षेत्रे मनुजोत्तरेण गिरिणा संवेष्टिते सर्वतोऽ-
तीताऽनागत-वर्तमान-समये संपेदिरे ये जिनाः ।
तेषां सिद्धिमुपेयुषां त्रिजगतां पूज्यत्वमासेदुषां,
भक्त्या पादयुगं नमामि सुभगं सम्यक् त्रिधा सर्वदा ।। २

यत्रोक्तं किल पुण्यपातकफलं सर्वाङ्गिनां ज्ञानिभि-,
र्जीवादीनि विचारितानि नव वै तत्त्वानि सम्यक्तया ।
यं स्वाध्यायरताः पठन्ति मुनयः कर्मक्षयायोद्यताः,
तं ध्यायामि विचारयामि विनुवाम्यञ्चामि जैनागमम् ।। ३

भव्यानां जिनशासने स्थितवतां धर्मं शुचिं कुर्वतां,
ये निघ्नन्ति समग्रविघ्ननिवहान् ध्वान्तानि सूर्या इव ।
ते शक्रप्रमुखाः प्रसादसुमुखाः सम्यग्दृशां सम्मुखा,
वैयावृत्यकरा सुरासुरवराः सङ्घस्य भद्रङ्कराः ।। ४

(२) (इन्द्रवज्रा)

कल्लाणकंदं पढमं जिणिंदं, संतिं तओ नेमिजिणं मुणिंदं ।
पासं पयासं सुगुणिक्कठाणं, भत्तीई वंदे सिरि वद्धमाणं ॥ १

(उपजाति)

अपारसंसार-समुद्दपारं, पत्ता सिवं दिंतु सुइक्कसारं ।
सव्वे जिणिंदा सुरविंदवंदा, कल्लाण-वल्लीण विसाल-कंदा ॥२

निव्वाणमग्गे वरजाणकप्पं, पणासियासेस-कुवाइदप्पं ।
मयं जिणाणं शरणं बुहाणं, नमाणि निच्चं तिजगप्पहाणं ॥ ३

कुंदिंदुगोक्खीरतुसारवन्ना, सरोजहत्था कमले निसन्ना ।
वाएसिरी पुत्थयवग्गहत्था, सुहाय सा अम्ह सया पसत्था ॥४

(३) (शार्दूलविक्रीडित)

श्रीशत्रुञ्जयमुख्यतीर्थतिलकं श्रीनाभिराजाऽङ्गजं,
वन्दे रैवतशैलमौलिमुकुटं श्रीनेमिनाथं तथा ।
तारङ्गेऽप्यजितं जिनं भृगुपुरे श्रीसुव्रतं स्थम्भने,
श्रीपार्श्वं प्रणमामि सत्यनगरे श्रीवद्र्धमानं त्रिधा ॥ १

वन्देऽनुत्तरकल्पतल्पभवने ग्रैवेयकव्यन्तर-
ज्योतिष्कामर-मन्दराद्रिवसतींस्तीर्थंकरानादरात् ।
जम्बूपुष्करधातकीषु रुचके नन्दीश्वरे कुण्डले,
ये चान्येऽपि जिना नमामि सततं तान् कृत्रिमाकृत्रिमान् ॥ २

श्रीमद्वीरजिनस्यपद्महृदतो निर्गम्य तं गौतमं,
गङ्गावर्तनमेत्य या प्रबिभिदे मिथ्यात्ववैताढ्यकम् ।
उत्पत्तिस्थितिसंहृतित्रिपथगा ज्ञानाम्बुदावृद्धिगा,
सा मे कर्ममलं हरत्वविकलं श्रीद्वादशाङ्गी नदी ॥ ३

शक्रश्चन्द्ररविग्रहाश्च धरणब्रह्मेन्द्रशान्त्यम्बिका,
दिक्पालाः सकपर्दिगोमुख-गणिश्चक्रेश्वरी भारती ।
येऽन्ये ज्ञानतपः क्रियाव्रतविधिश्रीतीर्थयात्रादिषु,
श्रीसङ्घस्य तुरा चतुर्विधसुरास्ते सन्तु भद्रङ्कराः ॥ ४

(४) (वसन्ततिलका)

श्रीनाभिनन्दन ! जिनेषु गुरुषु शान्ते,
नेमे गुण-प्रवर-पार्श्वक ! वर्धमान ! ।
श्रान्तिच्छिदामभयदां करता-गमार्हः,
भूयाः प्रभो ! विजयदानगुरौ प्रसन्नः ॥ १

(चतुर्शः उच्यते)

३२

## ॥ श्रीपञ्चकल्याणकस्तुतयः ॥

(१) (इन्द्रवज्रा)

गर्भाऽवतारे जनिषु व्रते च, श्रीकेवले सिद्धिसमागमे च ।
कल्याणके स्वर्गसमानभूमि-स्तं तीर्थपं भावभरेण नौमि ॥ १

नामाऽर्हतः श्रीऋषभेशमुख्यान् द्रव्यार्हतो भूतभविष्यदीशान् ।
सीमन्धराद्यानपि भावदेवान्,
श्रीस्थापनाऽर्हत्प्रतिमाः श्रयेयम् ॥ २

उत्कालिकं कालिकमङ्गरूपं, श्रीदृष्टिवादाऽऽख्यमुरुस्वरूपम् ।
इत्थं श्रुतज्ञानमनेकभेदं, ध्यायामि नित्यं भवभीतिभेदम् ॥ ३

प्रचण्डपञ्चाननचारुयाना, पदे पदे कल्पलता प्रधाना ।
श्रीअम्बिका मन्दिरमेखलेव, प्रीणातु नेत्रे मम मन्दकानाम् ॥४
(उपजाति)

(२) (स्रग्धरा)

नाभेयं सम्भवं तं अजियसुविहियं नंदणं सुव्वयं वा,
सुप्पासं पउम्मनाहं सुमइससिपहं सीयलं वासुपूज्जं ।
सेयंसं धम्मसंतिं विमलअरजिणं मल्लिकुंथुं अणंतं,
नेमिं पासं च वीरं नमि च विनमिमो पञ्चकल्लाणएसुं ॥ १

गब्भाहाणेसु जम्मे वयगहणखणे केवलालोयकाले,
पच्छा निव्वाणठाणे पगमणसमये संथुया भावसारं ।

देवेहिं दाणवेहिं भवणवणसमं किन्नरेहिं नरेहिं,
ते मज्झं दिंतु मुक्खं सयलजिणवरा पञ्चकल्लाणएसुं ॥ २

हेउं तित्थंकराणं जमिह अणुवमं भावतित्थंकरत्ते,
सव्वन्नूणं च पासा अहमवि नियमा जायए सव्वकालं ।
अन्नुन्नुप्पत्तिहेउं नयगमगहणं बीयअंकूररूवं,
अव्वाबाहं जिणाणं जयउ पवयणं पञ्चकल्लाणएसुं ॥ ३

गोरी-गंधारी-काली-नरवर-महिसी-हंससग्गो-रहत्था,
सव्वत्था-माणवी वा वरकमलकरा-रोहिणी संति अम्बा ।
पण्णत्तिच्छुत्ति-पोम्मा-धणुससरसया-खित्तगेहाइवासा,
संतिं संघे कुणंतु गहगणसहिया पञ्चकल्लाणएसुं ॥ ४

(३)

तित्थेसराण रिसहेसरमाइयाणं,
वीरंतियाण गयकम्ममलाण ताणं ।
कल्लाणए चवणजम्मणदिक्खनाण-,
निव्वाणए नियय-बीययहे महेमि ॥ (वसन्ततिलका) १

चवणजणणदिक्खा-नाणनिव्वाण-कल्ला-,
णग-पणगमहेणं दिन्नतेलुक्क-सुक्खा ।
सयलजिणवरिंदा णागयातीय-भंगा,
भरहपमुह-भूमीभूसणा दिन्तु सुक्खं ॥ (मालिनी) २

सिद्धानेहुज्जलतरसिहो कम्मवट्टिं दहन्तो,
हिंसाधूमं चयइ सुथिरो जोइसंमत्तपत्ते ।

उज्जोअंतो भुवणभवणे जीवमाइपयत्थे,
सो कल्लाणं जिणपभणिओ देउ सिद्धंत-दीवो ॥(मन्दाक्रान्ता)३

कल्लाणाणं निहाणे जिण-कम-कमले सायरं सेवमाणा,
जे सम्मत्ते पवित्तीनियमणनियत्ता सुट्ठु सड्ढां च पत्ता ।
संघे च्छिन्नाघसंधा वर-विणयपरा धम्मकम्मे रयाणं,
अम्हं पच्चूहवूहावहरणपवणा हुंतु ते देवदेवा ॥ (स्रग्धरा) ४

## ३३

# ॥ श्रीसिद्धचक्रस्तुतयः ॥

(१) (स्रग्धरा)

अर्हन् मूलं प्रकाण्डोऽतनुनिकरधरः सूरिराजश्च शाखा,
गुल्मः सद्वाचकेशो दलततिपरिधिः साधवो मञ्जरीवत् ।
पुष्पौघो दर्शनं चाऽभिमतपरिमलश्चारुचारित्ररूपः,
शस्तं सस्यं तपश्चाऽमरतरुरिव वः सिद्धचक्रं पुनातु ॥ १

आप्ताः सिद्धा मुनीन्द्राः प्रवरमुनिवराः वाचकाः साधवश्च,
श्वेता रक्ताश्च पीता बुधसमहरिताः कज्जलाभा जिनेशाः ।
चञ्चत्पुष्पाग्रपत्रच्छवि-कनकरजः-पर्णरोलम्बमाना,
गीर्वाणा गा इवेष्टं सकलमतिमता पावनं संदिशन्तु ॥ २

सा वाणी गूहनेत्राद्विघनपरिमिताः कर्मनिर्मूलकाना-
माचार्याणां रसत्रिर्नव नवमुनयो वाचकानां मुनीनाम् ।
विंशत्या सप्तयुक्ता मुनिकृतिसहिता नेत्रसङ्ख्या चतुर्णां,
षष्ठेराब्धिस्वशक्तिर्गगनशरमिताः सद्गुणौघा जयन्ति ॥ ३

देवेन्द्रा अष्टवर्गा ग्रहगणसहिता गोमुखाद्याः परेऽपि,
चक्रेश्वर्यादिदेव्योऽपि च कुशलकराः सिद्धचक्रस्य भक्ताः ।
श्रीश्रीपालादिकानामिव सुषमभृतां प्राणिनां भक्तिभाजां,
शं स्वर्वृक्षं दिशन्तु प्रशमसुखफलं मुक्तिसौभाग्यबीजम् ॥ ४

(२) (स्रग्धरा)

ज्ञात्वा प्रश्नं तदर्थं गणधरमनसं प्राग् वदेद् वीरदेवः,
अर्हत्सिद्धार्यसाधुप्रभृतिनवपदान् सिद्धचक्रस्वरूपान् ।
ये भव्याः श्रद्धयाढ्याः प्रतिदिनमधिकं सञ्जपन्ते स्वभक्त्या,
ते स्युः श्रीपालवच्च क्षितिवरपतयः सिद्धचक्रप्रसादात् ॥ १

दुस्तीर्णं निस्तरीतुं भवजलनिधिकं पाणियुग्मे गृहीत्वा,
यानेकान् कोटिकुम्भान् कनकमणिमयान् षष्ठिलक्षाभियुक्तान् ।
गङ्गासिन्धुहृदानां जलनिधितटतस्तीर्थतोयेन भृत्वा,
तत्सर्वाधीश्वराणां सुरपतिनिकरा जन्मकृत्यं प्रचक्रुः ॥ २

कुर्युर्देवास्त्रिवप्रं रजतमणिमयं स्वर्णकान्त्याऽभिरामे,
स्थित्वा स्थाने सुवाक्यं जिनवरपतयः प्रावदन् यां च नित्यम् ।
तां वाचां कर्णकूपे सुनिपुणमतयः श्रद्धया ये पिबन्ति,
ते भव्याः शैवमार्गागमविधिकुशला मोक्षमाशु प्रयान्ति ॥ ३

देवी चक्रेश्वरी स्रग्दधति च हृदये पत्तने देवकाख्ये,
कामे मोदाभिकीर्णे विमलपदयुते सिद्धचक्रस्य बीजे ।
श्रीमद्धर्षादियुक्तैर्विजयप्रभवरैर्वर्यरूपैर्मुनीन्द्रैः,
स्तुत्या नित्यं सुलक्ष्मीविजयपदधृतैः प्रेमपूर्णैः प्रसन्ना ॥ ४

पण्डितलक्ष्मीविमलगणिगुम्फिता

(३) (स्रग्धरा)

श्रीवीरो राजगेहे किल समवसृतौ धर्मवार्त्ताभिधायै,
तं नन्तुं श्रेणिराजः सपरिकर इतस्तेन तस्याग्र उक्तम् ।
माहात्म्यं सैद्धचक्रं त्रिभुवनविततं ध्वस्तसंसारकृच्छ्रं
सश्रीपालप्रबन्धं प्रभवत भविकाः सेवितुं तन्निशम्य ॥ १

अर्हद्रूपं विचालेऽनुपमगुणमयं सिद्धगच्छाधिनाथो-
पाध्यायाऽपस्त्यबिम्बं हृदयसलिलजे पण्डितैर्न्यस्यनीयम् ।
सम्यक्त्वं ज्ञानवाचंयमचरणतपो दिक्षु पश्चाद्विदिक्षु
ॐ ह्रींभाजोऽक्षमाला गणयत सुधियो विंशतिं तन्नवानाम् ॥२

आचाम्लानां विधेयं दितदुरिततपो दग्धसंसारमूल-
माश्वीने मासि चैत्रे प्रतिदिवसमसौ सादरं जैनसारः ।
श्रोतव्यश्चागमाब्धिः स्वहितमुनिमुखात् सिद्धचेक्राविशिष्टे
तत्र प्रोक्ता-क्रिया या भवचयनिचितं
ध्वंसयेत् सा च कर्म ॥ ३

सम्पूर्णेऽस्मिन्नविघ्ने तपसि भवभिदाचन्द्रहासोपमाने
दीर्घं सूद्यापनं ये विदधति मुदिताः सिद्धचक्रार्चिनो हि ।
हंसारूढो विधत्ते विमलसुरपतिर्व्याप्तकीर्त्तिश्च तेषां
देवी चक्रेश्वरी त्वं कुरु गुरुमुदयं साधुलक्ष्मीप्सुकानाम् ॥ ४

(४) (मालिनी)

विपुलकुशलमाला-केलिगेहं विशाला-
ऽसमविभवनिधानं, शुद्धमन्त्रप्रधानम् ।
सुरनरपतिसेव्यं, दिव्यमाहात्म्यभव्यं,
निहतदुरितचक्रं, संस्तुवे सिद्धचक्रम् ॥ १

दमितकरणवाहं, भावतो यः कृताहं-
कृतिनिकृतिविनाशं, पूरिताङ्गिव्रजाशम् ।
नमितजिनसमाजं, सिद्धचक्रादिबीजं,
भजति सगुणराजिः सोऽनिशं सौख्यराजिः ॥ २

विविधसुकृतशाखो, भङ्गपत्रौघशाली,
नयकुसुममनोज्ञः, प्रौढसम्पत्फलाली ।
हरतु विनुवतां श्री-सिद्धचक्रं जनानां,
तरुरिव भवतापा-नागमः श्रीजिनानाम् ॥ ३

जिनपतिपदसेवा-सावधाना धुनाना-
दुरितरिपुकदम्बं, कान्तकान्तिं दधानाः ।
ददतु तपसि पुंसां, सिद्धचक्रस्य नव्यं,
प्रमदमिह रतानां, रोहिणीमुख्यदेव्यः ॥ ४

(५) (अनुष्टुप्)

अरा इव विराजन्ते, नव यत्र पदान्यलम् ।
कर्मवैरिभिदे चक्रं, सिद्धचक्रं नमाम्यहम् ॥ १

सिद्धचक्रं समाराध्य, प्राप्ता ये पदमव्ययम् ।
अद्भुतां पदवीं प्राप्य, ते जिनाः सन्तु वः श्रिये ॥ २

माहात्म्यं सिद्धचक्रस्य, पवित्रं यत्र वर्णितम् ।
चिरं नन्दतु मेदिन्या-मागमः स सुखागमः ॥ ३

श्रीमद्सिद्धचक्रमन्त्राऽ-धिष्ठाता सुरपुङ्गवः ।
शान्तिं करोतु तुष्टिं च, सिद्धचक्रैकचेतसाम् ॥ ४

(६) (अनुष्टुप्)

अर्हदादीनि शुद्धानि, पदानि नवसङ्ख्यया ।
समृद्धिं वृद्धिं यच्छन्तु, सिद्धचक्रतपोजुषाम् ॥ १

भूतभाविभवत्सार्वाः, सर्वे सत्केवलोज्ज्वलाः ।
सिद्धचक्रतपोनिष्ठा-न्नयन्तून्नतिमङ्गिनः ॥ २

द्वादशाङ्गमयं सम्यक्, श्रुतज्ञानं नयाकुलम् ।
ज्ञानश्रद्धास्तनोतु वै, सिद्धचक्रोद्यतान्नरान् ॥ ३

द्वादशाङ्ग्या अधिष्ठातृ - देवी दिव्याश्रियाश्रिता ।
अविघ्नं कुरुतां पुंसां, सिद्धचक्रतपस्क्रियाम् ॥ ४

(७) (वसन्ततिलका)

भव्या भजध्वमनिशं वरवाञ्छितार्थ -
सम्पूरकं त्रिभुवने च विभासमानम् ।
पूज्यं हि पञ्चमगतिप्रणिदानदक्षं,
विख्यातमेतदमलं खलु सिद्धचक्रम् ॥ १

पूज्यार्हतादिनवसत्पदशोभमानं,
संसेव्य शुद्धमनसाऽग्रियसिद्धचक्रम् ।
निर्धूय कोटिभवदुस्सहकिल्बिषौघं,
भव्याः समापुरतुलं शिवलक्ष्मीवासम् ॥ २

चैत्रे तथैव च पवित्रतरे हि मासे,
मासोत्तमे च समिषे खलु शुद्धपक्षे ।
सत्सप्तमीदिवसतो भविकाश्च कुर्यु-
रारभ्य भक्तिसहिता नव चाम्लकानि ॥ ३

धर्मक्रियां तदुचितां च जिनागमोक्तां,
कुर्वन्नरोऽखिलमुपेत्य सुखं सदात्र ।
श्रीपालभूपतिरिव स्मरणीयनाम-
धेयः परत्र समुपैत्यचलं हि वासम् ॥ ४

## ॥ प्रथमपदस्तुतिः ॥

(८) (इन्द्रवज्रा)

आद्ये पदे मध्यतरे पवित्रे, सुश्वेतवर्णेन विभासमानम् ।
अर्हन्तदेवं स्वगुणैर्हि युक्तं, वन्देऽहमेनं शरदिन्दुकान्तम् ॥ १

सिंहासने स्वर्णमये विचित्रे, वाणीगुणैश्चातिशयैः प्रधानम् ।
विभ्राजमानं खलु प्रातिहार्यैः - स्तोमैश्च वन्दे तमनन्तपूज्यम् ॥२

धर्मं चतुर्भिस्तु मुखैर्दिशन्तं, दानादिभेदं भविनां जनानाम् ।
गोष्ठीषु धर्मप्रभवासु नित्य-मीडेऽहमर्हन्तविभुं परेशम् ॥ ३

सेवेऽचलध्यानपवित्रितात्मा, सद्भावनाभावितचित्तवृत्तिः ।
श्रीपालभूपेन्द्र इव प्रयुक्तो-ऽर्हन्तप्रभुं ह्याद्यपदावलग्नम् ॥ ४

## ॥ द्वितीयपदस्तुतिः ॥

(९) (भुजङ्गप्रयात)

द्वितीये पदे पूर्वदिग्दीप्यमाने, सुरक्तप्रभाभासिताशान्तभागे ।
गरिष्ठैर्गुणैश्चाष्टसङ्ख्यैः समेतान्,
महानन्दयुक्तान् स्तुवे सिद्धदेवान् ॥ १

समस्तोद्धर्वलोकोच्चभागे पवित्रे, शुभे शाश्वते निर्विकारे विचित्रे।
निहत्याष्टकर्मारिवर्गोपसर्गं, सदा सङ्गतान् सिद्धदेवान् नमामि॥२

विशुद्धात्मविज्ञानविज्ञातविश्व-जगज्जन्तुशुद्धाविशुद्धात्मभावाः ।
सदा सिद्धिसीमन्तिनीसङ्गलुब्धा,
जयन्त्यात्मसन्दर्शनाः सिद्धनाथाः ॥ ३

जना ये स्तुवन्ति प्रपन्नात्मलाभान्,
विशुद्धात्मबुद्ध्या मुदा सिद्धनाथान् ।

लभन्तेऽचलं मुक्तिवासे निवासं,
सदा ते ह्यवर्ण्योपमानोपयुक्तम् ॥ ४

## ॥ तृतीयपदस्तुतिः ॥

(१०) (इन्द्रवज्रा)

श्रीसिद्धचक्रस्य पदे तृतीये, सन्तिष्ठमाना हि सुवर्णवर्णे ।
भट्टारका भव्यकदम्बकार्च्या, नित्यं जयन्त्वात्मपदार्थपूर्णाः ॥१

शुद्धैर्गुणैः शारदचन्द्रज्योत्स्ना-तुल्यैस्तु त्रिंशद्भिरनुत्तमैश्च ।
षड्भिः समं गच्छधुरं वहन्तः,
संशोभमानाः खलु दक्षिणस्याम् ॥ (यु.) २

भव्या भवाम्भोधिभयत्रसन्तो, यस्याङ्घ्रियुग्मं शरणं प्रपद्य ।
शीघ्रं लभन्ते भवसिन्धुपारं,
भट्टारकांस्तान् प्रणतोऽस्मि भक्त्या ॥ ३

तीर्थाधिनाथाभिहितं सभायां, सन्दर्शयन्तो द्विविधं हि धर्मम् ।
ये बोधयन्ति भविकानहं ता-नीडे सदाचार्यपदोपपन्नान् ॥ ४

## ॥ चतुर्थपदस्तुतिः ॥

(११) (वैतालीय)

यमुपेत्य मुदा धृतव्रता, मुनयो मानमलापवर्जिताः ।
निपठन्त्यखिलं जिनागमं, तमुपाध्यायमहं सदा स्तुवे ॥ १

निवसन्तमहं चतुर्थके, जगदुद्योतकरे हि पश्चिमे ।
दिशि नीलसुवर्णवर्णके, सुपदे सिद्धपदस्य निर्मले ॥ २

स्वगुणैर्विमलैस्तु पञ्चविं-शतिभिर्युक्तमनारतं भजे ।
सुरमानववृन्दवर्णनी-यमुपाध्यायगुरुं भवापहम् ॥ (यु.) ३

अचलं हि क्रियातपोगुणैः, श्रुतरत्नाकरपारगामिनम् ।
भविजीवसमूहसेवितं, सदुपाध्यायगणं नमाम्यहम् ॥ ४

## ॥ पञ्चमपदस्तुतिः ॥

(१२) (अनुष्टुप्)

पदे श्रीसिद्धचक्रस्य, पञ्चमे श्यामवर्णके ।
दिशायामुत्तरस्यां हि, वसन्तं साधुमण्डलम् ॥ १

सप्तविंशतिसद्गुणैः, शोभमानं निरन्तरम् ।
वन्दे वन्द्यपदद्वन्द्वं, निर्मलाचारधारकम् ॥ २

कषायगणजेतारं, मुक्तिमार्गप्रदर्शकम् ।
निरतिचारचारित्र-पालकं भविनां सदा ॥ (त्रिभि.)३

आगमाम्बुनिधेर्लब्ध्वा, सारं श्रेष्ठसुधारसम् ।
जयत्यनल्पसंमोद-पूर्णः साधुकदम्बकः ॥ ४

## ॥ षष्ठपदस्तुतिः ॥

(१३) (इन्द्रवज्रा)

श्रीसिद्धचक्रस्य मनोभिरामं, षष्ठं पदं दर्शननामधेयम् ।
लोकत्रये देवनरेन्द्रपूज्यं, सदात्यभीष्टार्थसुदानहेतुम् ॥ १

युक्तं विशुद्धैर्हि गुणैस्तु सप्त-षष्टिभिरत्युज्ज्वलवर्णवर्ण्यम् ।
नैर्ऋत्यदिग्भागविभूषयन्तं, योगत्रयैः पूततरैश्च वन्दे ॥ २

चक्रं जनाः सम्परिपूजयन्ति, पञ्चामृतेनाप्लवनं विधाय ।
मनोहरैश्चन्दनपुष्पधूप-फलप्रदीपादिभिरन्वहं ये ॥ ३

निर्धूय पूर्वार्जितपातकानि, श्रीपालभूपालवदिष्टलाभम् ।
अमुत्र संलभ्य परत्र मुक्ति-वासं लभन्तेऽचलमक्षयं ते ॥ ४

## ॥ सप्तमपदस्तुतिः ॥

(१४) (इन्द्रवज्रा)

लोके पदैरप्रतिमैः पवित्रैः, सर्वार्थसम्पादनकामकुम्भैः ।
सन्दीप्यमानं नवभिश्च पूज्यैः श्रीसिद्धचक्रं प्रणमामि भक्त्या ॥१

ज्ञानं पदं सप्तममग्र्यमेकं, मत्यादिपञ्चप्रवरप्रकारम् ।
अज्ञानध्वान्तार्ककरोपमान-माग्न्येयदिग्भागविभासमानम् ॥ २

कल्याणसन्मन्दिररूपमेक -पञ्चाशदुत्कृष्टगुणौघरम्यम् ।
कर्माष्टविध्वंसकरं मनोज्ञ-मीडे सदा देवनरेशवन्द्यम् ॥(यु.)३

तीर्थाधिनाथैरपि वर्ण्यमानं, ज्ञानं गणाधीशनिषेव्यमानम् ।
भूयात्सदा नः परमात्ममुक्ति-सत्साधनं शान्तरसोपपन्नम् ॥ ४

## ॥ अष्टमपदस्तुतिः ॥

(१५) (अनुष्टुप्)

विश्वे श्रीसिद्धचक्रस्य, चारित्राख्यं पदं शुभम् ।
वायव्ये दिग्विभागे हि, प्रोद्यत्सुश्वेतवर्णकम् ॥ १

अष्टमं जयति नित्यं, जनताघविनाशकम् ।
सप्तदशगुणैर्युक्तं, मुक्तिमार्गप्रदर्शकम् ॥ (यु.) २

कषायवनदावाग्नि-तुल्यरूपधरं पदम् ।
विश्ववन्द्यतरं नित्यं, मुनिवृन्दोपसेवितम् ॥ ३

भवाम्भोनिधिभीतस्य, भयविध्वंसकारकम् ।
ददातु निर्भयं स्थान-मचलं शान्तिदं मम ॥ ४

## ॥ नवमपदस्तुतिः ॥

(१६) (वसन्ततिलका)

पुण्यातिचारुवनवर्द्धनवारिवाह-
तुल्यं सुरासुरनराधिपसेव्यमानम् ।
ईड्यं तपःपदमनन्तजनोपकारं,
भूयाद्भवातिभयतापविनाशहेतुः ॥ १

सम्पूर्णशारदनिशाकरकान्तिकान्तं,
नित्यं ह्यनेकसुगुणैरमलैः प्रयुक्तम् ।
ईशानदिग्गतमनन्तभवोपबद्ध-
कर्मौघहं परमभीष्टकरं जनानाम् ॥ २

सन्त्यज्य भव्यपुरुषाः परमात्ममुक्त्यै,
संसारकार्यनिकरान् जनतार्तिहेतून् ।
पूज्यं पदं वरतपो नवमं पवित्रं,
सेवध्वमेकमनिवार्यमहाप्रभावम् ॥ (यु.) ३

संसेव्य यन्निखिलपापहरं त्रिशुद्ध्या,
तीर्थङ्करादिपुरुषा विधिना त्रिकालम् ।
संलेभिरे शिवसुखं तदहं ह्यवर्ण्यं,
सेवे सदैव परमात्मपदोपलब्ध्यै ॥ ४

(१७)

पू.मु.श्री कमलविजयविरचिता

जगतीजनजीव ! सिद्धचक्र ! कमनीय-
प्रवचन ! जिनपुङ्गवसिद्धचक्रगणनीय ! ।

जय सूरिपुरन्दरवाचकमुनिमहनीय !,
दर्शनत्रिक ! तपसा कमलविजयभजनीय ! ॥ १

(चतुर्शः उच्यते)

(१८) (वसन्ततिलका)

पूज्यं सदा नवपदावलिमण्डलेन,
सन्दीप्यमानमखिलार्तिविनाशदक्षम् ।
लोकत्रयार्च्यतरसद्गुणशोभमानं,
वन्देऽहमेतदमलं शुभसिद्धचक्रम् ॥ १

(१९) (उपजाति)

जे भत्तिजुत्ता जिणसिद्धसूरि-ओज्झायसाहूण कमे नमंति ।
सुदंसणन्नाणतवोचरित्तं, पूअंतु पावेह सुहं अणंतं ॥ १

नामाइभेएण जिणिंदचंदा, निच्चं नया जेसि सुरिंदविंदा ।
ते सिद्धचक्कस्स तवे रयाणं, कुणंतु भव्वाण पसत्थनाणं ॥ २

जो अत्थओ वीरजिणेण पुव्विं, पच्छा गणिंदेहिं सुभासिओ अ।
एयस्स आराहणतप्पराणं, सो आगमो सिद्धिसुहं कुणेउ ॥ ३

सव्वत्थ सव्वे विमलप्पदाई, देवा तहा सासणदेवयाओ ।
जे सिद्धचक्कम्मि सया विभत्ता, पूरेउ भव्वाण मणोरहं ते ॥ ४

(२०) (उपजातिः)

जणावलिवंछिअ-कप्पसालं, दुक्खापहे धम्म-नरिंद सालं ।
अपारपावावलिवल्लिचक्कं, भावेण वंदे सिरिसिद्धचक्कं ॥ १

मुणींदसुचित्तचकोरचंदा, सुवन्नदेवा हयमोह-नंदा ।
नमंत देवा सुरविंदराया करंतु सुक्खं मह वीअराया ॥ २

विणिज्जिआणंतपवाइमाणा, संसारसंताव-जलायमाणा ।
मुणिंद-वीरस्स सुहासमाणा, वाणीवरा नंदतु रायमाणा ॥ ३

सुसेवगोवद्दववारयाओ, सव्वा सया सासणदेवयाओ ।
कुणंतु लच्छी सिरिसिद्धचक्कं, आराहयत्ताण नराणमिक्कं ॥ ४

(२१) (आर्यागीति)

जिणसिद्धसूरिउवज्झाय, साहुसम्मत्तनाणचरणतवं ।
ईय नवपएहिं सिद्धं, नमामि सिरिसिद्धचक्कमहं ॥ १

जे सिद्धचक्कमाराहिऊण, संपन्नकेवलालोआ ।
संपत्ता परमपयं, तित्थयरा ते सुहं दिंतु ॥ २

आरुग्गतुट्ठिदीहाऊ-अत्तहेउस्स सिद्धचक्कस्स ।
महिमा जहिं वन्निज्जइ, पणमह तं वीरसिद्धंतं ॥ ३

सिरिसिद्धचक्कमाराहगाण, भविआण भत्तिजुत्ताणं ।
सम्मद्दिट्ठिदेवा, सव्वेवि कुणंतु कल्लाणं ॥ ४

(२२) (मालिनी)

अरिहंत-नवपएहिं वंदिय दिव्वलच्छीं,
च्छुरित-सुकयलक्खं देवदेवीसपक्खं ।
भुवनजयपडायं तित्थरायाणुणेयं,
हियकमलधेयं सिद्धचक्कं महेयं ॥ १

सयतिसयगरिट्ठा सिद्धचक्कं पइट्ठा,
निवसिरिपालाराहिया भावपुव्वं ।
दिसउ भविआणं मेरुसेलाभिसित्ता,
तिअसवइ - गणेहिं तित्थसिहासु सोहं ॥ २

जिणगणहरवुत्तं सुत्तअत्थप्पवित्थं,
वियलियगणचक्कं बोहयंतं सचक्कं ।
हयतमतिमिराहं सिद्धचक्कप्परोहं,
पदिसउ सुविहाणं भाणुदिप्पंतनाणं ॥ ३

नयजिणपय-सम्मदिट्ठिणो नट्ठ-रिट्ठा,
विमलपह-पहाणा लोयरक्खा सपाणा ।
बलरिउ-जय-चक्के सिद्धचक्के रयाणं,
परमसुह-निहाणं बोहिलाहं सि दिंतु ॥ ४

(२३)

भत्तिजुत्ताण सत्ताण मणकामणा-पूरणे कप्पतरुकामधेणूवमं ।
दुक्खदोहग्गदारिद्दनिन्नासयं, सिद्धचक्कं सया संथुणे सासयं ॥१

तिजगजणसंथुअपायपंकेरुहं, हेमरुप्पंजणासोगनीलप्पहं ।
सिद्धचक्कं थुणंताण कयनिव्वुइं, सव्वतित्थंकरा दिंतु नाणुन्नइं॥२

जत्थ जिणसिद्धतह सूरिवायग जइ,
दंसणं, नामचरणं तवं नवपइ ।
सिद्धचक्कस्स वण्णिज्जए तं सया,
नमह सिरिवीरसिद्धंतमाणंदिआ ॥ ३

जक्खिणी जक्खगहवीरदिसिपालया,
जयविजय जंभिणीपमुहवरदेवया ।
दिंतु रुद्दाण खुद्दाण निन्नासगं, सिद्धचक्कं महंताणं कल्लाणगं ॥४

(२४)

अरिहाणं सिद्धाणं, आयरिय-उवज्झाय-साहु-नाणाणं ।
दंसण-चरित्त-तवाणं, नमोत्थु मे सिद्धचक्काणं ॥ १

रिसहजिणवद्धमाणय, चंदाणण–वारिसेण–नामिहिं ।
सग्गे तिरिअ–पायाले, सासयदेवे तहा वंदे ॥ २

एगारस अंगगयं, पुव्वगयं तह उवंग सुअनाणं ।
मइ–सुअ–मणोहिकेवल–नाणं पणमामि भत्तीए ॥ ३

सुर–जोइ–वण–भवण–जिणाण भत्ता य जक्ख–जक्खिणिउ ।
उउवाराहणसंघे, हरंतु दुरिआइं सव्वाइं ॥ ४

(२५)

सयल–मंगलवल्ली–वसंतागमं,
भुवणजण–नयण–आणंद–चंदोपमं ।
पबल–मिच्छत्तसंमोह–निन्नासयं,
सिद्धचक्कं सया वंदिमो सासयं ॥ १

विमल–वरकेवलनाण–लच्छीवरा,
भुवण–भव्वाण सव्वाण संसयहरा ।
दिंतु सम्माणिम्माणि भूरंजणा,
सिद्धचक्कं कुणंताण सव्वे जिणा ॥ २

हियय–अन्नाणतमतिमिर–निन्नासणो,
अमलजणकमलवणखंड–उल्लासणो ।
सुद्धसिद्धंत - विलसंत–पज्जोयणो,
सिद्धचक्कं धरंताण उज्जोयणो ॥ ३

विमलसुरचारु–चक्केसरी–देवया–
पमुहा सव्वेवि जिणसासणे सेवया ।
सम्मदिट्ठी–सुरा सव्वसेवाकरा,
सिद्धचक्कं भयंताण भद्दंकरा ॥ ४

(२६)

सिरि–सुक्खसोहग्गसोहानिहाणं,
महंतारिहंताइ–नवपयपहाणं ।
सुभव्वाण निव्वाण–पहसत्थवाहं,
नमंसामि सिरि–सिद्धचक्कं सयाहं ॥ १

अणाबाहमाहप्पसोहापवन्ना,
सुवन्नाऽलिनीलीजपारूप्पवन्ना ।
कुणंताण तं सिद्धचक्कं महंतं,
सुहं दिंतु सव्वेरिहंता अणंतं ॥ २

जिणिंदेहिं संदेसिअं सुद्धरूवं,
सिवं सिद्धचक्कस्स जस्सिं सरूवं ।
स सव्वापवन्नाण अन्नाणनासं,
दिसउ आगमो एस निव्वाणवासं ॥ ३

अहिठायगा सिद्धचक्कस्स जक्खा,
तहा जक्खिणी संघरक्खा सुदक्खा ।
पसीअंतु मे सव्वहा सावहाणा,
चक्केसरीओ विमलाभिहाणा ॥ ४

(२७)

सयल–सुक्खाण लक्खाण वक्खाणयं,
बहुयभवपाव–संतावविनिवारणं ।
भविअमण–नयणघण–जणिय–आणंदणं,
नमह सिरि–सिद्धचक्कं जणे अणुदिणं ॥ १

भमर जिम अमर-नमिय-पयपंकयं,
पंचवन्नाहि कंताहि समलंकियं ।
सिद्धचक्कं थुणंताण मणवंछियं,
दिंतु सव्वे जिणा विविह-सुहसंपयं ॥ २

अम्मि जिणगुरुय-गणधारगवन्निया,
सिद्धचक्कस्स नवपयह बहुमन्निया ।
सोय नीय-लोयकमलदल-बोहंकरो,
होउ जयवंत सिद्धंत-नव-दिणयरो ॥ ३

विमलविमलाइ-सुरजक्खजक्खिणी सया,
सिद्धचक्कस्स पयस्स सवि सेवया ।
दुग्ग-उवसग्ग-वग्ग-निन्नासणं,
दिंतु सोहंतु सिरिवीरजिणसासणं ॥ ४

३४

# ॥ श्रीगौतमगणधरस्तुतयः ॥

पू.पं.श्री गुणसागरगणिविरचिता

(१) (रथोद्धता)

गोतमान्वयपवित्रगौतमः, सप्तहस्ततनुकः स सिद्धये ।
अस्तु सत्समचतुरस्रसंस्थितः, केवलाय समभूद् विषादकः ॥१

तीर्थकृत्ततिरियं भवे भवे, दुःखकूपनिपतज्जनान् भवेत् ।
पालनाय यतनापरायणा,
कर्मशत्रुसुपुटी(री?)कृतोद्धुरा(ताऽक्षरा?) ॥ २

नैगमादिनयसंयुतागम-स्तीर्थकृद्वदनभाषणाग्रिमः ।
अन्यतीर्थिकमनश्चमत्कृतिः, शङ्करः सकलजन्मिनोऽस्तु वः ॥३

अम्बिकाऽभिधगरिष्ठदेविका, बिभ्रती श्रवणयोः सुकुण्डले ।
स्तूयमानगुणमण्डला(ली?)जनै-
र्विघ्नघातजनकाऽस्तु सन्ततम् ॥ ४

पू.पं.श्री गुणसागरगणिविरचिता

(२) (भुजङ्गप्रयात)

यदीयं प्रभाते स्फुरन्नामधेयं,
गृहीत्वा ययुर्जन्मिनः कोटिसङ्ख्याः ।
शिवं यान्ति यास्यन्ति कुर्यात् कलानां,
कलापं कुकर्मारिभिद् गौतमो मे ॥ १

जगन्नाथपङ्क्तिः सुमुक्तिर्विमुक्तिः,
सशक्तिः सयुक्तिः सुभक्तिः सुभुक्तिः ।

प्रकामागता माहतामाविरामा,
यतीनां ततीनां रतीनां हृतीनाम् ॥ २

गुणैः शुद्धसिद्धान्त सिद्धान्त ऊर्ध्वान्तकृत्,
सदाभावतां सम्मतां दीयतां पोषिताम् ।
दूरत्यन्तकष्टेन शिष्टेन लष्टेन वा,
स्फुरद्वर्णपूर्णैः सकर्णैः सकर्णैः श्रितः ॥ ३

गलद्भारतीपीनपीयूषतुल्या,
यदीया रणत्कारकारिक्रमाब्जा ।
महामूल्यसन्नूपुराभ्यां नवाभ्यां,
सुखायाऽस्तु देवी सतां जन्मभाजाम् ॥ ४

पू.मु.श्री रविसागरविरचिता

(३) (वसन्ततिलका)

श्रीइन्द्रभूतिगणभृद् गणभृच्छुभानां,
भानां भजद्धविजनो विजनोऽपकण्ठः ।
कण्ठप्रियाभरणकैरणकैर्न शस्त-
शस्तश्रितैः सविबुधैर्विबुधैर्मुदे वः ॥ १

देवप्रभोर्विनमतो नमतोषदान-
दानस्फुरद्द्विपवतो पवतोऽघकृत्यात् ।
कृत्याद्धविष्टहृदयो हृदयोदयस्तं,
यस्तन्त्रमास निकरो निकरो जिनानाम् ॥ २

नानाङ्गवर्णरुचिरा रुचिराजमाना,
मानान्विता सुरपतेरपतेजसो न ।

सो-नत्विकाह्यवृजिना वृजिनावलीनां,
लीनाङ्गचेतसि तवासितवाग् विभाति ॥ ३

भातिश्रियाऽमरवशारवशावरावै-
रावैरभासततमां ततमांसलोरूः ।
लोरूर्जिता जिनपदेऽनपदेवसेवे
सेवेहिका सकलया कलयाऽऽशु देवी ॥ ४

पू.मु.श्री रविसागरविजयविरचिता

(४) (दुतविलम्बित)

यदगमत् परशैलभृगौ तम-स्तदपि यद्भवता भुवि गौतम ! ।
ननु निरस्तमतस्तव सेवकं, प्रति भवाम्बुधितः पव सेवकम् ॥१

तनुविभास्तविकर्त्तनमण्डलं, कृतकृपं चक्रिवज्जिनमण्डलम् ।
हृदि वहे व्रतिमानसभासुरं प्रणतनव्यकदिव्यसभासुरम् ॥ २

स्फुरितविभ्रमशुभ्रसरस्वती-भ्रमितभङ्गिविभैकसरस्वती ।
भगवतो मधुराऽऽशु शुभेतरांऽ-हसि रिपुप्रतिमा शुशुभेतराम्॥३

कठिनविघ्नशतात् श्रुतदेवते !, जिनपभक्तिमतः श्रुतदेऽव ते ।
विशदशासनगं वरमानवं, प्रतिदिनं मदिनं न रमानवम् ॥ ४

पू.मु.श्री रविसागरविजयविरचिता

(५) (उपजाति)

श्रीइन्द्रभूतिं गणवृद्धिभूतिं, श्रीवीरतीर्थाधिपमुख्यशिष्यम् ।
सुवर्णकान्तिं कृतकर्मशान्तिं, नमाम्यहं गौतमगोत्ररत्नम् ॥ १

तीर्थङ्करा धर्मधुराधुरीणा, ये भूतभाविप्रतिवर्तमानाः ।
सत्पञ्च कल्याणकवासरस्था, दिशन्तु ते मङ्गलमालिकां च ॥२

जिनेन्द्रवाक्यं प्रथितप्रभावं, कर्माष्टकानेकप्रभेदसिंहम् ।
आराधितं शुद्धमुनीन्द्रवर्गै-र्जगत्यमेयं जयतात् नितान्तम् ॥ ३

सम्यग्दृशां विघ्नहरा भवन्तु, मातङ्गयक्षाः सुरनायकाश्च ।
दीपालिकापर्वणि सुप्रसन्नाः, श्रीज्ञानसूरिवरदायकाश्च ॥ ४

## (६) पू.मु.श्री कीर्तिविमलविजयविरचिता

### (उपजाति)

दीपालिकाख्ये दिवसे प्रशस्ये, योऽनन्तवित्केवलमाससाद ।
देवार्यनिर्वाणमहोत्सवादनु, स निर्वृतिं यच्छतु गौतमो मे ॥ १

श्री-इन्द्रभूति-प्रमुखा गणीश्वरा एकादशापि प्रवरा गताः शिवम्।
पुण्यर्द्धिमद्राजगृहाभिधे पुरे, भवन्तु ते विश्वविभूतये सदा ॥२

सद्यस्करो यस्य गणाधिभर्ता, सदापहर्ता तमसो जनानाम् ।
स आगमो भव्यविबोध-कर्ता,
दुःखौघतो रक्षतु भव्य-सार्थान् ॥ ३

उपद्रवव्यूह-विघातदक्षा, सम्यग्रता श्रीजिनशासने या ।
श्रेयस्करी शासनदेवता सा, भूयात्सतां सर्वसमृद्धि-सिद्धौ ॥४

## (७) पू.मु.श्री कीर्तिविमलविजयविरचिता

### (उपजाति)

श्रीवीर-निर्वाण-महादनन्तरं, प्रापत् प्रगे केवलसंविदं वरम् ।
शुभोर्जमासः प्रतिपत्तिथौ शुचौ,
स गौतमो लब्धियुतः श्रियेऽस्तु वः ॥ १

एकादशापि प्रवरा गणाधिपा, जग्मुर्महानन्द-पदं सदोदयम् ।
सम्पद्वरे राजगृहे पुरे च ये, भवन्तु ते सर्व-समृद्धये सताम् ॥ २

श्री-ज्ञातपुत्रेण पुराऽर्थतो यः, प्रोक्तस्तथा श्रीगणभृद्वरेण ।
निर्मापितः सूत्रत एव सद्यः,
स आगमः सिद्धिकरः श्रिये स्तात् ॥ ३

वैमानिका व्यन्तर-किन्नराश्च, यक्षास्तथा यक्षिणिकाश्च नागाः ।
ये भक्तियुक्ता जिनशासनस्य, सर्वे च ते विघ्नहरा भवन्तु ॥४

पू.मु.श्री कीर्तिविमलविजयविरचिता

(८) (अनुष्टुप्)

येनाप्तं पञ्चमं ज्ञानं, वीरनिर्वाणकादनु ।
श्रीमद्दीपालिकाघस्त्रे, शिवाय स्तात् स गौतमः ॥ १

श्री-गौतममुखाः सर्वे, महानन्दपदं गताः ।
स्वर्ग-निर्वाण-सौख्याय, ते भवन्तु गणाधिपाः ॥ २

श्रीवर्धमान-सर्वज्ञात्, संप्राप्य त्रिपदीं मुदा ।
यं चकार मुहूर्तेन, स श्रिये स्तात् सदागमः ॥ ३

नागा वैमानिका भूता, ज्योतिष्का राक्षसास्तथा ।
अर्हच्छासनभक्ता ये, ते स्युर्विघ्न-विनाशकाः ॥ ४

(९) (अनुष्टुप्)

श्री-गौतमाक्षीणमहा-नसीलब्धिसमृद्धये ।
नमोऽस्तु ते तमःस्तोम-भगवद्भास्कर-श्रिये ॥ १

श्रीसिद्धचक्रमध्यस्थान्, चतुर्विंशति-सम्मितान् ।
श्रीजिनान्नौमि सिद्धार्थान्, श्रीगौतम-गुरूदितान् ॥ २

श्रीगौतममुखाम्भोज-हृदोद्भूताऽद्भुतोदया ।
द्वादशाङ्गीमरुद्गङ्गा, भूयात् कर्ममलापहा ॥ ३

श्रीगौतमगणाधीश–मुखाम्भोज–मधुव्रता ।
श्रुतदेवी भगवती, कल्याणधनसम्पदे ॥ ४

(१०) (अनुष्टुप्)

श्रुत्वा श्रीवीरनिर्वाणं, जित्वा मोहमहाभटम् ।
अवाप्तकेवलज्ञानः, केवलं रातु गौतमः ॥ १

सिद्धा ये समयेऽतीते, सेत्स्यन्ति च भविष्यति ।
सिद्ध्यन्ति वर्तमानेऽस्मिन्, सिद्धिं यच्छन्तु तेऽखिलाः ॥ २

अर्थतो गदितस्तीर्थ–कृता बद्धस्तु सूत्रतः ।
गौतमेन गणभृता, सुखायाऽस्तु स आगमः ॥ ३

निर्ममे निर्ममेशस्य, गौतमस्य महोत्सवः ।
ज्ञानस्य यैः पञ्चमस्य, विघ्नं वो घ्नन्तु ते सुराः ॥ ४

(११) (इन्द्रवज्रा)

श्रीगौतमं सर्वगुणाभिरामं, विशेषलब्धेः प्रवरैकधाम ।
देवेन्द्र–संसेव्यपदारविन्दं, वन्दे सदाऽहं शुभवल्लिकन्दम् ॥ १

श्रीमज्जिनेन्द्रा नतदेववृन्दा, एनस्तमोनाशनभानुतुल्याः ।
संसार–विच्छेदन–चारुवीराः,
सौख्याय वस्सन्तु गुणैकधीराः ॥ २

देवेन्द्रनागेन्द्रनरैश्च कामं, संपूजितं वर्णरमाभिरामम् ।
सिद्धान्तपाथोधिमहं प्रधानं, स्तोष्ये जनानन्दकरैकयानम् ॥ ३

सिद्धायिका पूरित–पूर्णकामा, सद्हेमवर्णाभरणाभिरामा ।
श्रीराजहंसादिगतिप्रधाना, सौख्यानि देयात् शुभनागयाना ॥४

(१२) (इन्द्रवज्रा)

प्रवर्तमाना-मनघामतीता-मनागतां तीर्थकृतां नितान्तम् ।
चञ्चच्चतुर्विंशतिकां नमामि, श्रीगौतमोक्तं भरतावनिस्थाम् ॥१

तीर्थङ्कराणां विजयेषु षष्ट्य-धिकं शतं पञ्चविदेहभूमौ ।
उत्कृष्टतः श्री-भरतेषु चैरा-वतेषु वन्दे दशकं प्रमोदात् ॥ २

सदर्थरूपा भगवद्भिरुक्त्या, सुपाठरूपा गणिभिर्निबद्धा ।
श्रीद्वादशाङ्गी भुवि भाविभूत-प्रवर्तमानार्थविबोधिकाऽस्तु ॥३

श्री-अर्हतां शासनदेवदेव्यः श्री देवतावाङ्मयदेवताश्च ।
विश्वेश्वराः शासनयक्षराजाः, कुर्वन्तु कल्याणधनानि सङ्घे ॥४

(१३)

सकललब्धिपदं विपदोऽपहं, सुरकृतस्तुतिपात्र-पयोरुहम् ।
प्रणमताभिमतार्थ-विधायकं, गणधरं वरगौतमनामकम् ॥ १

गणधरा निखिला अपि गौतमं, प्रभुतयोर्जित-योग-विशारदाः।
जिनवरोदिततत्त्वविकासदा, मम भवन्तु सुबोधिफलप्रदाः ॥२

भविकलोक-भवोदधितारकः, प्रणत-पातकवार-निवारकः ।
गमनयोपपदर्जु-जिनागमो, विजयताममृतीकर-सोमपा ॥ ३

विशदवर्ण-विभूषणभूषिता, वरकमण्डलु-पुस्तक-शोभिता ।
दिशतु देवनरासुर-संस्तुता, श्रुतमनन्तफलं श्रुतदेवता ॥ ४

(१४) (उपजाति)

पृथ्वीतनूजार्च्यजिनेन्द्र सङ्घ-
स्तुतागमज्ञः सुरसेव्यमानः ।

सूरीश्वरानन्दगुरोः सुसङ्घे
दीपोत्सवे पर्वणि शङ्करस्तात् ॥ १

(चतुर्शः उच्यते)

(१५) (तोटक)

गणनायकगौतममुख्य ! मुनि-
हितकारिपदस्तव भक्तिभृताम् ।
पुरुषोत्तमराजि-शिवप्रदगी-
रभिरामगुणाऽऽशु शिवं दिशतु ॥ १

(चतुर्शः उच्यते)

(१६) (शार्दूलविक्रीडित)

देया देवमुदोदयागमविधे सिद्धे श्रियं सर्वदा,
जैन-व्यूह विशारदां भवभृतां कम्रेन्द्रभूते ! प्रभो ! ।
प्रादुर्भूतपराक्रमोर्जित ! तमोमिथ्यात्व-मूलच्छिदे,
सम्यक्त्वोज्ज्वलताकृते च सततं सर्वाङ्गी-शर्मप्रद ! ॥ १

(चतुर्शः उच्यते)

(१७)

जय ! जय ! गणधारक ! श्रीविजयक्षमा सुखकर,
जस वचन सुधारस-पोषित भविक अपार ।
जिनशासन-भासन-विघन-विदारण-धीर,
सेव्वां सुखदाइ माणिभद्र जस वीर ॥ १

(चतुर्शः उच्यते)

(१८)

श्री-विजयप्रभसूरेर्नित्यादीपालिकाभावदेयम् ।
आनन्दार्थ-विधायि-लब्धिदो गौतमस्वामी ॥ १

(चतुर्शः उच्यते)

(१९)

श्री-विजयरत्न-गणाधिपधीमतां,
द्वादश-जिनागमदेव-समागमः ।
कुशलमात्मकुलोदयकारको-
हितदयामति-कान्ति-सुखावहः ॥ १

# ॥ श्री पुण्डरीकगणधरस्तुतयः ॥

(१) (अनुष्टुप्)

सिद्धं श्रीपुण्डरीकाऽद्रौ, प्रथमं गणनायकम् ।
जगदाप्यायकं श्रीमत्-पुण्डरीकं नमाम्यहम् ॥ १

श्रीमत्पुण्डरीकाद्याऽद्रि-शृङ्गशृङ्गारदायकाः ।
नायकाः शिवदाः सन्तु, मम श्री-जिननायकाः ॥ २

पुण्डरीकगणेन्द्राऽऽदि-विहितं हितमीहितम् ।
मतं जिनमतं मेऽस्तु, सदा सिद्धिप्रदायकम् ॥ ३

पुण्डरीक-मुखि ! सर्व-शास्त्र-सम्भारतीरदे ! ।
भारतिं भारति ! दद्यात्, सद्यो विद्याञ्च मे श्रुतम् ॥ ४

(२) (रथोद्धता)

पुण्डरीकगिरिराजशेखरं, पुण्डरीकसमकीर्तिवैभवम् ।
पुण्डरीकसम्भवभवद्वप्रे, पुण्डरीकगणधारिणं स्तुमः ॥ १

पुण्डरीकगिरिराजसंस्थिता, इन्द्रचन्द्रमनुजेन्द्रवन्दिताः ।
सुप्रसन्नमनसो मानसं, श्रीजिनाः प्रददतां शिवश्रियम् ॥ २

पुण्डरीक-गणधारिणा कृतं, विश्रुतं श्रुतमनन्तमुत्तमम् ।
निर्जिता-परमतं शुद्धमतो मानसे मम सदा सुसिद्धिदम् ॥ ३

सर्वतोषपरिशोषकारणी, धारणी भवयुषां प्रणेमुषाम् ।
श्रीश्रुतप्रतति-मालभारणी, शासने श्रुतसुरी शिवङ्करी ॥ ४

(३) (उपजाति)

श्रीमद्युगादीश्वर-शिष्य-मुख्यं, सिद्धाचले निर्मितमुक्तिसौख्यम्।
श्रीपुण्डरीकव्रति-राजराजं, नमामि नम्रत्रिदशाधिराजम् ॥ १

जिनेश्वराः सर्व-जनीनचित्ता, विश्वत्रयीदत्त-सुधर्मवित्ताः ।
श्रेयः श्रिये सन्तु जगज्जनानां,
तद्भक्तिसिन्धौ कृतमज्जनानाम् ॥ २

जिनागमो विश्वजनैकबन्धुः, सदर्थरत्नव्रजदुग्धसिन्धुः ।
कषाय-दावानल-नीरवाहः,
श्रियेऽस्ति निर्वाण-पुराऽध्ववाहः ॥ ३

द्विपं गतो निर्मित-विघ्न-शान्ति-श्चतुर्भुजः काञ्चनजैत्रकान्तिः ।
यक्षाधिपो गोमुखनामधेयः, शिवाय भूयाद् भृशभागधेयः ॥४

(४) (उपजाति)

संपुन्न-चंदाणण-पुंडरीअं, सन्नाण-लच्छीवर-पुंडरीअं ।
कम्मेभकुंभत्थल-पुंडरीअं, वंदे मुणिंदं वर-पुंडरीअं ॥ १

नमंतदेवासुरकिन्नराणां, संसारकंतारखयंकराणं ।
जिणिंद-चंदाण पयारविंदे, तिलोअकल्लाणकरेऽभिवंदे ॥ २

पणासिअं मोहमहंधयारं, पयासिअं जेण तिलोअसारं ।
जिणागमं सूरसमप्पभेअं, नमाभि निम्माविअ-सव्वसेयं ॥ ३

तित्थंकराणं कयपायसेवा, सव्वे सया सासणभत्तदेवा ।
धम्मं कुणंतस्स जए महग्घं, सिग्घं पि संघस्स हरंतु विग्घं ॥४

## (५) ॥ श्रीसूरिस्तुतिः ॥

जय जय नाणदिवायर परोवयारिक्कपच्चल मुणिंद ! ।
गुरु करुणारससायर नमो नमो तुब्भ पायाणं ॥ १

दारिद्दअमुद्दसमुद्दमज्झनिवडंतजंतुपोयाणं ! ।
सकलकमलालयाणं नमो नमो तुब्भ पायाणं ॥ २

सग्गापवग्गमग्गाणुलग्गजणसत्थवाहपायाणं ।
भवियावलंबणाणं नमो नमो तुब्भ पायाणं ॥ ३

चक्कंकुसंकवरकलसकुलिसकमलाइलक्खणजुयाणं ।
असरणजणसरणाणं नमो नमो तुज्झ पायाणं ॥ ४

# ॥ श्रीअष्टापदतीर्थस्तुतयः ॥

(१) (शार्दूलविक्रीडित)

नानावर्णनिजप्रमाणकलिता रत्नौघसन्निर्मिता-
नाभेयादिजिनेन्द्रवीरचरमास्तीर्थाधिपाश्चक्रिणा ।
यत्र श्रीभरताधिपेन विहिता देवेन्द्रवन्द्याः सदा,
स श्रीमान्नगनायको वितनुतां अष्टाद्रिपादः शिवम् ॥ १

मिथ्यात्वध्वंसदक्षान् भवभयहरणान् नष्टनिःशेषदोषान्,
संसाराम्भोधिपोतान् सुरपतिविनुतान् केवलज्ञानयुक्तान् ।
मायामोहप्रमुक्तान् (प्रति)हतमदनान् मोदिताशेषलोकान्,
लोकालोकप्रदीपान् परमपदगतान्नौमि सर्वान् जिनेन्द्रान् ॥ २

दुर्गाधाऽनोरपारङ्गततिमिकलितं हेतुमुक्ता-फलाढ्यं,
चञ्चद्दृष्टान्तरत्नं नयविततिजलं भङ्गरङ्गत्तरङ्गम् ।
नानायुक्तिप्रपञ्चप्रचुरजलचरं सूक्तिसद्युक्तियुक्तं,
सेवध्वं भव्यलोकाः ! श्रुतसुजलनिधिं सादरं मुक्तिभूत्यै ॥ ३

कूष्माण्डी कमलेक्षणा भगवती चक्रेश्वरी वाऽच्युता,
वैरोट्या विलसल्ललाटतिलकाः सब्रह्मशान्तिग्रहाः ।
अन्येऽपि प्रकटप्रभावपटवः सर्वेपि यक्षादयो,
वैयावृत्तिकराः सदैव विपुलं सौख्यं प्रयच्छन्तु नः ॥ ४

(२)

श्रीमत्तीर्थकृतां स गौतम-गुरु, र्नन्तुं चतुर्विंशतिम्
लब्ध्याष्टापदशैल-मूर्ध्नि गतवान्, रश्मिं गृहीत्वा रवेः ।

व्यावृत्तश्च स तापसानुपदिशन्, दीक्षां च दत्त्वा स्वयम्,
क्षीरान्नैः सह दक्षिणां च विदधे कैवल्यरत्नोज्ज्वलाम् ॥ १

तीर्थे श्रीविमलाचलेऽर्बुदगिरौ, सम्मेतकेऽष्टापदे,
पापायां पुरि रैवताद्रिशिखरे, तारङ्गवैताढ्ययोः ।
त्रैलोक्येपि च यत्र तत्र भवने, सर्वत्र सिद्धार्हताम्,
प्रत्यूषे प्रतिमा नमामि सततं, ताः शाश्वताऽशाश्वतीः ॥ २

पीयूषस्य विजित्वरी मधुतया, पाण्डित्य-शीलप्रदा,
श्रुत्वाऽमर्त्यनरेश्वराः श्रुतिपुटैः, तृप्तिं परां लेभिरे ।
सा जैनी भवभीतिभिद् भवतु मे लोकत्रयी पावनी,
सर्वप्राणिगणोचिता हितकरी, मुक्तिप्रदा भारती ॥ ३

सौधर्मेन्द्रमुखाः सुरेश्वरगणाः स्वर्वासिनो निर्जराः,
ज्योतिष्केश-रविग्रहाश्च शशिनो खे सत्वरं गत्वराः ।
पाताले धरणाग्रिमा भवनगा मर्त्ये स्थिता व्यन्तराः
साहाय्यं परमेष्ठिनां श्रितवतां, कुर्वन्तु सम्यग्दृशाम् ॥ ४

(३) (द्रुतविलम्बित)

सकलसेनरसोननतक्रम ! प्रवरसार्वगणागमसम्मत ! ।
विजयसेनगुरोर्वरसौख्यदः, सकलवीरविभो ! जयताज्जने ॥१

(४) (तोटक)

भरहेसर-कारिय-देवहरे, अट्ठावयपव्वय-सोहकरे ।
नियवण्णपमाणसरीरधरे, चउवीसइ वंदउं तित्थयरे ॥ १

३७

## ॥ श्रीनन्दीश्वरद्वीपस्तुतयः ॥

(१) (स्रग्धरा)

दीवे नंदीसरम्मिं चउदिशि चउरो अंजणाभा नगिंदा,
तेहिंतो वाविमज्झे दहिमुहगिरिणो सेयवण्णा तहेव ।
दुण्हं दोण्हंपि तेसिं रुइर रइकला अंतराले य दो दो,
बावण्णा तत्थ तित्थे सुरवरभवणा तेसु वंदे जिणिंदे ॥ १

मेरूणं पंचगम्मिं कुरुतरुसु तहा नागदंते सुयारे,
वेयड्ढेसुं च नंदी सरवरि च नगे सासया सुप्पसिद्धा ।
वक्खारेसुं नगेसुं कुलगिरि उवरिं कुंडले माणुसाणं,
सेले सामाकरे जे जिणभवणठिया ते जिणेसा जयंतु ॥ २

जे तीयाणागयम्मिं भवजलहितरी–सन्निहं वट्टमाणे,
काले तित्थंकरेहिं अमियरससमं भासियं अत्थओ तं ।
भव्वाणं मुक्खहेउं गणहररइयं सुत्तउ बारसंगं,
सुत्तं अनाणधंतं हरउ मह सया सासयं सव्वलोए ॥ ३

सोहम्मिंदाइणो जे तियसगणजुआ पंचहा जोइसीया,
बत्तीसं वितरिंदा सुरभवणठिया देवदेवीहि जुत्ता ।
पायालिंदाई वीसं चमरपभिइणो धम्मकज्जुज्जयस्स,
सव्वे संघस्स विग्घं मणसि सुमरिया सुपसन्ना हरंतु ॥ ४

(२) (उपजाति)

दीवम्मि नंदीसरनामगम्मि, बावन्नपासायमनोहरम्मि ।
अपावलेवे रिसहाइदेवे, वंदामि वंदारुसुरिंद-सेवे ॥ १

नमन्तदेवासुरकिन्नराणां, संसारकंतारखयंकराणां ।
जिणिंदचंदाण पयारविंदे, तिलोअकल्लाणकरेऽभिवन्दे ॥ २

पणासियं मोहमहंधयारं पयासियं जेण तिलोअसारं ।
जिणागमं सूरसमप्पभेअं, नमामि निम्माविअसव्वसेअं ॥ ३

तित्थंकराणं कयपायसेवा, सव्वे सया सासणभत्तदेवा ।
धम्मं कुणंतस्स जए महग्घं, सिग्घंपि संघस्स हरंतु विग्घं ॥४

(३) (मालिनी)

भुवणपयडदीवे तम्मि नंदीसरम्मी,
दहिमुह-रुइयगारा, अंजणा जे गिरिंदा ।
सुर-असुरनयाणं, सासयाणं जिणाणं,
मणिमयभवणाइं, तेसि बावन्न वंदे ॥ १

सिवरमणिविमुक्काऽडक्खीडक्खविलक्खा,
फुरइ परममेसिं किं व कित्ती सुमित्ती ।
इह सुरगिरिसिंगे, मज्झणे खीरपूरे,
सहइ सिरसि जेसिं, ते जिणा दिंतु सुक्खं ॥ २

परमपयदुवारं, लच्छीए वच्छहारं,
पयडियसिवमग्गं, दत्तसग्गापवग्गं ।
भवजलनिहिसेउं, सुक्खसंपत्तिहेउं,
सयगम-नयभंगं, वंदिमो बारसङ्गं ॥ ३

ससिपहपयडाहिं, देवदित्तच्छडाहिं,
तिमिरमवहरंती मंथरं संचरंती ।
जयइ धवलवन्ना, हंसपत्तं पवन्ना,
सरसिरुहनिसन्ना, सारया सुपसन्ना ॥ ४

(४) (उपजाति)

नन्दीश्वरद्वीपमहीपरत्नाऽलङ्कारसारा जिनचैत्यवारा ।
प्रमोदचेतः सुहृदेति नूताः, कुर्युः प्रसादं निजदर्शनेन ॥ १

(चतुर्शः उच्यते)

३८

# ॥ श्री शत्रुञ्जयतीर्थस्तुतयः ॥

(१) (स्रग्धरा)

शैले शत्रुञ्जयाऽऽख्ये भवजलधिपतज्जन्तुपोतायमाने,
चैत्ये चञ्चत्पताकाप्रकटसितपटे कूपकाऽऽभे गुणाऽऽढ्ये ।
नेतुं पारे परस्मिन् शिवनगरमहाराज्यलाभाय लोकं,
कुर्वन्निर्यामकत्वं जयति जिनपतिर्नाभिभूपालसूनुः ॥ १

यत्पादाऽम्भोजरेणुस्तबकतिलकिता भाविनो भावनम्रा,
भुक्तेर्मुक्तेश्च लक्ष्म्याः स्फुटमिह सुभगं भावुकत्वं भजन्ति ।
ते सन्तो भाव्यतीता विमलगिरिमहाशृङ्गशृङ्गारकाः (ये),
पायासुर्लोकसारा जिनवरवृषभाः क्लृप्तविश्वोपकाराः ॥ २

शैले श्रीपुण्डरीके समवसृतिमुखानुन्नतैर्यद्घनाभै-
र्भव्यानानन्दयद्भिः शिखिन इव लसद्देशनागर्जितेन ।
उद्गीर्णं तीर्थराजैः श्रुतममृतमिदं बोधिबीजानुरूपं,
श्रेयःसम्पत्फलाद्यं प्रथयतु सुकृताङ्कुरपूरं जगत्याम् ॥ ३

पुण्यात्पुण्यानुबन्धान्नियमलवभवात् पूर्वजन्मानुचीर्णात्,
देवत्वं प्राप यः श्रीविमलगिरिमहातीर्थसेवापवित्रम् ।
कल्याणीभक्तिरुच्चै प्रथमजिनपतेः पादपद्मार्चनेऽसौ,
श्रीयक्षेशः कपर्दी भवतु भवभृतां भूतये शान्तये नः ॥ ४

(२) (स्रग्धरा)

आनन्दा नम्रकम्रत्रिदशपतिशिरःस्फारकोटीरकोटी-
प्रेङ्खन्माणिक्यमालाशुचिरुचिलहरीधौतपादारविन्दम् ।

आद्यं तीर्थाधिराजं भुवनभवभृतां कर्ममर्मापहारं,
वन्दे शत्रुञ्जयाख्यं क्षितिधरकमलाकण्ठशृङ्गारहारम् ॥ १

माद्यन्मोहद्विपेन्द्रस्फुटकरटितटीपाटने पाटवं ये,
बिभ्राणा शौर्यसारारुचिरतररुचां भूषणं योचितानाम् ।
सद्वृत्तानां शुचीनां प्रकटनपटवो मौक्तिकानां फलानाम्,
तेऽमी कण्ठीरवाभा जगति जिनवरा विश्ववन्द्या जयन्ति ॥ २

सद्बोधावन्ध्यबीजं सुगतिपथरथः श्रीसमाकृष्टिविद्या,
रागद्वेषाहिमन्त्रः स्मरदवदवथुः प्रावृषेण्याम्बुवाहः ।
जीयाज्जैनागमोऽयं निबिडतमतमस्स्तोमतिग्मांशुबिम्बं,
द्वीपः संसारसिन्धौ त्रिभुवनभवने ज्ञेयवस्तुप्रदीपः ॥ ३

यः पूर्वं तन्तुवायः कृतसुकृतलवैर्दुष्कृतैः पूरितोऽपि,
प्रत्याख्यानप्रभावादमरमृगदृशामातिथेयं प्रपेदे ।
सेवाहेवाकशाली प्रथमजिनपदाम्भोजयोस्तीर्थरक्षा-
दक्षः श्रीयक्षराजः स भवतु भविनां विघ्नमर्दी कपर्दिः ॥ ४

(३) (द्रुतविलम्बित)

विमलशैलविशालविभूषणं, प्रथमतीर्थपतिं गतदूषणम् ।
प्रणत पञ्चजनाऽमरनायका, निखिलविघ्नविनाशविनायकाः ॥१

जिनवरा गुणवृन्दकलालया-ऽप्रतिमतां दधतः कमलालयः ।
विदधतो दुरितव्रजनाशनं, नरकदुष्टगतिव्रजनाशनम् ॥ २

जगति भागवती वरभारती, जनयति श्रुतियामलभारती ।
जनशुभाशुभभेदविधायिका, सुखकरी न भवेद्बहुधायिका ॥३

जनयतादिह गुह्यकपर्दिकः, कृतपरासुरकान्तिकपर्दिकः ।
सकलसङ्घविपत्तिकदम्बक-क्षयकरः सरसीजसदम्बकः ॥ ४

(४) (तोटक)

विमलाचलभूषणमादिजिनं, जिननूतविशुद्धगुणप्रकरम् ।
करणं महसां विनमाम्यभवं, भवनं यशसां तमसंहरणम् ॥ १

मलकर्ममनोभवतापहरं, हरतात्प्रणिपातकृतां विपदः ।
पदकोमलता जितसत्कमलं, मलदुःखहरं भगवद्विसरम् ॥ २

सरसं वचनं भुवि भागवतं, बत ये श्रुतिगोचरमादधति ।
दधदङ्गभृतां प्रबलं विभवं, भंवदुच्चतमोहतये सततम् (?) ॥३

ततकान्तिधरो विदधाति महं, महनीयवपुर्लतिको जगति ।
गतिभिश्च जयन्मदिनं द्विरदं, रदनाग्र्यमुखः सुरगोमुखकः ॥४

(५) (वसन्ततिलका)

आद्यर्हताधिपतिवासपवित्रिताङ्गो,
विश्वे सदा गिरिवरो हि महाप्रभावः ।
शत्रुञ्जयो विजयते नृसुराधिनाथैः
संवर्णितो भवभयार्तिहरोऽतिपुण्यः ॥ १

नेमिं विना जिनवरा ऋषभादयश्च,
सर्वे समीयुरचले भवभावमुक्ताः ।
पुण्यप्रभावमतुलं हि विचिन्त्य चित्ते,
शत्रुञ्जयेऽत्र सहिताः स्वगणाधिनाथैः ॥ २

भव्यास्तु ये त्रिकरणैर्हि जिनागमोक्त-
सत्सम्प्रदायविधिनाऽरत्न गिरौ पवित्रैः ।

आगत्य नाभिनृपनन्दनपादपद्मं,
सम्पूजयन्ति खलु तेऽमृतवासभाजः ॥ ३

शत्रुञ्जयाचलनिवासरता महेन,
यक्षाधिपेन सह गोमुखसंज्ञकेन ।
चक्रेश्वरी जिनपतेः शरणागतानां,
भव्यात्मनां भयहरा सततं च भूयात् ॥ ४

(६)

विमलशैलविशालमतङ्गज-प्रवरमूर्ध्नि पुरन्दरसन्निभः ।
विजयते प्रथमो जिनपुङ्गवो, नरसुरासुरनाथनमस्कृतः ॥ १
(द्रुतविलम्बित)

इषुमितमुनिकोट्या संयुतः पुण्डरीकः,
प्रथमजिनगणेशो यत्र मुक्तिं प्रपन्नः ।
सकलजिनवरा यं तीर्थराजं स्तुवन्ति,
स भवतु मम नित्यं श्रेयसे पुण्डराद्रिः ॥ (मालिनी) २

सिद्धाचले मुनिगणा अपुनर्भवत्वं,
प्राप्ताःपदं जननमृत्युविनाशि यत्र ।
जैनागमेषु विदितोऽस्ति महाप्रभावः,
तस्यैव तीर्थनृपतेः कथितो जिनेन्द्रैः ॥ (वसन्ततिलका) ३

शत्रुञ्जयं प्रणमतां वरदानदक्षा,
चक्रेश्वरीकवडगोमुखयक्षमुख्याः ।
सर्वार्थसिद्धिकरणोदयहर्षयुक्ता,
कुर्वन्तु सङ्घकुशलं जिनधर्मरक्ताः ॥ (द्रुतविलम्बित) ४

३१

पू.आ.श्री जिनसौभाग्यसूरिविरचिता

## ॥ श्रीसम्मेतशिखरगिरिस्तुतिः ॥

(१)

श्रीसम्मेतगिरौ शृङ्गे, पार्श्वनाथो जगत्प्रभूः ।
निर्वाणपदमाप्तश्च, तं वन्दे सुतरां मुदा ॥ १

सुराऽसुरनरेन्द्रैश्च वन्दिता जिननायकाः ।
भवन्तु सुखदा नित्यं, सङ्घस्य गतकल्मषाः ॥ २

द्वादशाङ्गात्मका वाणी, तीर्थनाथमुखोद्गता ।
भूयात् साहाय्यदा नित्यं, भविनां हितकारका ॥ ३

जिनसौभाग्यसूरेश्च, शासनोन्नतिकारिणि ।
शासनाऽधीश्वरी रम्या, करोतु सुखमव्ययम् ॥ ४

## ॥ श्रीसम्मेतशिखरजिनस्तुतिः ॥

(२) (शार्दूलविक्रीडित)

ध्येयां योगिवरैः सुरेन्द्रमहितां मोक्षार्थदां प्राणिनां,
सम्मेते शिखरे गतां कविनुतां विद्याधरैस्सेविताम् ।
संसारे पततां विशां सुखकरीं द्रोणीमिवालम्बनं,
वन्दे श्रीजिनराजसन्ततिमहं रागादिनिर्णाशिकाम् ॥ १

## ४०

पू.मु. श्रीज्ञानवर्धन-विरचिता

# ॥ श्रीअर्बुदाचलस्तुतिः ॥

(१)

श्रीअर्बुदाचलगिरीश ! जयाऽऽदिदेव !
देवाधिदेव ! विहितामरसारसेव ! ।
श्रीनाभिभूपतिकुलाम्बुधिचारुचन्द्र !
श्रीमारुदेव ! नतदानवमानवेन्द्र ! ॥ १

सर्वे जिनाधिपतयोऽखिलमङ्गलाली-
वल्लीविवर्द्धननवीनघनायमानाः ।
नित्यं भवन्तु मम विघ्नहराः प्रकामं
कल्याणदाः सुरवरार्च्चितपादपद्माः ! ॥ २

जैनागमो विजयतु प्रवरार्थयुक्तः
श्रीवर्द्धमानजिननाथमुखप्रसूतः ।
श्रीगौतमादिगणधारिभिरङ्गभाजां
कल्याणदायिभिरयं विधृतो विशालः ॥ ३

चक्रेश्वरी भगवती वरदायिनी मे
निश्शेषविघ्नहरणैकनिबद्धकक्षा ।
श्रीआदिनाथपदपङ्कजसेवमाना
सज्ज्ञानवर्द्धनसुखं वितनोतु नित्यम् ॥ ४

४१

## ॥ श्रीपर्युषणापर्वस्तुतयः ॥

(१) (शार्दूलविक्रीडित)

भो भो भव्यजनाः सदा यदि शिवे, वाञ्छा तदा पर्वणः,
श्रीमत्पर्युषणाभिधस्य कुरुत स्वाराधनं सादरम् ।
द्रव्यार्चां सुमचन्दनैः स्तुतिभरैः कृत्वा च भावार्चनां,
मानुष्यं सफलं विधत्त सुमहैरर्हन्मतोल्लासकैः ॥ १

कृत्वा मास्तिथिदिग्भवाब्धिवसुदिग् युग्मोपवासान् शुभान्,
रम्यार्चां च विधत्त भो ! भवहरां तीर्थङ्कराणां नवाम् ।
षष्ठं वीरजिनान्तिमस्य चरितं कर्णैश्च पीत्वा मुदा,
वीरश्रीजननोत्सवे कुरुत सूलूलुध्वनीन् सर्वदा ॥ २

जीवानामवनं विधत्त सुधियः कृत्वाष्टमं नागवत्,
भाव्या निर्मलभावना भविजनैः कैवल्यलक्ष्मीकृते ।
कल्याणानि जिनस्य भो ! गणभृतां वादं च पार्श्वप्रभो-
र्नेम्याद्यन्तरकाणि तं शृणुत सन्नाभेयवृत्तं तथा ॥ ३

साध्वाचारमखण्डितं पिबत सन्मौलं च सूत्रं श्रवैः-
चैत्यानां परिपाटिकां च तनुत स्वालोचनां वार्षिकीम् ।
जन्तून् क्षाम्यत वत्सलं कुरुत भोः ! साधर्मिकाणां मुदा,
विघ्नौघं चतुरस्य वा हरतु सा सङ्घस्य सिद्धायिका ॥ ४

(२) (शार्दूलविक्रीडित)

भव्यः श्रावणिके हि वासरयुगे पर्यूषणस्यादिमे,
सम्पूज्यार्च्य जिनेश्वरं कृततपा व्याख्यानमष्टाह्निकम् ।
श्रुत्वादर्शतिथौ गुरोर्वचनतः श्रीकल्पसत्पीठिकां,
श्रीनागध्वजवत्खलु प्रतिदिनं स्वात्मानमूद्र्ध्वं नयेत् ॥ १

मासे भाद्रपदे तिथौ प्रतिपदि सम्पूज्य सर्वाञ्जिनान्,
प्रातः सद्गुरुसन्निधौ कृतमहाकल्पोपपन्नव्रतः ।
भव्यो वीरचरित्रयुक्तमनघं व्याख्यानयुग्मं शुभं,
श्रुत्वैवं द्वितीयादिनेऽपि शृणुयाच्छ्रीवीरजन्मार्च्यकम् ॥ २

व्याख्याने खलु पञ्चमे भविजनो दिग्बालिकाभिः कृतं
सूतीकर्म तथा महेन्द्ररचितं स्नात्रोत्सवं मोददम् ।
दीक्षायाः सुमहोत्सवं सुरनराधीशैः कृतं षष्टमे,
ज्ञानाप्तिं शृणुयाच्च धर्मविततिं मुक्तिं गुरोः केवलम् ॥ ३

एवं सप्तमके चरित्रममलं भव्यस्तु पार्श्वप्रभोः
नेमेश्चातुलपुण्यदं विश्रुणुयात्तुर्यं हि व्याख्यानके ।
नाभेयस्य चरित्रमन्त्यमनघं सिद्धाकृपातोऽष्टमे,
साधूनां नवमे तथैव दशमे सङ्ख्यां शुभाचारकान् ॥ ४

(३) (प्रहर्षिणी)

पञ्चम्यां भविमनुजोऽर्च्यतीर्थनाथं,
सम्पूज्य प्रकृतिसुपेशलः प्रभाते ।
गत्वा सद्गुरुसविधं च कल्पसूत्रं,
निश्चिन्तः खलु शृणुयाद्धि कल्पतुल्यम् ॥ १

सन्ध्यायां ननु प्रतिक्रम्य वार्षिकं स्वं,
पापं वा कृतमपराधमज्ञतोऽपि ।
जीवानां सपदि समाधिना क्षमेद्धि,
सद्भव्यो भवभयभीतिभीतचित्तः ॥ २

यश्चैवं सुगुरुनिदर्शितेन सम्यक्,
प्रत्यब्दं बहुपरिवर्द्धितेज्यभावः ।
कल्पेनातिशुभसुवार्षिकं स्वकृत्यं,
भव्योऽस्मिन् जगति हितार्थदं करोति ॥ ३

निर्धूयापरिमितजन्मजातमंहो,
भुक्त्वाऽमुत्र सुकृतधर्मकर्मजानि ।
शर्माणि प्रचुरतराणि वै कृपातः,
सिद्धायाः शिवमचलं स याति चान्ते ॥ (यु.) ४

(४) (स्रग्धरा)

पूजां कृत्वातिभक्त्या चरमजिनपतेः सप्तदिग्भेदयुक्तां,
प्रोद्दामाडम्बरेण प्रकटसुखकरीं पापहृद्युक्तियुक्ताम् ।
कार्यः स्नात्रोत्सवोऽपि प्रमदपरिभृतैर्धर्मनिष्ठैर्मनुष्यै-
रायाते पर्वघस्रे सुकृतपरिवशाद्वार्षिके पुण्यहेतौ ॥ १

कृत्वा शुद्धं प्रकृष्टं जनितधृतितपः कर्मनिर्घातनार्थं,
सर्वज्ञा वीतरागा विविधसुमगणैः पूजनीयाः प्रमोदात् ।
श्रोतव्यं वीरवृत्तं दृढतरमनसा सम्यगासेव्य षष्ठं,
माङ्गल्यं जन्मकृत्यं प्रतिपदि दिवसे ज्ञातपुत्रस्य कार्यम् ॥ २

घस्रानष्टावमारिं सकलजनपदे घोषयित्वा स्वशक्त्या,
कार्यं कैवल्यहेतुर्व्रतमतिसुखदं नागवच्चाष्टमाख्यम् ।
कल्याणानि स्वयम्भोः शृणुत गणभृतो गौतमादेर्विवादं,
वृत्तं श्रीपार्श्वनेम्योस्तदनु भविजनाः सान्तरं वार्षभीयम् ॥ ३

कल्पाख्यं मूलसूत्रं चरणगुणयुतं वाचितं तत्त्वविद्भिः,
श्राव्यं क्षम्याश्च जीवास्त्रिकरणशुचिभिश्चैत्ययात्रा च कार्या ।
कार्या सङ्घस्य पूजाऽशनविधिसहिता वार्षिके वासरेऽस्मि-
न्नानन्दं सङ्घसार्थं सपदि कुरु शुभे !
देवि ! सिद्धायिके ! त्वम् ॥ ४

## ॥ श्रीदीपमालिकास्तुतयः ॥

(१) (शार्दूलविक्रीडित)

पापायां पुरि चारुषष्ठतपसा पर्यङ्कपर्यासनः,
क्ष्मापालप्रभुहस्तिपालविपुलश्रीलेखशालां गतो ।
गोसे कार्तिकदर्शनागकरणे तुर्यारकान्ते शुभे,
स्वातौ यः शिवमाप पापरहितं संस्तौमि वीरं जिनम् ॥ १

यद्‌गर्भागमनोद्‌भवव्रतवरज्ञानाप्तिभद्रक्षणे,
सम्भूयाशु सुपर्वसन्ततिरहो चक्रे महस्तत्क्षणात् ।
श्रीमन्नाभिभवादिवीरचरमास्ते श्रीजिनाधीश्वराः,
सङ्घायानघचेतसे विदधतां श्रेयांस्यनेनांसि च ॥ २

अर्थात्पूर्वमिदं जगाद जिनपः श्रीवर्धमानाभिधः,
तत्पश्चाद्‌गणनायका विरचयाञ्चक्रुस्तरां सूत्रतः ।
श्रीमत्तीर्थसमर्थनैकसमये सम्यग्दृशां भूस्पृशां,
भूयाद्‌भावुककारकं प्रवचनं चेतश्चमत्कारि यत् ॥ ३

श्रीतीर्थाधिपतीर्थभावनपरा सिद्धायिका देवता,
चञ्चच्चक्रधरा सुरासुरनता पायादसौ सर्वदा ।
अर्हच्छ्रीजिनचन्द्रगीः सुमतितो भव्यात्मनः प्राणिनो,
या चक्रेऽवमकष्टहस्तिमथने शार्दूलविक्रीडितम् ॥ ४

(२) (उपजाति)

सिद्धार्थभूपालकुलावतंसं, विद्वन्मनोमानसराजहंसम् ।
माद्यद्बलीवदर्दविराजहंसं, वीरं नुवे देवकृतप्रशंसम् ॥ १

राजी जिनानां ददतां सुखानि, भव्याङ्गिनां भक्तहितावहा सा ।
विश्वत्रयी कामितकल्पवल्ली, दीपालिकापर्वणि वन्द्यमाना ॥२

सिद्धान्तवार्धिर्वरयुक्तिशुक्तिका-
युक्तः सदालापकमौक्तिकाञ्चितः ।
मुनीन्द्रसत्पोतवणिग् निषेवितः, सदर्थयुक्तो ददतां सदर्थम् ॥३

मातङ्गयक्षोऽर्थिषु कल्पवृक्षः, वीरार्हतो भक्तिविधानदक्षः ।
लीलासमुन्मूलितविघ्नलक्षः, दीपालिकायां कुरुतां सुखानि ॥४

(३) (द्रुतविलम्बित)

नमत भव्यजना ! गणभृद्वरं, चरमदेवपदाम्बुजषट्पदम् ।
सकललब्ध्यतिशायिनमादरा-द्विनयतो नययुग् वचनश्रियम् ॥१

जिनततिर्जयताज्जयदायिनी, प्रवरसौख्यकलापविधायिनी ।
असमलक्षणलक्ष्मविराजिता, त्रिभुवनाम्बुजभासनभास्करा ॥२

जिनपतेर्वचनं श्रुतिसौख्यदं, भविकजाड्यतमस्तरणिप्रभम् ।
ललितसत्पदपद्धतिराजितं, शृणुत भव्यजनाः शिवसम्पदे ॥३

स्मरत भव्यजनाः ! श्रुतदेवतां, जिनवराननपङ्कजवासिनीम् ।
विदधतीं शुभदीपमहोत्सवे, भविकमानसकामितसम्पदम् ॥४

(४) (शिखरिणी)

गतो भावोद्योतः परमविमलज्योतिरधुना,
ततो द्रव्योद्द्योतं भुवि वितनुमस्तस्य विरहे ।

इति प्राज्ञै–रष्टादशभिरवनीजानिभिरहो !,
कृता दीपालीयं जगति जयदा वीरजपतः ॥ १

न मे कामैरर्थैः परमसुलभैरर्थनिकरैः,
कृतं राज्येनाऽलं सृतममरलोकर्द्धिविभवैः ।
अनाप्तां संस(सा?)रभ्रमणमतिभि(र्न नरवरै?)ननिवगरगै–
र्लभेयं दुष्प्रापां जिनपदपद्मेषु वसतिम् ॥ २

श्रुते श्रोत्रानन्दः परममनुभूतेऽघविलयो,
मनः शुद्धिर्ध्याते विमलवचनो यत्र पठिते ।
भवेत्सेवायोग्यो विदितवरसेवे च मनुज–
स्तमानन्दोद्बोधं जिनपतिकृतान्तं प्रणमत ॥ ३

धृतश्रद्धा सङ्घे विहितविनया वीरविभवे,
भवे सौख्यं दात्री जिनवरवचोबद्धमनसाम् ।
परा सम्यग्दृष्टिः सुमतिजनसंतापशमनी,
सदा सिद्धादेवी भवतु, भविनां दुःखदमनी ॥ ४

पू.पं.श्रीगुणसागरगणिविरचिता

(५) (भुजङ्गप्रयात)

त्वया निर्वृतिर्भूषिताऽऽर्या यदानीं
तदानीं महाराजराजैः कृतं सत् ।
स्फुरद्दीपदीपालिकापर्व वर्यं
महावीर ! स त्वं प्रभो ! पालयाऽस्मान् ॥ १

जिनश्रेणिका नायिका दायिका वा
सुखस्याऽसमस्या शमस्या नमस्या ।

ततस्याऽतुलस्याकरस्यादरस्या
सशङ्का दिवौका अशोकार्यनाका ॥ २

जिनेशागमः सागमः सङ्गमः स्त्राग्
प्रसिद्धः प्रसिद्धः सुबद्धः प्रसिद्धः ।
विबुद्धिः समृद्धिः प्रसिद्धिः प्रवृद्धिः
क्षतामः सुरामः प्रकामः प्रवामः ॥ ३

सहस्त्रच्छदस्योपरि स्थापितांह्रिद्वयाऽष्टापदस्येव पीताङ्गवर्णा ।
महाभूपसिद्धार्थसूनुप्रभूतप्रभावा वरं रातु सिद्धायिका वः ॥ ४

(६)

जिनशासनभासन ! श्रीगौतमगणधर ! गुणनिधान ! ।
जिनसमुदयसमयसुरप्रधान ! जयदीपालीध्येयाभिधान ! ॥ १

(चतुर्शः उच्यते)

पू.मु.श्री कमलविजयविरचिता

(७)

जय जयकरमङ्गलदीपक ! जिनवरवीर !-
श्रीगौतमगणधर ! । भवदवनीरदनीर ! ।
प्रवचनजनसमुदयसुन्दर सुरकोटीर !,
दीपालिकमलामालतिलकवरहीर ! ॥ १

(चतुर्शः उच्यते)

४३

## ॥ द्वितीयादिनस्तुतयः

(१) (शार्दूलविक्रीडित)

सैद्धार्थेय - सुमङ्गलासुतजिनो नन्दासुतस्तीर्थपः,
स्फूर्जत् श्रीवसुपूज्यनन्दनजिनस्सौदर्शनिः शङ्करः ।
एतेषां जनिकेवलाक्षरमयैः कल्याणकैः पाविता,
जाता या द्विजरेखया गुणवती प्रीत्यै द्वितीयाऽस्तु सा ॥ १

प्रोद्यत्पुण्य-सुधा-समुद्रलहरी-विस्तार-साधूदयं,
चञ्चच्चन्द्रकला कलापधवलं ध्वस्तान्धकारव्रजम् ।
त्रैलोक्यं सचराचरं झटिति यज्जन्मक्षणे जायते,
ते सर्वे द्युतिवृद्धये जिनवरास्सन्तु द्वितीयातिथौ ॥ २

मिथ्याज्ञानपलादवृन्ददलन-प्रह्वीभवच्छक्तिभृ-
च्छुद्धज्ञानदिनोदयाय लसती सन्मार्गसंसूचिका ।
हत्वाऽधोरुहमण्डलानि कुरुतां सत्शुद्धसङ्गीनि साऽ-
वक्राणां सुखद-प्रवृत्तिजनिका सिद्धान्तसूर्यच्छविः ॥ ३

अर्हद्भक्ति-समुत्सुका सुखजुषो वैमानिका व्यन्तरा,
ज्योतिष्का भुवनाधिपाश्च सततं देवा इमे सर्वदा ।
दिव्यत्प्रद्युतिभृद्गजादि-विजय-श्रेयो-लतामण्डपाः,
कुर्वन्तु प्रथितावदातविलसत्सद्बुद्धि-वृद्धि-श्रियः ॥ ४

(२) (द्रुतविलम्बित)

सकलविश्वसुसंमददे शुभे, परमपूज्यतरे द्वितीयादिने ।
समवलोक्य सुधांशुकलां जना,
जिनयुतां प्रणमन्ति मुदान्विताः ॥ १

सुमतिशीतलवास्वभिनन्दना-रजिननाथपवित्रभवादिभिः ।
शुचितरं चितरञ्जनसद्गुणं, तमभिनौमि सदा द्वितीयादिनम् ॥२

भगवता भवतापपयोमुचा-ऽनघवता परमे हि जिनागमे ।
सुनियतव्यवहारविमिश्रितो, द्विविधधर्मगुणोऽत्र प्रकाशितः ॥३

कमलकोमलवस्त्रविभूषितां, मदमतङ्गजचारुगमाञ्चिताम् ।
हरिगतां गतभीरहमम्बिकां, प्रतिदिनं विधिनेच्छितदां यजे ॥४

(३) (इन्द्रवज्रा)

सा सर्वदा पुण्यतमा द्वितीया, सर्वासु लोके तिथिषु प्रशस्या ।
यस्यां निरीक्ष्येन्दुकलां जिनेश,
बिम्बं च भावेन नमन्ति भव्याः ॥ १

तीर्थङ्कराणामभिनन्दनारा-दीनां बभूवुः खलु यत्र पञ्च ।
कल्याणकानि ह्यतिशङ्कराणि,
सा मे द्वितीयाऽर्च्यतरास्ति भव्या ॥ २

धर्मं हि मुक्तेः प्रबलैकहेतुं, तं तेनिरे देवनरासुराग्रे ।
यस्यां विशुद्धं द्विविधं जिनेशा-
स्तां नित्यमीडे सुतिथिं द्वितीयाम् ॥ ३

रक्ताम्बरा पद्मविशालनेत्रा, सिंहस्थिता देवगणैः समर्च्या ।
चक्रेश्वरी प्रोज्ज्वलचक्रहस्ता, पायात्सदा सद्विधिपक्षगच्छम् ॥४

## ॥ श्रीउद्योतपञ्चमीस्तुतयः ॥

पू.मु.श्री माणिक्यरत्नविजयविरचिता

(१) (स्रग्धरा)

श्रीनेमिः पञ्चरूपत्रिदशपतिकृतप्राज्यजन्माभिषेक-
श्चञ्चत्पञ्चाऽक्षमत्तद्विरदमदभिदापञ्चवक्त्रोपमानः ।
निर्मुक्तः पञ्चदेह्याः परमसुखमयः प्रास्तकर्मप्रपञ्चः,
कल्याणं पञ्चमीसत्तपसि वितनुतां पञ्चमज्ञानवान् वः ॥ १

सम्प्रीणन् सच्चकोरान् शिवतिलकसमः कौशिकाऽऽनन्दिमूर्तिः,
पुण्याब्धिप्रीतिदायी सितरुचिरिव यः स्वीयगोभिस्तमांसि ।
सान्द्राणि ध्वंसमानः सकलकुवलयोल्लासमुच्चैश्चकार,
ज्ञानं पुष्याज्जिनौघः स तपसि भविनां पञ्चमीवासरस्य ॥ २

पीत्वा नानाभिधाऽर्थामृतरसमऽसमं यान्ति यास्यन्ति जग्मु-
र्जीवा यस्मादनेके विधिवदमरतां प्राज्यनिर्वाणपुर्याम् ।
यात्वा देवाधिदेवाऽऽगमदशसुधाकुण्डमाऽऽनन्दहेतु-
स्तत्पञ्चम्यास्तपस्युद्यतविशदधियां भाविनामस्तु नित्यम् ॥ ३

स्वर्णाऽलङ्कारवल्गन्मणिकिरणगणध्वस्तनित्याऽन्धकारा,
हुङ्काराऽऽरावदूरीकृतसुकृतिजनव्रातविघ्नप्रचारा ।
देवी श्रीअम्बिकाऽऽख्या जिनवरचरणाऽम्भोजभृङ्गी समाना,
पञ्चम्यह्नस्तपोर्थं वितरतु कुशलं धीमतां साऽवधाना ॥ ४

पू.मु.श्री गुणविजयविरचिता

(२) (स्रग्धरा)

शैवेयः शङ्खकेतुः कलितजनमनस्संशयः सर्वकालं,
विश्वेशः सौवदेहद्युतिविजितघनः कर्मघर्माऽमृतांशुः ।
क्षान्त्याढ्यः कष्टदुष्टक्षयकरणपरो रैवतोत्तंसतुल्यः,
कल्याणं पञ्चमी सत्तपसि वितनुतां पञ्चमज्ञानवान् वः ॥ १

नाभेयत्रैशलेयप्रथमचरमकश्चन्द्रवच्चारुचञ्चन्-
मूर्तिः स्फूर्तिं दधानः प्रथयति कुमुदं यो बुधाह्लादहेतुः ।
प्रोद्दामच्छद्मपद्मा विकचकरकरः सत्कलावान्मनोज्ञो,
ज्ञानं पुष्याज्जिनौघः स तपसि भविनां पञ्चमीवासरस्य ॥ २

गीर्वाणाधीशपुंसां पतिकुसुममिदं पुण्यभाजो मनुष्या-
निर्वाणामेयसौख्यप्रबलफलमथो यत्प्रसादाल्लभन्ते ।
श्रीसार्वप्रौढशुद्धागमधरणिरुहः सिद्धिदानैकरक्त-
स्तत्पञ्चम्यास्तपस्युद्यतविशदधियां भाविनामस्तु नित्यम् ॥ ३

सम्पूर्णा पूर्णिमेन्दुप्रभसुभगगुणैर्दत्तदेवेन्द्रमाना-
प्रोद्यद्गन्धद्विपेन्द्रप्रचुरमदहरैणाधिपे राजमाना ।
श्रीअर्हद्भक्तिभावा विमलकजकरा भास्वदम्बाभिधाना,
पञ्चम्यह्नस्तपोऽर्थं वितरतु कुशलं धीमतां सावधाना ॥ ४

(३) (शार्दूलविक्रीडित)

पञ्चानन्तकसुप्रपञ्चपरमानन्दप्रदानक्षमं,
पञ्चानुत्तरसीमदिव्यपदवीवश्याय मन्त्रोपमम् ।
येन प्रोज्ज्वलपञ्चमीवरतपो व्याहारि तत्कारिणां,
श्रीपञ्चाननलाञ्छनः स तनुतां श्रीवर्धमानः श्रियम् ॥ १

ये पञ्चाश्रवरोधसाधनपराः पञ्चप्रमादाहराः,
पञ्चाणुव्रतपञ्चसुव्रतविधिप्रज्ञापनासादराः ।
कृत्वा पञ्चहृषीकनिर्जयमथ प्राप्ता गतिं पञ्चमीं,
तेऽमी सन्तु सुपञ्चमीव्रतभृतां तीर्थङ्कराः शङ्कराः ॥ २

पञ्चाचारधुरीणपञ्चमगणाधीशेन संसूत्रितं,
पञ्चज्ञानविचारसारकलितं पञ्चेषु-पञ्चत्वदम् ।
दीपाभं गुरुपञ्चमारतिमिरेष्वेकादशीरोहिणि-
पञ्चम्यादिफलप्रकाशनपटुं ध्यायामि जैनागमम् ॥ ३

पञ्चानां परमेष्ठिनां स्थिरतया श्रीपञ्चमेरुश्रियां,
भक्तानां भविनां गृहेषु बहुशो या पञ्चदिव्यं व्यधात् ।
प्रह्वे पञ्चजने मनोमतकृतौ स्वारत्नपाञ्चालिका,
पञ्चम्यादितपोवतां भवतु सा सिद्धायिका त्रायिका ॥ ४

(४) (शार्दुलविक्रीडित)

यः पञ्चेन्द्रियसक्तपञ्च-विषय-व्यापप्रपञ्चं स्फुरद् -
ध्यानास्त्रेण विजित्य पञ्च-विशिखं ज्ञानं श्रितं पञ्चमम् ।
चञ्चत्काञ्चनशृङ्ग-पञ्चकवरे श्रीरैवते पञ्चमीं,
लेभे यो गतिमाश्रये जिनपतिं तं पञ्चमीवासरे ॥ १

पञ्चैरावत-पञ्चभारत-भवा ये पञ्चरूपैः सुरा-
धीशैः पञ्चविदेहजा जिनवराः क्लृप्ताभिषेकोत्सवः ।
सौवर्णाचलपञ्चके विरचिते सङ्गीतपञ्च-ध्वनौ,
साफल्यं श्रुतपञ्चमीजतपसः कुर्वन्तु ते तीर्थपाः ॥ २

तान् प्रत्यूहकरान् प्रमादसहितान् पापाश्रवान् पञ्चधा,
हेयत्वेन तथा व्रतानि समितीश्चारित्रयुग्भावनाः ।

आचारान् खलु पञ्चधाऽवददुपादेयं समस्तं च यः,
स्वाध्यायैस्तदहं भजे श्रुततिथौ पञ्चप्रकारैः श्रुतम् ॥ ३

त्यक्तं दूषण-पञ्चकेन सहितं सद्भूषणैः पञ्चभिः,
सम्यक्त्वं शुभपञ्चलक्षणमसौ श्रिता गिरौ रैवते ।
पञ्चाङ्गं प्रणताऽस्तु नेमिपदयोः पञ्चाननस्थाम्बिका,
सा श्रीपञ्चमिकातपः-फलविधौ सान्निध्यदा सर्वदा ॥ ४

पू. पंन्यासमुक्तिविमलगणिविरचिता

(५) (शार्दूलविक्रीडित)

नम्राखण्डलमण्डलैः कृतमहाजन्माभिषेकस्ततः,
सत्कल्याणकवासरेषु भविनां दत्तं सुखं शोभनम् ।
सर्वाभीष्टसमूहदो जिनवरः श्रीनेमिनाथः सदा,
भूयात्केवलसिद्धये सुभविनां सत्पञ्चमीवासरे ॥ १

क्षेमानां नवकं (९) बभूव दिवसे चास्यां चतुर्विंशतौ,
क्षेत्राणां दशके शुभानि नवति (९०) र्जातानि तीर्थेशिनाम् ।
जातं सप्ततिसंयुतं शतयुगं (२७०) कालत्रयोद्भावितं,
तीर्थेशाः पृथुपञ्चमीसुदिवसे श्रेयःप्रदाः सन्तु ते ॥ २

अङ्गोपाङ्गविचारचारुरचनाचातुर्यनीरान्विता,
प्रोद्यत्सन्नयभङ्गकल्पकलनाकल्लोलमालालया ।
सद्वाणीदकदर्शनोदितमनःसद्द्रव्यचक्राञ्चिता,
सौभाग्योदयसद्गुणा विजयतां श्रीद्वादशाङ्गीनदी ॥ ३

स्वर्णाभा शुभसिंहवाहनधरा सद्रूपसन्निर्जित-
भ्राजन्निर्जरजातजातवनितारूपा सुरूपा वरा ।
श्रीनेमीशपदं सुमुक्तिविमलस्थानप्रदं सेवते,
देव्यम्बा कृतपञ्चमीसुतपसां दद्यान्नृणां मङ्गलम् ॥ ४

(६) (उपजाति)

समुद्रभूपालकुलप्रदीपः, संसारवार्द्धौ विपुलान्तरीपः ।
श्रीपञ्चमीपुण्यतपोनिलीनं, शिवाङ्गजोऽव्याज्जनमात्मलीनम् ॥१

वितेनिरे मेरुगिरौ वितन्द्रा, येषां मुदा जन्ममहं महेन्द्राः ।
रक्षन्तु ते पञ्चमिकातपस्थं, विघ्नौघभित्तीर्थकृतो भवस्थम् ॥२

चकार यं पञ्चमगच्छनेता, यः पापभारस्य सदाऽपनेता ।
स आगमः पञ्चमिकातपस्थं, करोतु पूर्णं त्रिजगन्नमस्यम् ॥ ३

प्रयाति या नेमिगिरौ विनीता, सिंहेऽधिरूढाऽस्तु तमोनिहन्त्री ।
श्रीपञ्चमीचारुतपो ममाऽम्बा, पुष्णातु देवी जगतः किलाम्बा॥४

(७) (वसन्ततिलका)

आराधयन्तु भविका भवभावमुक्ता,
योगत्रयेण विमलेन मनोऽभिरामम् ।
ज्ञानं विशुद्धतममप्रतिमं हि शुद्धे,
सत्पञ्चमीतिथिदिने जिनराजदिष्टे ॥ १

यस्यामुपास्य खलु नाभिसुतादयोऽपि,
तीर्थाधिपा जगति तीर्थकरत्वमापुः ।
ज्ञानं क्रियासहितमिज्यतरं तदेकं,
आराधयामि सुतिथिं खलु पञ्चमीं ताम् ॥ २

चारित्रसद्गुणगणा विमलाश्च वृद्धिं,
ज्ञानेन यान्ति परमादरतो हि यस्यां ।
आचार्यपाठकपदं स्थवीरत्वमेव,
सम्प्राप्नुवन्ति भविका भज पञ्चमीं ताम् ॥ ३

ज्ञानाग्निना हि भविकाः प्रबलेन यस्यां,
कर्मेन्धनानि निबिडानि विदह्य शीघ्रम् ।
पूर्वार्जितानि परमं पदमाप्नुवन्ति,
चक्रेश्वरीचरणपङ्कजपूजकाश्च ॥ ४

(८) (इन्द्रवज्रा)

तीर्थङ्कराणां प्रभवादिकैर्या, कल्याणकैः पञ्चविधैः पवित्रैः ।
पूज्यत्वमाप्ता हि सदा त्रिलोके, सा पञ्चमी पङ्कमपाकरोतु ॥१

या ज्ञानसंसाधनसौम्यकार्ये-ऽग्रीयं पदं पूज्यतरं प्रपन्ना ।
कुर्यात्सहायं हि ममाल्पबुद्धेः, सा पञ्चमी पुण्यतिथिः प्रसिद्धा॥२

तस्यां तिथौ पञ्चमहाव्रतानि, भव्या भवन्तो भवतारकाणि ।
तीर्थङ्करोक्तानि च सन्निषेव्य, लभध्वमर्हन्त, इवापवर्गम् ॥ ३

चक्रेश्वरी चक्रविभूषिताग्र्य-हस्ता प्रसन्नाम्बुजरम्यनेत्रा ।
सम्पूजिता भक्तजनैरसङ्ख्यैः, पायादपायादचलस्थितं माम् ॥४

(९)

केसरी दुरित-दुष्ट-दन्तिनः, श्री-समुद्रविजयाङ्गजो जिनः ।
धीमतां विशद-पञ्चमी-तपः, कुर्वतां दिशतु पुण्यसम्पदः ॥१

ये विलीन-घनकर्म-विकारा, ये जिना गतभवार्णवपाराः ।
ते दिशन्तु सततं विमलानि, पञ्चमी-दिनकृत-सुकृतानि ॥ २

यज्जडत्वतिमिरौघभास्करं, श्रीजिनेन्द्रवदनादिव निर्गतम् ।
पापहारि सितपञ्चमीदिने, विश्रुतं श्रुतमहं नमामि तत् ॥ ३

रैवताचलशिरःकृतवासा, तनुज-युग्मसहिता हरियाना ।
अम्बिका श्रुतनिधौ प्रयतानां, सर्वदैव दुरितानि निहन्यात् ॥४

(१०) (शार्दूलविक्रीडित)

संपत्ता समसुक्खपंचमगइ रुद्धोरुपंचासवो,
सज्जो निज्जिअ-पंचबाण-सुहडो मोहेभपंचाणणो ।
पंचंगप्पणिवाय-पुव्वमिह जो भव्वेहिं निव्वन्निओ,
सो नेमी सुअपंचमीइ दिवसे सिग्घं अविग्घं तवे ॥ १

जे कल्लाणगपंचगे वि तिअसाधीसेहि संसेविआ,
जे पंचिंदिअ-निग्गहेण विसए पंचाविजेउं खमा ।
पंचायारधरा य पंचसमिआ चारित्तमुद्दाइ जे,
ते देवा जणयंतु पंचमितवे भत्ताण नाणुन्नइं ॥ २

जेणं पंचमहव्वया सुगुरुआ लीलाइसंधारिआ,
जे मेरु इव पंच पंचमगइ-सुक्खाण खाणी समा ।
जेणं पंचममंगवीर-पहुणो दिट्ठो गणिंदेण जो,
सो नाणं विअरेउ पंचमितवे सत्ताण सुद्धागमो ॥ ३

आरुढा किरपिट्ठिदेसमसमं पंचाणणस्सेह जा,
धारेइ सुअमङ्कमङ्गुलिकडे जा पंचसाहे निए ।
अन्नं पंचजणेण संथुअपया पुत्तं कडीए ठिअं,
सा अंबा सुअपंचमीतवविहिं सत्तेसु दिज्जा सुहं ॥ ४

४५

## ॥ श्रीअष्टमीतिथिस्तुतयः ॥

(१) (वसन्ततिलका)

कृत्वाष्टमङ्गलिकवर्गममर्त्यनाथ-
स्तीर्थाधिपं सुरगणैः पुरतः सिषेच ।
तीर्थोदकैः कनककुम्भभृतैश्च यस्यां,
सा मेऽष्टमी भवतु कर्मविपक्षहन्त्री ॥ १

यत्रोपवासवर सद्व्रतशुद्धदेहो,
भक्त्या भवाम्बुनिधिपारगतं परेशम् ।
कर्माष्टवैरिदलनाय महाप्रभावं,
तीर्थाधिपं गतमदाष्टमहं नमामि ॥ २

स्थित्वा सुराधिपतिना रचिते मनोज्ञे,
स्वर्णासने विविधरत्नविभासिते च ।
भव्यान् गभीरगिरया प्रतिबोधयन्तं,
नम्रोऽष्टमीतिथिदिने जिननाथमीडे ॥ ३

सम्पूजयामि विधिनाष्टविधार्चनाभिः,
चित्ते निधाय खलु चक्रधरां च देवीम् ।
संसारतारकमनन्तबलं जिनेशं,
ज्ञानामृतेष्टरसपूर्णविभासमानम् ॥ ४

(२) (वसन्ततिलका)

यस्यां सुराधिपतयो बहुभावयुक्ताः
कृत्वोज्ज्वलैर्हि पुरतोऽष्ट सुमङ्गलानि ।
मुक्ताफलैर्जिनपतिं प्रणमन्ति भक्त्या,
भूयाद्धि सा भवविनाशकराष्टमी मे ॥ १

कर्माष्टवैरिदलनाय जिनाभिषेकं,
कृत्वा सुराद्रिशिखरे विधिना सुरेशाः ।
क्षीराम्बुभिः कनककुम्भभृतैश्च यत्र,
पूज्यत्वमापुरतुलं समहं पवित्रैः ॥ २

विश्वस्तुतं विगलिताष्टमदं महेशं,
स्पर्शाष्टहीनमखिलैश्च सुप्रातिहार्यैः ।
विभ्राजमानमभिनौमि जिनाधिनाथं,
तस्यामनन्तभवपङ्कविशोधनाय ॥ ३

कृत्वा तपः सुविधिना विमले स्वचित्ते,
नित्यं विचार्य खलु जीवदयां विशिष्टे ।
जैनेन्द्रशासनधराकृपया जिनेश-
मस्यां स्मरामि हृदये ह्यचलस्थितोऽहम् ॥ ४

(३) (शार्दूलविक्रीडित)

श्रीमद्वीरजिनेश्वरेण कथितं श्रीगौतमाग्रे मुदा,
भव्या ये भवभीतिभेदनपरा आराधयन्त्यष्टमीम् ।
गच्छन्तो गतिमष्टमीं सुभविनः सिद्धाष्टसंसिद्ध्यो,
जायन्ते सुखिनोऽष्टमी शुभतिथिर्जीयाज्जगत्यां सदा ॥ १

यद्धस्त्रे कुशलानि केवलिभृतां जातानि भूयांस्यपि,
चात्रैकादश (११) भारते समभवन्
दिङ्मानयुक्तं शतम् (११०) ।
क्षेत्राणां दशके त्रिकालगुणिते जातं शतानां त्रयं,
(३३०) त्रिंशत्संयुतमष्टमीपृथुतिथौ तीर्थेश्वराः पान्तु वः ॥ २

अङ्गानीश (११) मितानि भास्करमिता (१२)
न्युक्तान्युपाङ्गानि च,
प्रोक्तान्येव दश (१०) प्रकीर्णकवराणि च्छेदसूत्राणि (६) षट् ।
प्रोक्तं मूलचतुष्टयं (४) जिनवरैः श्रीनन्दिसूत्राऽनुयुग्-
योगद्वारवरौ भवन्तु भविनां भव्याय सम्भूयसे ॥ ३

लोकालोकविलोकिकेवललसत्साम्राज्यलक्ष्मीभृतः,
श्रीमद्वीरजिनेश्वरस्य चरणद्वन्द्वं नमन्ती सुरी ।
सौभाग्योदययुक्तमुक्तिविमलप्रोल्लासपद्याजुषां,
भूयाद्धूरिशुभाष्टमीवरतिथौ सिद्धायिका सिद्धये ॥ ४

४६

# ॥ श्रीमौनएकादशीस्तुतयः ॥

(१) (स्रग्धरा)

श्रीभाग् नेमिर्बभाषे जलशयसविधे स्फूर्तिमेकादशीयां,
माद्यन्मोहावनिद्रप्रशमनविशिखः पञ्चबाणाऽर्चिरर्णः ।
मिथ्यात्वध्वान्तवान्तौ रविकरनिकरस्तीव्रलोभाद्रिवज्रं,
श्रेयस्तत्पर्व वः स्ताच्छिवसुखमिति वा सुव्रतश्रेष्ठिनोऽभूत् ॥१

इन्द्रैरभ्रभ्रमद्भिर्मुनिपगुणरसाऽऽस्वादनाऽऽनन्दपूर्णै-
र्दीव्यद्भिः स्फारहारैर्ललितवरवपुर्यष्टिभिः स्ववर्धूभिः ।
सार्धं कल्याणकौघो जिनपतिनवतेर्बिन्दुभूतेन्दुसङ्ख्यो,
घस्रे यस्मिन् जगे तद्भवतु सुभविनां पर्व सच्छर्महेतुः ॥ २

सिद्धान्ताब्धिप्रवाहः कुमतजनपदान् प्लावयन् यः प्रवृत्तः,
सिद्धिद्वीपं नयन् धीधनमुनिवणिजः सत्यपात्रप्रतिष्ठान् ।
एकादश्यादिपर्वेन्दुमणिमतिदिशन् धीवराणां महार्घ्यं,
सन्न्यायाम्भश्च नित्यं प्रवितरतु स नः स्वप्रतीरे निवासम् ॥ ३

तत्पर्वोद्यापनार्थं समुदितसुधियां शम्भुसङ्ख्या-प्रमेया-
मुत्कृष्टां वस्तुवीथिमभयदसदने प्राभृतीकुर्वतां ताम् ।
तेषां सव्याऽक्षपादैः प्रलपितमतिभिः प्रेतभूतादिभिर्वा,
दुष्टैर्जन्यं त्वजन्यं हरतु हरितनुर्न्यस्तपादाऽम्बिकाऽऽख्या ॥४

(२)

एकादशीं यः किल मार्गशीर्षे, कल्याणक-प्रौढ-तिथिं दिदेश ।

कृष्णाय तृष्णाऽब्धिघटोद्भवाभः,
कल्याण-वृद्धिं स तनोतु नेमिः ॥ (इन्द्र.) १

एकादशी-वासर-सन्निबद्धैः, कल्याणकैर्ये जगतीमरक्षन् ।
कल्याण-सिद्धिं रचयन्तु ते न-
स्तीर्थङ्कराश्चित्तरसातिशुद्ध्या ॥ (उप.) २

एकादशीघस्त्रमहाप्रभावः, संवर्णितो यत्र विवेकरम्यः ।
तमागमं मोहतमो-निरास-भास्वत्प्रकाशं विनयेन वन्दे ॥(उप.)३

एकादशी दिव्यतपः समाधौ, या विघ्नजातं भविनां निहन्ति ।
शैवेयदेवाऽङ्घ्रि-सरोजभृङ्गी,
सा मेऽम्बिका रातु यशोऽभिवृद्धिम् ॥ (इन्द्र.) ४

(३) (शार्दूलविक्रीडित)

दीक्षा श्रीअरनाथकस्य नमिपस्तज्ज्ञानमुद्योतकं,
श्रीमल्लेः प्रसवं मुनिव्रतधरं कैवल्यमाप्तं च सत् ।
मासे मार्गशिरः सिते सुखकरे एकादशीतत्तिथौ,
भूमौ पञ्चकमाकरोतु भविनां कल्याणकानामदः ॥ १

गीर्वाणा-सुरनाथवृन्दमहिताः संसारपर्यन्तगाः,
आनन्त्या परभावखेदरहिताः सन्मार्गसंदर्शिनः ।
जैनाः पारगताः प्रमादरहिताः सिद्धाश्चतुर्विंशतिः,
तेऽमी शान्तिकरा दिशन्तु भविनां सौख्यं घनं मौक्तिकम् ॥२

अर्थेनादिशितं सदा भगवता सिद्धान्तमाध्यात्मिकं,
हेयाऽऽदेयपदार्थसार्थसहितं सत्कृत्य-संस्कारकम् ।
निक्षेपादिभिरन्वितं गणधरेणासूत्रितं त्वक्षरैः,
तं भव्या हृदि धारयन्ति सततं ते प्राप्नुवन्त्यव्ययम् ॥ ३

अर्हद्वक्त्रकजे स्थितिर्भगवती सद्द्वादशाङ्गोद्भवा,
स्याद्वादं मदशैलभञ्जनपविं व्यालोकयन्ती पृथक् ।
कुर्वन्ती भविनां शिवं च मतिदा सम्यक्त्वदात्री नृणां,
सा जैनी श्रुतिवाग्, ददातु रुचिरं ज्ञानस्य लाभं सदा ॥ ४

(४) (शार्दूलविक्रीडित)

कस्मिंश्चित्समये समुद्रविजयक्षोणि-विभोर्नन्दनः,
श्रीनेमिः सफलां सृजन् वनभुवं श्रीद्वारवत्याः पुरः ।
श्रीमच्छ्रीपतिवासव-प्रभृति-सत्सामाजिकानां पुरो,
व्याख्याति स्म विधिं यदीयमतुलं सैकादशी श्रेयसे ॥ १

सर्वे तीर्थकराः सुरार्चित-पदा आनन्द-कन्दायिताः,
प्रोद्यत्पर्षदि हर्षतो गणधरा व्याख्यानयन्तीत्यमी ।
पुष्पैः वल्लरीव प्रभूतभगवत्कल्याणकैः सूज्ज्वला,
या जाता जगति प्रसिद्ध-सुषमा सैकादशी सेव्यताम् ॥ २

वागीशोऽपि विवेचितुं न समभूत् शक्तो यदीय-प्रथां,
मैत्री-तुष्टिरमाश्रयां कलिमलप्रध्वंस-बद्धादराम् ।
सिद्धान्ते प्रकटीकृतामनुपमां तीर्थाधिपैः तूष्टये,
सत्त्वानां विपुलार्थसार्थ-जननी सैकादशी स्तात् ध्रुवम् ॥ ३

देवीवृन्दविराजिता भगवती श्री अम्बिकैकादशी,
भक्ति-प्रह्वजनप्रमोद-वसतिः प्रत्यूह-विध्वंसिनी ।
स्फाति-ख्यातिलसज्जयादि-विजयो-द्योति-प्रभामण्डला,
पुष्यात् सौख्यमखण्डितं भवभृतां लीलोल्लसद्भारती ॥ ४

(५) (शिखरिणी)

अरस्य प्रव्रज्या नमिजिनपतेर्ज्ञानमतुलं,
तथा मल्लेर्जन्म व्रतमपमलं केवलमलम् ।
वलक्षैकादश्यां सदसि लसदुद्दाममहसि,
क्षितौ कल्याणानां क्षपतु विपदः पञ्चकमदः ॥ १

सुपर्वेन्द्रे श्रेण्यागमनगमनैर्भूमिवलयं,
सदा स्वर्गत्येवाहमहमिकया यत्र सलयम् ।
जिनानामप्यापुः क्षणमतिसुखं नारकसदः,
क्षितौ कल्याणानां क्षपतु विपदः पञ्चकमदः ॥ २

जिना एवं यानि प्रणिजगदु-रात्मीयसमये,
फलं यत्कर्तृणामिति च विदितं शुद्धसमये ।
अनिष्टारिष्टानां क्षितिरनुभवेयुर्बहुमुदः,
क्षितौ कल्याणानां क्षपतु विपदः पञ्चकमदः ॥ ३

सुराः सेन्द्राः सर्वे सकलजिनचन्द्रप्रमुदिताः,
तथा च ज्योतिष्काखिलभुवननाथाः समुदिताः ।
तपो यत्कर्तृणां विदधति सुखं विस्मितहृदः,
क्षितौ कल्याणानां क्षपतु विपदः पञ्चकमदः ॥ ४

(६) (इन्द्रवज्रा)

एकादशी पुण्यतमेति नाथ, लोके कथं पर्वतया प्रसिद्धा ।
पृष्टो सभायां हि जिनाधिनाथो, नम्रेण कृष्णेन जगाद नेमिः ॥१

बभूवुरस्यां बहवो जिनानां, कल्याणपर्वोत्सवका हि लोके ।
भक्तिप्रयुक्तैर्नृसुराधिनाथैः, कृताश्च सा तेन सुपुण्यपूज्या ॥ २

एकादशाङ्गानि हि नूतनानि, सोपस्कराण्यत्र पवित्रदेशे ।
संस्थापयित्वा विधिना प्रपूज्य, कुर्यात्समुद्यापनमेव भव्यः ॥३

एवं जनो यः प्रकरोति चैका-दशीवृतोद्यापनमत्र लोके ।
स्थानं च सच्छासनदेवीपूर्ण-कृपाभराद्यात्यचलं पवित्रम् ॥ ४

(७) (इन्द्रवज्रा)

तीर्थाधिपानां च्यवनादिभिर्या, कल्याणकैः पुण्यतरैरमेयैः ।
सर्वासु लोके तिथिषु प्रशस्या,
ह्येकादशी सा शिवदास्तु मह्यम् ॥ १

मौनोपवासेन पवित्रिताङ्गा, मार्गस्य शुक्ले दिवसे तु तस्याः ।
जपन्तु भव्याः परमेष्ठिमन्त्रं, माला शतेनार्धशतेन साद्र्धम् ॥२

आराध्य यस्यां मनुजा जिनेशं, व्रतोपवासादिभिः सत्क्रियाभिः।
देवेन्द्रतामाशु समाप्नुवन्ति, मुक्तिरमां नित्यसुखप्रदां वा ॥ ३

जिनेश्वरोद्भाषितधर्मरम्यं, महाप्रभावा शमितारिवर्गम् ।
चक्रेश्वरी शारदचन्द्रवर्णा, पायाद्गणं सद्विधिनामधेयम् ॥ ४

(८)

श्रीमल्लिजिनजन्मसंयममहाज्ञानं लह्या जे दिने,
ते एकादशी वासरा शुभकरा कल्याणमालालय ।
वैदेहेश्वरकुम्भवंशजलधि,-प्रोल्लासने चन्द्रमा,
माता यस्य प्रभावती भगवती, कुम्भध्वजोऽवाज्जिनः ॥ १

ज्ञानं श्रीऋषभाजितौ च सुमतेः, प्रादुर्भवं शंभवे,
पार्श्वारौ चरणं च मोक्षमगमत्, पद्मप्रभाख्यप्रभुः ।

इत्येतद्दशकं च यत्र दिवसे, कल्याणकानां शुभं,
जातं संप्रति वर्तमानजिनपाः प्राहुर्महामङ्गलम् ॥ २

सांगोपाङ्गमनन्तपर्यवगणोपेतं सदोपासकै-
कादश्यः प्रतिमाश्च यत्र गदिताः श्रद्धावतां तीर्थपैः ।
सिद्धान्ताभिधभूपतिर्विजयते, बिभ्रत्सदेकादशा-
चाराङ्गादिमयवपुर्विलसतां, भक्त्या नुतो भाविनाम् ॥ ३

वैरोट्या विदधातु मङ्गलततिं सद्दर्शनानामिह,
श्रीमन्मल्लिजिनेशशासनसुरः कुबेरनामा पुनः ।
दिक्पाल-ग्रहलक्षदक्षनिवहा सर्वापि या देवता,
सा सर्वा विदधातु सौख्यमतुलं ज्ञानात्मनां सूरीणाम् ॥ ४

(९) (शार्दूलविक्रीडित)

भव्वाणेग-समिहियत्थकरणं गोवद्धणाराहियं,
सम्माहप्पतिहिं कुमग्गमहणं सग्गापवग्गापयं ।
मोणिक्कारसिपव्वमुत्तमतमं जेणप्पसिद्धीकयं,
सो नेमी जयउ तिलुक्कसरणं सिद्धो अ बुद्धो सयं ॥ १

मोणिक्कारसि-वासरे सुहकरे जेसिं लसन्नाणिणं,
कल्लाणाणि कलंकपंक-हरणे नीरप्पभाणि फूडं ।
आसं सुद्धसयं जणुव्वय-महानाणप्पयाणिव्विणो
ते भद्दं वियरंतु वो जिणवरा सिद्धिगणासंगिणो ॥ २

जो माहप्पपयासगो सुरसरीकल्लोलमालुज्जलो,
मोणिक्कारसिवासरस्सयसुहा साउव्वमो निम्मलो ।
वादिंदा विहलीकया कुमइणो जेणुद्धुरा दुम्मया,
सव्वन्नूसमउं हरेउ विमउं विग्घं स सिग्घं सया ॥ ३

अंभोजम्मकुरंग-चारुनयणा पुण्णिंदुतुल्लाणणा,
मोणिक्कारसि-पव्वतिव्वरसिणं सव्वाण भव्वङ्गिणं ।
जा सोहग्ग अभग्ग सग्गुणसिरि वित्थारयंति घणं,
सा कल्लाणकरा करेउ सययं अम्माण अंबासुरी ॥ ४

४७

## ॥ वीशस्थानकतपस्तुतिः ॥

(१) (मन्दाक्रान्ता)

भव्याः पुण्यं शमगुणरताः सम्प्रकुर्वन्तु लोके,
पूज्यं प्रेम्णा भवभयहरं विंशतिस्थानकस्य ।
अत्युत्कृष्टं विविधतपसां सत्तपस्तापमुक्ताः,
सच्छास्त्रोक्तामलसुविधिना मोक्षलक्ष्म्येकहेतोः ॥ १

अर्हन्ताद्यैर्निजगुणयुतैर्द्वादशाद्यैः पवित्रैः,
संसाराब्धौ प्रवहणसमैर्नित्यमासंश्रितानि ।
सेवन्तां विंशतिपदपदान्युग्रभक्त्या हि भव्या,
गुर्वादेशाद्विरचितवृताः शुद्धभावप्रयुक्ताः ॥ २

सम्पूज्यादौ प्रतिदिनमलं शुद्धबुद्ध्या जिनेशं,
निर्मायाग्रे गुणगणसमान् स्वस्तिकांश्चाक्षतैर्हि ।
कायोत्सर्गान् प्रतिपदमता मालिका विंशतिं वा,
कुर्वन्त्वेवं वृतविधिमहो तत्तपोवासरेषु ॥ २

इत्थं कृत्वा शमगुणयुता विंशतिस्थानकस्य,
भव्या जैनागमसुविधिना सत्तपो भावयुक्ताः ।
निर्धूयानेकभवजनितं पापपुञ्जं ह्यनल्पं,
शीघ्रं मुक्तेरचलपदवीं निर्विकारां प्रयान्ति ॥ ४

४८

## ॥ श्रीसमवसरणस्तुतिः ॥

(१) (वंशस्थ)

सुरास्तु संमिल्य चतुर्विधा मुदा, सुवर्णरत्नप्रकरैर्मनोहरम् ।
शालत्रयं योजनभूमिसंस्थितं, कुर्वन्ति सिंहासनसंयुतं शुभम् ॥१

निषद्य तीर्थाधिपतिश्चतुर्मुखो, नवीनजीमूतगभीरया गिरा ।
प्रबोधयन् भव्यजनान् विराजते,
सुप्रातिहार्याद्यभिशोभितोऽभितः ॥ २

जिनेशतुल्यां हि चतुर्विधिर्जिना-गमोक्तनिक्षेपगणैर्जिनेशितुः ।
विचिन्त्य मूर्तिं भविकाः सुखप्रदां,
भजध्वमेनां शुभभावतोऽनिशम् ॥ ३

ददातु मह्यं विधिना सुसेविता, जिनेश्वरस्याचर्यतमा सरस्वती ।
भवौघविच्छेदकरा सुधोपमा, निवासवासं प्रवरं सुनिश्चलम् ॥४

४९

पू.आ. श्री जिनप्रभसूरिकृताः

## ॥ श्रीमथुरास्तूपस्तुतयः ॥

(अनुष्टुप्)

श्रीदेवनिर्मितस्तूपशृङ्गारतिलकश्रियौ ।
सुपार्श्व-पार्श्वतीर्थेशौ क्लेशं नाशयतां सताम् ॥ १

प्रमोदसंमदं पादपीठी लुठदधीश्वराः ।
कर्मालिनलिनीचन्द्राः (जिनेद्रां?) संभवन्तु वः ॥ २

मिथ्यात्वविषविक्षेपदक्षं सुमनसां प्रियम् ।
जिनास्यजलदे (नित्यं?) जीयात् प्रवचनामृतम् ॥ ३

विघ्नौघघातने निघ्ना मधूपघ्नशिरस्थिता ।
कुबेरा नरमारूढा मूढभावं भिनत्तु नः ॥ ४

## સ્તોત્રસંદેશમાલાના ૨૦ ભાગમાં આવેલા છંદોની યાદી

अचलधृति
अतिधृति
अतिशर्करी
अतिशायिनी
अतिरुचिरा
अनङ्गशेखर
अनुष्टुप्
अपरनाराचक
अपरललितक
अपरवक्र
अपराजिता
अपरान्तिका
अभिमुखी
अवितथ
अशोकपुष्पमञ्जरी
अष्टि
असम्बाधा
आख्यानकी
आपातलिका
आर्या

आर्यागीति
आलिंगनक

इन्द्रवंशा
इन्द्रवज्रा

उज्जवल
उत्कलिका
उदयम्
उद्गता
उद्धत
उपचित्रा
उपजाति
उपेन्द्रवज्रा
उर्वशी

ऋषभ
ऋषभगजविलसित

एकावली
औपच्छन्दसका-
परान्तिका

औपच्छन्दसिक

कन्या
कामक्रीडा
कामबाण
किसलयमाला
कुटज
कुटील
कुसुमलता
कुसुमविचित्रा
कुसुमितलता
कुसुमितलतावेल्लिता
केकीरव
केसर
क्रीडनक

क्षिसक

खिज्जित

गाहा
गीतपद्धति
गीति
गुणमणिनीकर

चन्दनप्रकृति
चन्द्रवर्त्म
चन्द्रलेखा
चन्द्रिणी
चपलम्
चम्पकमाला
चलधृति
चलम्
चित्रमाला
चित्रलेखा
चित्राक्षरा
चूडामणि

छाया

जगती
जया

जयानन्द
जलधरमाला
जलोद्धतगति

तामरस
तोटक
त्रिभङ्गी

दण्डक
(अर्णवदण्डक
उद्दामदण्डक
गगनदण्डक
चण्डवृष्टिदण्डक
प्रयातदण्डक
महादण्डक
सुरामदण्डक)
दयाविमल
दीपक
दोधक
दोहा
द्रुतविलम्बित

द्विपदी

धृति

नगस्वरूपिणी
नन्दितक
नन्दिनी
नर्कुटक
नवमालिनी
नाराचक
नारी
निशा

पङ्क्ति
पञ्चकावली
पञ्चचामर
पत्रपतितं
पथ्या
पथ्यावक्त्र
पद्म
पद्धतिका
पादाकुलक

पुष्पदाम
पुष्पिताग्रा
पृथ्वी
प्रकृति
प्रमिताक्षरा
प्रभावती
प्रबोधिता
प्रमाणिका
प्रमुदितवदना
प्रियंवदा
प्रहरणकलिका
प्रहर्षिणी

बृहती

भद्रक
भद्रिका
भाराक्रान्ता
भासुरक
भुजगशशभृता
भुजङ्गपरिरिङ्गितक
भुजङ्गविजृम्भित
भुजङ्गप्रयात
भ्रमरविलसिता

मञ्जुभाषिणी
मणिगुणनिकर
मणिमध्य
मत्तक्रीडा
मत्तमयुर
मत्ता
मत्तेभविक्रीडित
मदनावतार
मदिरा
मधुनामा
मधुमती
मन्दाक्रान्ता
ममातिशायिनी
महास्रग्धरा
मागधिका
माणवक
मालभारिणी
मालाचित्र
मालिनी
मुखमोटनक
मेघमाला
मेघविस्फूर्जिता
मोटनक
मौक्तिकदाम
मौक्तिकमाला
मृगचपला
मृगी
मृदका
मृदङ्गक

युगलम्
युग्मविपुला

रत्नमाला
रथोद्धता
रमणा
रासकनन्दितक
रासकलुब्धक
रुक्मवती
रुचिता
रुचिरा

लक्ष्मी
ललितक

ललिता

वंशपत्रप्रतितं
वंशस्थ
वक्त्र
वनमञ्जरी
वसन्तचामर
वसन्ततिलका
वस्तु
वस्तुवदन
वाणिनी
वानवासिका
विद्युद्विलसित
विद्युन्माला
विभावरी
विभ्रमगति
वियोगनी
विषम
वेगवती
वेष्टक
वैतालीय
वैश्वदेवी
वृन्दारक

श्री
श्लोको
शङ्ख
शरभललित
शर्करी
शशिलेखा
शशिवदना
शशीकला
शार्दूलविक्रीडित
शालिनी
शिखरिणी
शुद्धविराट्
शोभा
श्येनी

संगतक
सान्द्रपदं
सिंहोद्धता
सिद्धि
सुदन्त

सुधा
सुधाकळश
सुन्दरम्
सुप्रभा
सुभद्रामालिनी
सुमति
सुमुख
सुवदना
सोपानक
सोमराजी
सौभाग्यविमल
स्रग्धरा
स्रग्विणी
स्त्री
स्वागता

हंसमाला
हंसलयं
हंसी
हक्काषट्पदी
हरिगीत
हरिणी

# शास्त्रसंदेशना प्रकाशनो

१. पू.आ.श्री हरिभद्रसूरीश्वराणां कृतयः-१

२. पू.आ.श्री हरिभद्रसूरीश्वराणां कृतयः-२

३. पू.आ.श्री हरिभद्रसूरीश्वराणां कृतयः-३

४. पू.उपा.श्री यशोविजयगणिवराणां कृतयः-१

५. पू.उपा.श्री यशोविजयगणिवराणां कृतयः-२

६. शतकसंदोहः

७. कुलयसंग्गहो

८. भावणासत्थणिअरो

९. भावनाशास्त्रनिकरः

१०. आयारसत्थणिअरो

११. आचारशास्त्रनिकरः

१२. काव्योपदेश-ज्ञातोपदेशग्रन्थनिकरौ

१३. प्रारम्भिकाणि कार्मग्रन्थिकाणि लोकप्रकाशीयानि च प्रकरणानि

१४. अन्तिमाराधनाग्रन्थाः

१५. आगमिकानि प्रकरणानि तथा प्रकीर्णकानि

१६. दार्शनिक-चर्चा ग्रन्थनिकरौ:

१७. विविधविषयसंकलनाग्रन्था:

१८. ध्यानयोग-गणित-व्याकरणशास्त्रनिकरा:

१९. वैराग्य कल्पलता-१

२०. वैराग्य कल्पलता-२

२१. शतक - कुलक - भावना - चर्चाग्रन्थनिकर:

२२. आचार - प्रारम्भिक-नाममाला-
व्याकरणशास्त्रनिकर:

२३. कार्मग्रन्थिक-लोकप्रकाशीयग्रन्थनिकर:

२४. पू.आ.श्री हेमचन्द्रसूरीश्वरविरचितनाममाला

२५. आगमपद्यानाम् अकारादिक्रमेण अनुक्रमणिका-१

२६. प्राकृतपद्यानाम् अकारादिक्रमेण अनुक्रमणिका-२

२७. संस्कृतपद्यानाम् अकारादिक्रमेण अनुक्रमणिका-३

२८. त्रिषष्टिशलाकापुरुषचरित्र श्लोकानाम्
अकारादिक्रमेण अनुक्रमणिका-४

२९. संवेगरंगशाला

३०. शास्त्रसंदेशमाला-भाग-२५

३१. शास्त्रसंदेशमाला-भाग-२६

३२. स्तोत्र संदेशमाला-१
अर्हदादिसहस्त्रनामसमुच्चय:

३३. स्तोत्र संदेशमाला-२
अनेककर्तृकृतचतुर्विंशतय:

३४. स्तोत्र संदेशमाला-३
बहुकर्तृकृतानेकस्तोत्रसमुच्चय:

३५. स्तोत्र संदेशमाला-४
श्रीपंचपरमेश्वर-गणधराणां स्तोत्राणि

३६. स्तोत्र संदेशमाला-५
कल्याणक-छायापूर्तिस्तोत्राणि

३७. स्तोत्र संदेशमाला-६
चतुर्विंशतिजिनस्तोत्राणि

३८. स्तोत्र संदेशमाला-७
श्रीआदिनाथजिनस्तोत्राणि

३९. स्तोत्र संदेशमाला-८
श्रीनेमिनाथजिनस्तोत्राणि

४०. स्तोत्र संदेशमाला-९
श्रीपार्श्वनाथजिनस्तोत्राणि-१

४१. स्तोत्र संदेशमाला-१०
श्रीपार्श्वनाथजिनस्तोत्राणि-२

४२. स्तोत्र संदेशमाला-११
श्रीपार्श्वनाथजिनस्तोत्राणि-३

४३. स्तोत्र संदेशमाला-१२
श्रीमहावीरस्वामिजिनस्तोत्राणि

४४. स्तोत्र संदेशमाला-१३
शेष तीर्थंकरजिनस्तोत्राणि

४५. स्तोत्र संदेशमाला-१४
सामान्यजिनस्तोत्राणि

४६. स्तोत्र संदेशमाला-१५
पञ्चपरमेष्ठि-सिद्धचक्राणांस्तोत्राणि

४७. स्तोत्र संदेशमाला-१६
शाश्वताशाश्वततीर्थानांस्तोत्राणि

४८. स्तोत्र संदेशमाला-१७
सम्यग्दृष्टिदेव-देवीनां स्तोत्राणि

४९. स्तोत्र संदेशमाला-१८
पू.आचार्यादियोग्यमन्त्रस्तोत्राणि

५०. स्तोत्र संदेशमाला-१९
स्तुतयः-१

५१. स्तोत्र संदेशमाला-२०
स्तुतयः-२

# स्तोत्रसंदेशमाला

१ अर्हदादिसहस्रनामसमुच्चयः
२ अनेककर्तृकृतचतुर्विंशतय
३ बहुकर्तृकृतानेकस्तोत्रसमुच्चयः
४ श्रीपञ्चजिनेश्वर–गणधराणां स्तोत्राणि
५ कल्याणक–छायापूर्तिस्तोत्राणि
६ चतुर्विंशतिजिनस्तोत्राणि
७ श्रीआदिनाथजिनस्तोत्राणि
८ श्रीनेमिनाथजिनस्तोत्राणि
९ श्रीपार्श्वनाथजिनस्तोत्राणि – १
१० श्रीपार्श्वनाथजिनस्तोत्राणि – २
११ श्रीपार्श्वनाथजिनस्तोत्राणि – ३
१२ श्रीमहावीरस्वामिजिनस्तोत्राणि
१३ शेषतीर्थंकरजिनस्तोत्राणि
१४ सामान्यजिनस्तोत्राणि
१५ पञ्चपरमेष्ठिसिध्दचक्राणां स्तोत्राणि
१६ शाश्वताशाश्वततीर्थानां स्तोत्राणि
१७ सम्यग्दृष्टिदेव–देवीनां स्तोत्राणि
१८ पू.आचार्यादियोग्यमन्त्रस्तोत्राणि
१९ स्तुतयः १
२० स्तुतयः २